GOVERNMENT OF INDIA

DEPARTMENT OF ARCHAEOLOGY

CENTRAL ARCHAEOLOGICAL LIBRARY

46571

CALL No. 891.2905/J.V.S

D.G A. 79.

A366

# VEDIC MYSTICISM

Being rhythmic renderings of Vedic verses

BY

RAGHU VIRA, M. A., PH. D., D. LITT. ET PHIL.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

समुद्रो अ॑सि विधर्म॑णा

46571



THE UNBOUNDED OCEAN AM I

*Poets, philosophers and mystics from all parts of the world have been charmed by the music and freshness of the renderings*
*The originals and the translations are given on opposite pages*

(297)

A366

MEHAR CHAND LACHHMAN DAS
Said Mitha, Lahore

Rupees five 1933 Shillings 7/6

891.2905
J. V. S.

THE

# JOURNAL OF VEDIC STUDIES

JANUARY, 1934

## CONTENTS


| | PAGE |
|---|---|
| Foreword | 5 |
| Gonāmika, One of the Newly Discovered Pariśiṣṭas of the Maitrāyaṇīyas | 6 |
| Drāhyāyaṇa-Śrautasūtra, with the Commentary of Dhanvin, Paṭalas 11-15 | 13 |
| Bhāradvāja-Śrautasūtra, Darśa-Pūrṇamāsa, Praśnas 1-3 | 81 |
| Diagrams of Vedic Fire Altars, Ubhayataḥ-Praüga and Praüga-Citis | 124 |

# FOREWORD

The world of to-day is rapidly tearing itself away from the past. It has withdrawn its allegiance therefrom and is allowing it to perish. It is as true in India as in the West. There are only a few who, either out of love or intense inquisitiveness, would not let it pass beyond the horizon. A number of these few of the nineteenth century made passionate efforts to rescue the old wisdom that was still stored in the scattered hamlets of India. Works of astounding value were rescued and re-stored in the safe vaults of modern sanctuaries, the Universities and Research Institutes. Many were closely studied ; and the printing press multiplied them for wider circulation.

The nineteenth century enthusiasm has now spent much of its force in the West. The printers no more reproduce the ancient things (and particularly not those that pertain to the Veda). They are busy with the sheets of evaluation, the critical studies, which also are losing their charm because they bring to light no new material.

In India we are struggling to start new waves. On these we shall carry the words of antiquity to eager ports. There is yet time for the transport, but it would not be long before our treasures begin to perish in their storerooms and be lost for ever. Indologists, come and join us. Let there be concerted effort, and the stately word-structures of the ancients would once more stand high in their grandeur of design and nobility of purpose.

# GONĀMIKA

## One of the Newly Discovered Pariśiṣṭas of the Maitrāyaṇīyas

edited by

RAGHU VIRA

The Gonāmika is a unique contribution to our knowledge of the ancient cattle rites. For the Maitrāyaṇīyas we have three sources: (1) The second prapāṭhaka of the supplementary book IV of the Maitrāyaṇī-Saṃhitā, which is available in L. v. Schroeder's edition (2) Mānava-Śrautasūtra, 9. 5. 1-3, which is available only in manuscripts[1] (3) The present Pariśiṣṭa, which together with others is attached to the Vārāha-Śrauta ms., Baroda Oriental Institute, No. 11234. No second manuscript has yet been discoverd.

The Vārāha and the Mānava derive their contents entirely from the Saṃhitā. For referring to the Brāhmaṇa portions of the Saṃhitā they use vyākhyātam. The use of iti vijñāyate had not crystallised by their time. For the Saṃhitā the regular term is nigada. There are only a few linguistic changes, mainly substitutions of older or difficult words and forms by the later and simpler ones.

The footnotes record the variations of the three versions. The Mānava can even be reconstructed.

---

1 I could obtain for my use only the photo manuscript belonging to the library of the late Prof. W. Caland.

रेवत्यां पशुकर्माणि कुर्वीत[1] ॥१॥ भिन्नेन स्रवता न हस्ता अवनेनिजीत न पिबेत्[2] ॥२॥ अयस्पात्रेणेत्येके ॥३॥ तद् द्वेषप्रतिषेधार्थं[3] ॥४॥ यं द्विष्यात् तस्यै[4] गवां मध्ये ऽरण्ये ऽधीते[5] गोनामभिराह्वयेत्[6] ॥५॥ संश्रृष्णी प्रातः[7] प्रतीचीमवस्थाप्याधस्ताद् दर्भानास्तीर्य मूर्धनि[8] गोनामभिस्तिस्र आहुतीः पशुकामो जुहुयात्[9] ॥६॥ अग्निवेलायां[10] दीप्यमानं भ्रातृव्यस्य गृहादाहृत्येन्धानो वा[11] (?) जागृयात्[12] ॥७॥ श्वो भूते[13] उपोदये सूर्यस्य हस्ता अवनिज्य दर्भस्तम्ब उदशरावं निर्वपेत्[14] —कामंकामं मा

1 Cp. MS 31, 8–9 यत् किंच पशूनां कुर्वीत तद् रेवत्यां कुर्वीत, Mān. रेवत्यां चित्रायां वा पशुकामः कर्म कुर्वीत. But for the differences noted in our footnotes the Gonāmika of Mān. is identica with that of the Vār.

2 Cp. MS 21. 16–18 अथासुरा अदुह्रन् स्पात्रेण स्रवता सुराम् । ते ऽस्रवन् । स्रवत्यस्य भ्रातृव्यो य एवं वेद । तस्मात् स्रवता न हस्ता अवनेनिजीत न पिबेत्

3 The ms. तद्वेशप्रतिशेषोर्था, Mān. तद्देश-प्रतिषेधमित्यपरे

4 The ms. द्विष्येतेस्य

5 The ms. रण्योधीत, Mān. रण्ये धीते

6 Cp. MS 22, 8–9 अथ यथासुरा आह्वयं-स्तेभ्यो वा अत्रसत् । यं द्विष्यात् तस्य तथा गोष्ठ आह्वयेत्. The passage rather suggests the correction of ऽरण्ये ऽधीते to ऽसुराधीतैः, which would then be joined on to गोनामभिः.

7 Mān. पुरस्तात् for प्रातः

8 For मूर्धनि गोनामभिः Mān. reads काम्यायै स्वाहेति मूर्धनि

9 Cp. MS 22, 9–11 एतैरेव जुहुयात् । गोनामैः संश्रृष्णा गोर्मूर्धन् पशुकामः । काम्यायै स्वाहा श्रव्यायै स्वाहेलान्दायै स्वाहा इति

10 Mān. अपरस्यामग्निवेलायां

11 Mān. गृहादाहृत्येधने रात्री. Cp. MS 23, 2–3 दीप्यमानं भ्रातृव्यस्य गृहादाहरेत् । आ तु सूर्यस्योदेतोर्जागृयात्

12 Mān. adds उत्तरो निगदे व्याख्यातः

13 For श्वो भूते Mān. has प्राचीनप्रवणे च समूले पशुकाम

14 Mān. निनयेत्

आवर्तय इति[1] ॥८॥ गोभिः समेत्य[2] प्रशस्ताः स्थ कल्याण्यः इति ब्रूयात्[3] ॥९॥ एकाष्टकायां चतुष्पथे ऽक्षशो गां कारयेत्[4]॥१०॥चतुष्पादवे[5] इति तिलैरवकिरेत्[6] ॥११॥यो य आगच्छेत् तस्मैतस्मै[7] दद्यात्[8]॥१२॥उत्तरो निगदे[9] व्याख्यातः॥१३॥वसीयस्येहि इति[10] सप्त देवगव्यैः[11] ॥१४॥ चिदसि इत्युत्तरैः[12] सप्त॥१५॥ तासामनुप्राणेति[13] प्रथमौ[14] ॥१६॥ एह्यन्तौ[15] उत्तरौ[16] ॥१७॥ सप्त स्थवीर्यम् । सप्तानां गवामाज्यम् । पयसि[17] चरुः ॥१८॥ सारस्वतं पयसि स्थालीपाकं श्रपयित्वा सरस्वती (?) इत्यृग्भ्यां स्थालीपाकस्याज्यस्य वा जुहुयात् ॥१९॥ वसीयस्येहि इति पूर्वाभिर्हुत्वोत्तरा निगदेत् ॥२०॥ दिविः[18] (?) इति हुत्वानुनिगदेत्[19] ॥२१॥ यो वैश्यः शूद्रो वा बहुपुष्टः स्यात् तस्य गवाँ साण्डँ वत्सतरमपनयति—

1 Cp. MS 24, 7–8 यत्र प्राचीनप्रवणं समूलं भूम्या स्यात् तदुपोदये सूर्यस्य हस्ता अवनिज्य दर्भस्तम्ब उदशरावं निनयेत्—कामंकामं मा आवर्तय इति

2 Mān. संहेत्य

3 Cp. MS 24, 14–15 यत्र गोभिः संगच्छेत तद् ब्रूयात्—प्रशस्ताः स्थ कल्याण्यः इति

4 Cp. MS 25. 4–5 तद एवं विद्वानेकाष्टकायां गां हते···

5 † Thus temporarily emended. The ms. चक्षुद्रव

6 This sūtra is missing in MS and Mān.

7 The ms. has missed the second तस्मै

8 Mān. adds श्वो ऽन्यां कारयित्वा ब्राह्मणान् भोजयेत् पशुकामः

9 The ms. निगद-

10 Mān. वसीयस्येहि श्रेयस्येहीति, MS 26 13–14 वसीयस्येहि··· सूनृता एहि

11 Cp. MS 27. 12 एता वै सप्त देवगव्यः

12 Mān. चिदसि मनासि धीरसीत्युत्तराः, MS 26, 14–27. 1 चिदसि··· सुहवा ना एहि

13 To be emended to तासामनुप्राणान्ता ? Mān. °मनुप्राणान्ताः. अनुप्राण refers to the last word in विश्वा त्वं भूतानुप्राण MS 26. 15.

14 Vār. and Mān. mss. प्रथमाः

15 एहि refers to the close of the last verse सुहवा ना एहि MS 27. 1.

16 Mān. adds सह रायस्पोषेण देवीर्देवीः [MS 27. 2–6] इत्यनुनिगदति । संग्रामे जिगीषन् श्येनयोः संदश्यमानयोः पूर्वाभिर्हुत्वोत्तरा निगदेत् । यत्र समूला ओषधीरुपगच्छेत् पशून् वा तत् । एता एह्यन्ता सप्त जपेत्. Cp. MS 28. 1–2, 7–8 °जयति सङ्ग्रामम् ॥ यत्र समूला (MS में मूला to be corrected) ओषधीरुपगच्छेत् पशून् वा तत् । एता एव सप्त वदेत्

17 From पयसि upto the end of sūtra 21 Mān. has सप्तानां पयसि स्थालीपाकः । यस्य सप्त स्थविराश्वरमामन्तमा स्युः पूर्वाभिर्हुत्वोत्तरा निगदेत्. Cp. MS 28.9 –11 सप्त स्थवीर्येण याजयेत् । यस्य सप्त स्थविराश्वरमामन्तमा स्युर्वसीयस्येहि श्रेयस्येहि इत्येतदेतदेवास्मा अत्याह्वयति

18 Perhaps सह रायस्पोषेण देवीर्देवीरिति MS 27, 2–6.

19 The ms. °नुनिगददिति

इलान्दाः स्थ इति[1] ॥२२॥ आयुर्मे दाः इति स्वासु[2] गोष्ठे ऽपिविसृज्य[3] परस्यात्याह्वयेत्—वसीयसेहि श्रेयसेहि इति[4] ॥२३॥ एतदेतदेवास्या अत्याह्वयति[5] ॥२४॥ नास्य किंचनोदशिषत्[6] ॥२५॥ व्याहृत्य ग्रामकामं याजयेत् ॥२६॥ सारस्वत ऋग्भ्यां स्थालीपाकस्य वा जुहुयात्[7] ॥२७॥ इत्यतः प्रभृति समानं पशुकाम्यं च[8] ॥२८॥ सर्वासां दुग्धे चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्य उपहरेत्[9] ॥२९॥ तेभ्यो गा वासो हिरण्यं वा दद्यात्[10] ॥३०॥ पुण्यं प्रशस्तम् इति ब्रूयात्[11] ॥३१॥ भद्रं कल्याणम् इति ब्रूयात् ॥३२॥ धेनुर्भव्या इति[12] ब्रूयात्[13] ॥३३॥ अदानीयायै गां दत्त्वा न मे तदुपदम्भिषः इति[14] जपेत्[15] ॥३४॥

इति गोनामिके प्रथमं खण्डम्[16] ॥ १ ॥

---

1 Mān. °वत्सतरमिलान्दा स्थ पुष्यो नक्षत्रं पोषयिष्णिवत्यपमयेत. Cp. MS 28. 11–13 यो वैश्यः शूद्रो वा बहुपुष्टः स्यात् तस्य गवीं साण्डं वत्सतरमपमयेत—इलान्दाः स्थ इति ⋯पुष्यो नक्षत्रं पोषयिष्णु इति. Vār. अपनयति is a "correction" of the lectio difficilior अपमयेत

2 I. e. among his own cows.

3 Mān. स्वासु गोष्ठास्ववसृज्य. For the subsequent Mān. text see note 6.

4 Cp. MS 28. 14–16 आयुर्मे दा वर्चो मे दा रयिं मे दाः पुष्टिं मे दाः इति⋯तमितो ऽभि [v.l. ऽपि] सृज्याथेऽतो ऽत्याह्वयेत्—वसीयसेहि श्रेयसेहि इति

5 Sūtras 24, 25 are identical with MS 28. 16–29. 1.

6 Cp. MS 29. 1–2 ग्रामकामं याजयेत् सारस्वत ऋग्भ्याम्. The Mān. text for परस्यात्याह्वयेत् (sū. 23) up to जुहुयात् is वसीयसेहि श्रेयसेहीति परस्यात्याह्वयेत् । सरस्वन्तं पयसि स्थालीपाकं श्रपयित्वा सारस्वत ऋग्भ्यामाहुतीर्जुहुयात् । एतेन ग्रामकामो यजेत्

7 See MS 29. 3–5.

8 For this and the preceding sūtra Mān. has तथा पशुकामः । सर्वासां दुग्धे चतुःशरावमोदनं पचेद् ब्राह्मणेभ्यः पशुकामः । न छिन्नं देयमिति व्याख्यातम्. Of this सर्वासां⋯देयम् is from MS 29. 5–6, 7–8.

9 Cp. MS 29. 8 वासो हिरण्यं वा देयम्

10 The sūtra is from MS 29. 11–12. For sūtras 30, 31 Mān. has ता भद्रं भद्रमिति ब्रूयात्, which is followed by a long passage, very likely an interpolation.

11 Sūtras 32, 33 only in Vār. and Mān.

12 The ms. धेनुं भव्येति, Mān. पुण्यं चत्रंमिति

13 The ms. अनिंदनीयाय, Mān. अदीक्षिणीयाय

14 The ms. °दम्भिषदिति

15 Cp. MS 29. 13–14 यदि मन्येतादानीयायादामित्येतदेव यजुर्वदेत्—न मे तदुपदम्भिषर्द्धिर्मह्या यद्दाः इति

16 Here ends Mān. 9, 5, 2.

वीरैवतीर्भूयास्त यौ नो वीरैवतो ऽकर्त **इति पुमांसं जातमभिमन्त्रयेत** ॥१॥ भूयसीर्भूयास्त या नो भूयसो ऽकर्त **इति स्त्रियं जाताम्** ॥२॥ अन्नादा भूयास्त ये नो ऽन्नादानकर्त **इति बलिहृतो ऽभिमन्त्रयेत** ॥३॥ भूयांसो भूयास्त ये नो भूयसो ऽकर्त **इति**[5] **सभासदः** ॥४॥ **पादौ प्रत्यवहरेदुपतिष्ठेद् वा** ॥५॥ पुण्या पुण्यमसुश्चित्रा चित्रमसूद् दैवो[7] मे भगवो ऽजनिष्ठा मैत्रावरुण ऊर्जा मे भगवः सह जनिष्ठाः संविदं मे विन्द **इति पुंसाम्** ॥६॥ पुण्या पुण्यामसुश्चित्रा चित्रामसूद् दैवी[10] मे भगवत्यजनिष्ठा मैत्रावरुणी रायस्पोषेण मे भगवती सह जनिष्ठाः क्षात्रं मे विन्द **इति स्त्रियः** ॥७॥ **एकाष्टकायां वत्सानेकैकमभिमन्त्र्य सर्वान् सहाभिमन्त्रयेत** ॥८॥ पुण्याः पुण्यानसुवंश्चित्राश्चित्रानसुवन् दैवौ मे भगवन्तो ऽजनिढ्वं मैत्रावरुणा ऊर्जा मे भगवन्तः सहैं जनिढ्वं संविदं मे विन्दत **इति पुंसाम्** ॥९॥ पुण्याः पुण्या असुवंश्चित्राश्चित्रा असुवन्

1 The ms. वार°, Mān. वार्

2 For sūtras 1–3 Mān. reads °भूयास्त येति व्याख्यातमा बलिहृतः

3 The ms. वार°

4 The ms. °मन्त्रयेते. Up to पादौ प्रत्यवहरेद् in the fifth sūtra the text is from MS 29. 16–30. 2.

5 Mān. gives the pratīka भूयांसो भूयास्त इति

6 For उपतिष्ठेद्वा Mān. reads उपोपतिष्ठेति च, and for the following sūtras it gives only the pratīkas पुण्या पुण्यमसाविति व्याख्यातं पुण्यमसाविति च

7 The ms. देवो. Cp. note 10.

8 The ms. सहाजनिष्ठा

9 MS 30. 3–5 पुण्या···विन्द इति पुमांसं जातमभिमन्त्रयेत

10 For दैवी the ms. has ऐंद्री. Cp. note 7.

11 MS 30. 6–8 पुण्या···विन्द इति स्त्रियं जाताम्

12 Mān. एकाष्टकायां तूष्णीं सर्वान् संसृज्य Cp. MS 30. 9–11 ये प्राचीनमेकाष्टकायां जायन्ते···ये प्रतीचीनं···तानुभयान्त्सहाभिमन्त्रयेत

13 The ms. is corrupt. For असुवन् दैवा it has असु अर्धमीर्णी. Cp. notes 7, 10. For दैवा Mān. reads ऐंद्रा.

14 Vār. and Mān. mss. सहा–

15 For पुंसां Mān. has पुंसो जातान्

दैव्यो मे[1] भगवत्यो ऽजनिष्ठं मैत्रावरुणयो[2] रायस्पोषेण मे भगवत्या सह[3] जनिष्ठं शान्तं मे विन्दत इति स्त्रीणाम्[4] ॥१०॥ धेनुर्धेनुम् इति ब्रूयात् ॥११॥ धेनुर्भव्या[5] इति ब्रूयात् ॥१२॥ न हत इति ब्रूयात् कुशल इति ब्रूयात्[6] ॥१३॥ न अन्तर्वत्नी इति ब्रूयाद् गर्भिणी[7] विजन्या इति ब्रूयात् ॥१४॥ भुवनमसि[8] सहस्रमिन्द्राय त्वा सृमो ऽददाद् यावतीनामिदं करोमि भूयसीनामुत्तरां समां क्रियासम् इति गवां लक्ष्माणि[9] कुर्यात् ॥१५॥ पुंसस्त्रियः इति व्यत्यासं पण्णां चतुर्णां[10] वेणुकाण्डमप्सु वासयित्वा[11] ॥१६॥ यस्य दक्षिणतः प्रतिभिन्नम् इति[12] ब्राह्मणेनाव्याख्यातम् ॥१७॥ इह प्रजा विश्वरूपा रमन्ताम् इति गाः सायमायतीरभिमन्त्रयेत[13] ॥१८॥ सं वः सृजत्वर्यमा इति गाः संसृजेद् या अस्य पुरो[14] स्युर्याश्चान्यतो विन्देत[15] ॥१९॥ रेवती तन्तिः इति तन्तिं[16] वितनुयात् ॥२०॥ दधि घृते संनीय[17] रय्या त्वा पुष्ट्या ऽनुमार्ज्मि[18] इत्यनुमार्ष्टि[19] ॥२१॥ प्रविमुक्तवत्साया व्रता[नि[21] न रिक्ता स्याश्चोपर्युपरि संचरेयुर्नाभिवर्षेन्नाभित-

1 The ms. असृर्दमेण्वीं मे, Mān. असुर्नैडी मे

2 Mān. मैत्रावरुणी

3 The ms. सहा–

4 Mān. स्त्रीर्जाताः, and adds तानुभगान् सहाभिमन्त्र्यायतनी

5 The ms. धेनुं for धेनुर्. For Mān. also the Vedic Concordance records धेनुं as a var. lec. for धनुर्.

6 Sūtras 13–15 are from MS 31. 1–6. The variations are noted in their due place.

7 MS and Mān. omit गर्भिणी

8 Mān. इक्षुकाण्डमप्सु वासयित्वा लोहितेनायसा (the ms. °तेनायसेन) वा (MS 32. 11–13) भुवनमसि

9 MS and Mān. लक्ष्म

10 पण्णां चतुर्णां appears in Mān. as पण्णां चतसृणां and is placed before पुंसः. इक्षुकाण्डं° having been already given is naturally omitted here.

11 MS 31. 10–32. 5.

12 Mān. omits ब्राह्मण-

13 Except for the pratīka instead of the entire mantra the sūtra is identical with MS 32. 14–16. The ms. °येत् for °येत° at the end.

14 The ms. पुर

15 MS 33. 1–5 supplies the full text of the mantras and the viniyoga-vākya.

16 From MS 33. 10–12. Mān. adds प्राचीमुदीचीं वा

17 Mān. संसृज्य

18 Vār. and Mān. mss. °नुमार्ष्टि

19 Cp. MS 33. 12–13 तामनुमृज्यात्—रय्या त्वा पुष्ट्यानुमार्ज्मि इति

20 The ms. आवसु, Mān. असु°

21 In the ms. नि of व्रतानि and the rest of the sūtra has fallen out.

पेत् ॥२२॥ ऋृषभमुत्सृज्यन् पिता वत्सौनाम् इति वृषभस्य दक्षिणे कर्णे जपति[4] ॥२३॥ यो वैश्यः शूद्रो वा बहुपुष्टः स्यात् तस्य गवां गोष्ठादेकविँशतिँ शकाम्याहुत्यैकविँशतिमाहुतीः पशुकामो जुहुयात् ॥२४॥ गोनामभिर्देवगवीभिरग्रतः ॥२५॥ नामिनीः पुरस्तात् पूतेन प्रतीचीमवस्थाप्याधस्ताद् दर्भानास्तीर्य भसदि गोनामभिस्तिस्र आहुतीः [हुत्वा ?] पशुकाम आकूतिहोमं जुहुयात् ॥२६॥ यासामिन्द्र उदाजतं इति चत्वार आकूतिहोमाः ॥२७॥ तेषामेकैकेन प्रातरन्तर्गोष्ठासु गोषु जुहुयात् ॥२८॥ एतैरेव जुहुयाद् गोष्वाकृतासु ॥२९॥ एतैः संग्रामे[10] ॥३०॥ मित्रवतः इत्यश्वानभिमन्त्रयेत[11] ॥३१॥ रोहिणीर्वो वृत्रे इति[12] सप्ताहुतीः पशुकामो जुहुयात् ॥३२॥ उत्तमो निगदे व्याख्यातः ॥३३॥ गोर्वर्चसम्—अनुगुप्तस्य सर्पिषः उभयेषां त्वा देवमनुष्याणां प्रियां करोमि इति श्रोत्रियस्य मुखं संमार्ष्टि[14] ॥३४॥ कुमार्याः पतिकामायाश्च ॥३५॥ अमुष्य इत्यवघृत (?) ॥३६॥ उत्तमो निगदे व्याख्यात उत्तमो निगदे व्याख्यातः ॥३७॥

इति गोनामिके द्वितीयं खण्डम् ॥

---

1 Cp. MS 33. 13–14 तस्या व्रतं न रिक्ता स्याज्ञोपर्युपरि संचरेयुर्नाभिवर्षेन्नाभितपेत्

2 Man. ऋ॰

3 After वत्सा Man. does not correspond with our text. The passage runs upto the end of 9. 5. 3 and is probably an interpolation.

4 Cp. MS 33. 17–19 पिता वत्सानां ''इत्यृषभस्य कर्णे उत्सृजमानो वदेत्

5 From MS 34. 1–2, which, however, omits पशुकामः.

6 Cp. MS 34. 3–4 एतैरेव जुहुयाद् गोनामैरेत्वर्यां गोर्भसदि पशुकामः

7 MS 34. 6–14.

8 Cp. MS 34. 17 प्रातरेवान्तर्गोष्ठासु गोषु होतव्यम्

9 From MS 34. 18.

10 Cp. MS 34. 19 एतैरेव जुहुयात् संग्रामे

11 See MS 34. 19–35. 1. The ms. ॰मन्त्रयेत्

12 MS 35. 1–5.

13 Cp. MS 37. 6 एतद्धै गोवर्चसं न सर्वस्मा इव कुर्यात्

14 See MS 37. 3–5.

15 Cp. MS 37. 5–6 एतेन कुमार्या एतेन पतिकामायाः

# DRĀHYĀYAṆA-ŚRAUTASŪTRA

With the Commentary of Dhanvin

Paṭalas 11–15

edited by

RAGHU VIRA

Thirty years ago Dr. J. N. Reuter of the University of Helsingfors in Denmark had printed the first ten paṭalas and four sūtras of the eleventh of this Śrauta and its commentary, and a promise was held out for completing the work in two more parts. The promise was never made good. After getting an assurance from the Publishers, Messrs. Luzac and Co., London, that there is no further possibility of their continuing the work I procured the manuscripts that were in my reach and began with the 11th paṭala. They are all written in the Devanāgarī script :

(1) Panjab University Library, Lahore, No. 5620a. Text only, paṭ. 1–22.

(2) Dr. Sardesai of the Oriental Book Agency, Poona, very kindly presented to me this beautifully written and complete ms. of the text and com.

(3) Pb. Univ. Lib., Lahore, No. 5451. Text and com., complete.

In the meanwhile I got Reuter's unpublished text for the five paṭalas, 11 (excluding the first four sūtras)–15. Herein were collated the following manuscripts:

A. Devanāgarī mss.:

(1) India Office, London, Colebrook Collection, No. 363b. Text only, complete.

(2) India Office, London, Colebrook Coll., No. 363a. Text and commentary, paṭ. 1–11.

Bodleyan Library, Oxford, Wilson Coll., No. 528. Text and Com., paṭ. 12–15. 4. 9.

The two mss. are really one ms. split into two. They are written in the same hand.

(3) Calcutta Sanskrit College, No. 259. Text and com., complete.

B. Grantha mss.:

(4) India Office, London, Burnell Coll., No. 152. Text only, complete.

(5) India Office, London, Burnell Coll., No. 187. Text and com., paṭ. 1–21.

In our critical apparatus they are denoted by Da, Df, De, Ga, Gb respectively. Our own mss. are Db, Dc, Dd. Of these the largest number of individual readings are shown by Gb. Dcde form one uniform group. Dcd mark the end of every sūtra by the addition of iti. It is a very convenient device and one wonders why it did not get wide currency in ancient times. The mss. do not show the colophons either completely or systematically. Clerical errors of every type are rather numerous. It was not possible to register all of them. The editor had to exercise his judgement oftener, than he is usually called to. I have met misinterpretations of ligatures, wrong combinations leading to "ghost-words" and to false accomoda-

tion, assimilation of words and of terminations, anagrammatism, metathesis (either of words or of whole passages), substitution of synonyms, haplography, lipography, dittography, and adscripts. Being traceable to single mss. they were of no material use for reaching back to the original, and hence they were rejected.

These eight mss. fairly settle the text. The collation of more mss. would not, I am sure, take the editor any nearer to the original, as it was known to the commentator Dhanvin. The Sūtra had already been conflated before the time of Dhanvin, that is before Sāyaṇa who quotes Dhanvin extensively.

The Śrauta text given in the following pages is after the commentator. He is a fairly safe guide. He is a master of his tradition[1] and his choice of the readings is remarkably good. But there are instances where difficulties arise. The only passage where I have taken courage to put in the text, what Dhanvin expressly calls an apapāṭha, is 11. 1. 7 मानो भद्रः (instead of Dhanvin's आ नो भद्रः). In the very next sūtra, however, I have allowed मूलतः to remain where Dhanvin puts it. मूलतः really belongs to the end of sūtra 7. For the division of the text into sūtras Dhanvin (or a lost predecessor of his) alone is responsible. Agnisvāmin, who is commenting on the Lāṭ., has a totally different division.[2]

## THE DRĀHYĀYAṆA AND THE LĀṬYĀYANA ŚRAUTASŪTRAS

The two Sūtras belong respectively to the Rāṇāyanīya and the Kauthuma Śākhās of the Sāma-Veda. Their comparison leads us to great antiquity, when (excepting slight differences in ritual), their text was one. We are forced to this conclu-

1 When tradition fails him, he allows a free play to his fancy.

2 Rāmakṛṣṇa Dikṣita (alias Nānābhāī, son of Dāmodara Tripāṭhī), another commentator of Lāṭ., does not always follow Agnisvāmin.

sion by the verbal identity in the vast majority of the sūtras. Their sequence also is mostly uniform. Even in the matter of division of chapters (adhyāyas in Dr., prapāṭhakas in Lāṭ.) the agreement is very close. In each case a chapter is divided into 12 sections[1]. But of greater significance are the variations themselves. The variations consist in additions, paraphrases and change in sequence. The additions are numerous in the Dr., and they exceed the other variations. Now, the additions generally are of the nature of adscripts, marginalia or interlinear glosses.[2] They can be thrown out without affecting the smoothness of the context. When one is a paraphrase of the other, or there is a change in sequence, the process of evolution does not reveal itself so readily. On the whole the Lāṭ. has preserved a purer text.

1 The Dr. has also a secondary division into paṭalas.

2 E. g. Dr. 11. 1. 8 या स्वयंवका सेन्द्रणता explains इन्द्रणता of the preceding sūtra.

[1]रोहितेनानडुहेनोत्तरलोम्ना चर्मणापिहितः स्यात् ॥ १ ॥

पूर्वोक्तो वाणश्चर्मणा छादितः स्यात् । वाणमुखस्य बिलं चर्मणा छादयेदित्यर्थः ॥

तस्य[2] दशसु पश्चाच्छिद्रेषु दशदश तन्त्र्यो बद्धाः स्युर्मौञ्ज्यो दार्भ्यो वा ॥ २ ॥

तस्य वाणस्य पश्चाद्भागे मुखादितरस्मिन् प्रान्ते दश छिद्राणि कृत्वा प्रत्येकं[3] दशदश तन्तवो बद्धाः स्युः । मौञ्जा वा दर्भमया वेति ॥

त्रिष्विति शाण्डिल्यः । चतुस्त्रिंशन्मध्यमे त्रयस्त्रिंशतावभितः ॥ ३ ॥

त्रीण्येव छिद्राणि कृत्वा मध्यमे चतुस्त्रिंशत्तन्तूनितरयोस्त्रयस्त्रिंशताविति । एवं शततन्तुर्वाण इति ॥

पुरस्तादेकैकशस्तास्त्रेधं विभज्य भूर्भुवः स्वः इत्येताभिः पृथगुत्तरोत्तर्युद्वहेत् ॥ ४ ॥

एकैकश उद्वहेदित्यन्वयः । बन्धनात् प्रागेव तास्त्रेधं समं विभज्य मध्यमं भागमेकाधिकं कृत्वा प्रतिवर्गं पृथग्व्याहृतिभिः प्रत्येकं तन्तूनुद्वहेत् । छिद्रेषु तन्तून्नाम्ज्योर्ध्वमुद्वह्य बिले बध्नीयादित्यर्थः । उत्तरोत्तरीति को ऽर्थः । बाह्यच्छिद्रे प्रथमं कुर्यान्मध्यमे द्वितीयं ततो ऽभ्यन्तरे तृतीयमपवर्गमिति । तेन प्रथमां व्याहृतिमुक्त्वा बाह्ये छिद्रे त्रयस्त्रिंशत्तन्तून् बध्नीयात् । प्रतितन्तुमावर्तयेत् ।

1 Gb लो॰

2 Gb om.

3 Gb adds तेषु

4 Gb मौञ्ज्यो

5 DeGb सुवर्

6 Gb तंतुमंत्रमावर्तयेते

एकैकश उदूहेदिति वचनात् । एवं मध्यमे छिद्रे द्वितीयया व्याहृत्या तृतीये छिद्रे तृतीयया व्याहृत्येति । यदा पुनर्दश छिद्रेषु दशदश[1] तन्तवस्तदापि त्रैधं विभज्य व्याहृतिभिरुदूहनमिति ॥

तमभिमृशेत्—वदो वद वदा वदी वदो वदोरुः[2] पृथुः[3] सुगः सुगन्त्वः[4] कर्मः करणः[5] करः करस्तुरभीषाट् चाभीषाही[6] चाभिमातिहश्चाभिमातिहा[7] च सासहिश्च सहीयांश्च सहस्वांश्च सहमानश्चोद्वयाश्च वृहद्वयाश्च[8] सवयाश्च[9] वृद्धवयाश्चैन्द्रीं वाचं वृहतीं विश्वरूपां शतायुषीं[10] प्रवद देव वाण इति ॥ ५ ॥

तं वाणमेवं कृत्वा मन्त्रेणाभिमृशेदिति ॥

शिथिलांस्तन्तूनायच्छेत्—
एभिर्नो वाण तन्तुभिः शतं राद्धीरिहावद[11] ।
अरात्स्म सर्वे ऽतार्ष्म[12] जीवा ज्योतिरशीमहि ॥
इति ॥ ६ ॥

यदि तन्तवः शिथिलाः स्युश्छिन्नाः स्युस्तदा तान् सर्वान् समं[13] संधार्य[14] पुनरायच्छेन्मन्त्रेणेति ॥

वाक् सर्वं[15] मनो ज्योतिर्मानो[16] भद्रः इति जपित्वा वादयेदिन्द्रणतयेषीकया वेतसशाखया च सपलाशया ॥ ७ ॥

आ नो भद्रः इति मन्त्रपाठः । मानः इत्यपपाठः । सपलाशया वेतसशाखया इषीकया च वाणं वादयेदिति[17] ॥ इन्द्रणतयेति पदस्य स्वयमेवार्थमाह—

मूलतो या स्वयंवक्रा सैन्द्रणता ॥ ८ ॥

1 Dcdef om. the second दश
2 Gb वदो यः
3 Reuter पुथुः (without variants)
4 DbGb सुगंधः
5 Db वरुणः, Gb करुणः
6 Dab नाभि°
7 Dce om.
8 Gb om.; De समवयाश्च
9 De वृहद्‌° (= Lāt.)
10 DceGb °षं
11 Db राद्धिमिहा°, Gb °रिहावत
12 Db तारिषु, Dce °रिष्म, Gb तारिषष्ठ
13 Gb om. सर्वान् समं, Df om. समं
14 Gb समाधाय
15 Gb सर्वां
16 Dab ज्योतिरा नो
17 Gb om. इति

या मूलप्रदेशे स्वयमेव वक्रा भवति[1] सेन्द्रणता। इन्द्रेण नता इन्द्रणता दैवार्चतेत्यर्थः ॥

प्राणाय त्वा [PB 5.6.14] इत्यूर्ध्वमुल्लिखेत् अपानाय त्वा [l.c.] इत्यवाञ्चम् ॥ ९ ॥

छिद्रप्रदेशादारभ्य यावन्मुखमूर्ध्वमुल्लिख्य वादयेत् । तथा मुखप्रदेशादारभ्य अपानाय त्वा इत्यवाञ्चमवलिखेदिति ॥

व्यानाय त्वा[3] [l.c.] इति त्रिः संल्लिख्योदञ्चं वाणं प्रोहेद्ब्राह्मणमुक्त्वा इममुल्लिखन्नास्व इति ॥ १० ॥

व्यानाय त्वा इति त्रिः[4] संल्लिख्य इममुल्लिखन्नास्व इति कंचिद्ब्राह्मणमुक्त्वा तस्य हस्तयोरुदञ्चं वाणं प्रोहेदिति ॥

प्रथमः खण्डः ॥१॥ ॥४॥

---

आहत दुन्दुभीन् प्रवदन्तु वीणाः इति ब्रूयात् ॥ १ ॥

आहत आघ्नत दुन्दुभीनिति प्रैष इति ॥

अलाबुवीणां वक्राकपिशीष्ण्यौ च पूर्वस्यां द्वारि बहिःसदसम् ॥ २ ॥

अलाबुवीणा प्रसिद्धा । वक्रा नाम वीणाविशेषः । तथा कपिशीष्णीं च । तास्तिस्रो वीणाः सदसः पूर्वस्यां द्वारि बहिःसदसं वीणावादिनो वादयेयुरिति ॥

वक्राकपिशीष्ण्यौ दुन्दुभींश्च प्रतिमन्त्रयेत—
यो वक्रायां कपिशीष्ण्यां[6] दुन्दुभौ[7] यच्च वाद्यम् ।
घोषो यो[8] महतो महांस्तेन नो राद्धिमावद ॥
इति ॥ ३ ॥

आवदेत्येकवचनं वाग्देवताभिप्रायमिति ॥

महावीणापिशीलवीणे चापरस्यामन्तरिति गौतमशाण्डिल्यौ बहिरिति धानंजय्यः ॥ ४ ॥

1 Dd adds इति
2 Gb दैवन॰
3 DdGb repeat व्यानाय त्वा (=Lāṭ.)
4 Gb त्रिभिः
5 DeGb °ष्णीं (=Lāṭ.)
6 DbcdGb °ष्ण्यौं
7 Gb adds च
8 Gb घोषयोर

अपरस्यां सदसो द्वार्यन्तर्बहिर्वेदि[1] वीणाद्वयं वादयेयुः ॥ तयोश्च प्रति[2]-मन्त्रणं कार्यमित्याह—

**अलाबुवीणापिशीलवीणे च प्रतिमन्त्रयेत—**

अलाबुवां पिशीलीं[3] च यं मन्त्रमधिजग्मतुः ।

तेनेदमुपगायतां ते साम महयिष्यतः ॥

इति ॥ ५ ॥

स्पष्टमिति ॥

**पश्चिमेनोर्पगातॄन् द्वेद्वे एकैका पत्नी काण्डवीणां पिच्छोरां[4] च व्यत्यासं वादयेत् ॥ ६ ॥**

सत्त्रिणां यजमानानामेकैका पत्नी पश्चिमेनोपगातॄनासित्वा द्वेद्वे वीणे व्यत्यासं वादयेत् । प्रथमं काण्डवीणां ततः पिच्छोरां[5] पुनरप्येवमेव सर्वा इति ॥

**उपमुखं पिच्छोरां[6] वादनेन काण्डमयीम् ॥ ७ ॥**

उपमुखं स्थापयित्वा मुखमारुतेन पिच्छोरां[6] वादयेयुः वादनदण्डेन[7] काण्डमयीमिति ॥

**ता अपघाटिला इत्याचक्षते ॥ ८ ॥**

ताः पत्नीभिर्वाद्यमाना अपघाटिला इत्याचक्षते । अनेन तं पत्न्यो ऽपघाटिलाभि-रुपगायन्ति । आर्त्विज्यमेव तत्[8] पत्न्यः कुर्वन्ति [PB 5.6.8] इति ब्राह्मणं व्याख्यातमिति ॥

**ताः[9] प्रतिमन्त्रयेत—**

यां पत्न्यपघाटिलां मृदुकं वादयिष्यति ।

सारातिमपवाधतां द्विषन्तं तैजनित्वक् ॥

इति ॥ ६ ॥

ता अपघाटिलाः प्रतिमन्त्रयेतेति ॥

1 Dcd °र्बहिर्वा, Gb om. वेदि

2 Gb om. प्रति

3 Da अलाबुवीं पिशीलीवीणे, Df अलाबुवीण-पिशीलवणे, Gb अलाबुवीणा पिशिलि (cp. Lāt. and com.)

4 DbGb °नोद्°

5 Df °रां

6 DdfGb °रां

7 Gb वादनेन

8 Dce °मेतत् for °मेव तत्

9 Gb तां

सर्वमनुवीक्षमाणो जपेत्—

आक्रन्दा उलुलयः प्रक्रोशा यच्च चेष्टितम्[1] ।

सर्वा[2] सत्त्रस्य सा राद्धिस्तथेदं साम गीयते ॥

इति ॥१०॥

सर्वमपघाटिलास्ततो ऽन्यांश्च वीणादुन्दुभींश्चानुवीक्षमाणो जपेदिति ॥

जपेदेव—सुपर्णो ऽसि[3] गरुत्मान् प्रेमां वाचं वदिष्यामि बहु करिष्यन्तीं बहु करिष्यन् स्वर्गमयिष्यन्तीं स्वर्गमयिष्यन् मामिमान् यजमानान् इति ॥ ११ ॥

पुनरपि सुपर्णो ऽसि गरुत्मान् इति मन्त्रं जपेदिति ॥

द्वितीयः खण्डः ॥२॥ ॥८॥

---

ब्राह्मणो ऽभिगरः पूर्वस्यां सदसो द्वारि प्रत्यङ्मुख उपविशेद् वृषलो ऽपगरो ऽपरस्यां प्राङ्मुखः ॥ १ ॥

यः सत्त्रिणो यजमानान् प्रशंसति सो ऽभिगर इत्युच्यते । स ब्राह्मणः पूर्वस्यां द्वारि प्रत्यङ्मुख उपविशेत्[4] । अपरस्यां द्वारि वृषलो ऽपगरः प्राङ्मुख उपविशेन्निन्दार्थम् । यो निन्दति सो ऽपगर इत्युच्यते ॥

स ब्रूयात्—नारात्सुरिमे सत्त्रिणः [PB 5.9.14] इति ॥२॥

स[5] वृषलो निन्दन् ब्रूयात्—नाराज्सुरिमे सत्त्रिणः इति । असिद्धा इत्यर्थः ॥

अरात्सुः [l. c.] इत्यभिगरः ॥ ३ ॥

अभिगरो ब्राह्मणः अरात्सुः इति ब्रूयात् । संसिद्धा इत्यर्थः ॥

दक्षिणेन मार्जालीयमर्यो ऽन्तर्वेदि दक्षिणामुखस्तिष्ठेत् ॥ ४ ॥

अर्यः स्वामिवैश्ययोः [3.1.103] इति पाणिनिस्मृतेरर्यो वैश्य इति ॥

1 DbdGb चेष्टति (= Lāṭ.)
2 Gb सर्वे-
3 DcdsGa ऽसिम (= Lāṭ.); Df corrects सि to सिम
4 Dcs om. इति
5 Gb adds in margin सत्त्रिणः प्रशंसितुं
6 Dcs om.

बहिर्वेदि शूद्र उदङ्मुखः ॥ ५ ॥

स्पष्टमिति ॥

अर्याभावे यः कश्चार्यो वर्णः ॥ ६ ॥

अर्याभावे यः कश्चार्यस्त्रैवर्णिकः[1] स्यादिति ॥

तौ श्वेतं परिमण्डलं चर्म व्यायच्छेतां शूद्रः पूर्वः ॥ ७ ॥

तावर्यश्च शूद्रश्चान्योऽन्यं श्वेतं चर्म व्यायच्छेताम् । शूद्रः प्रथमं व्यायच्छेदिति ॥

पूर्वेणाग्नीध्रीयं ब्रह्मचार्यन्तर्वेद्युदङ्मुखस्तिष्ठेद्बहिर्वेदि पुंश्चली[2] दक्षिणामुखी ॥ ८ ॥

स्पष्टमिति ॥

सा ब्रूयात्—दुश्चरितिन्नवकीर्णिन् इति ॥ ९ ॥

सा पुंश्चली[3] वेश्या ब्रह्मचारिणं प्रति ब्रूयात्—हे दुश्चरितिन् हे अवकीर्णिन् इति । दुश्चरितं ब्रह्मचर्यस्खलनमिति ॥

धिक् त्वा जाल्मि पुंश्चली ग्रामस्य मार्जनि पुरुषस्य पुरुषस्य[4] शिश्नप्रणेजनि इति ब्रह्मचारी[5] ॥ १० ॥

ब्रह्मचारी पुंश्चलीं प्रति ब्रूयात्—धिक् त्वा जाल्मि इति ॥

एवमा तृतीयं व्यत्यासम् ॥ ११ ॥

एवमेव पुनः[7] पुंश्चली ब्रूयात् पुनर्ब्रह्मचारी[6] पुनरप्येवं कुर्याताम्[7] । आ तृतीयमिति यावत् तृतीयं पर्यायं त्रिरित्यर्थः ॥

सर्वेषां कर्मणि निष्ठिते तदेवाभिगरश्चिर्ब्रूयात् ॥ १२ ॥

सर्वेषामभिगरप्रभृतीनां कर्मणि यथोक्ते कृते पुनरप्यभिगरश्चिर्ब्रूयात्[8]—अरात्सुरिमे सत्रिणः इति ॥

अवसृज्य शूद्रः प्रद्रवेत् ॥ १३ ॥

अथ शूद्रः परिमण्डलं चर्म विसृज्य धावेदिति ॥

1 DdGb ॰र्णिकः

2 DacGb पुं॰

3 Dc पुं॰

4 Only DbcdGb repeat पुरुषस्य

5 Dce om.; others add इति

6 Db ब्रह्मचारि॰

7–7 Dd पुंश्चली ब्रह्मचारी पुनरिति

8 Gb ॰गरस्तदेव निर्ब्रू॰

तं तेनैवावक्षिणुयात् ॥ १४ ॥

तं शूद्रं तेनैव परिमण्डलेन चर्मणार्यो वर्णो ऽवक्षिणुयाद् विध्येत् ताडयेदिति ॥

यथाभिप्रेतमितरां ब्रह्मचार्याक्रोशेत् ॥ १५ ॥

अथ ब्रह्मचारी [2]पुंश्चलीं यथाभिप्रेतमाक्रोशेत् । न पूर्वोक्तमात्रेण किं त्वधिकमपि यथाभिप्रेषणं कथयेदिति ॥

पश्चिमेनाग्नीध्रीयं बहिर्वेदि परिश्रिते मिथुनौ संभवेतां यौ वर्णौ लभेरन् ॥ १६ ॥

[3]यौ वर्णौ लभेरन्निति[3] सत्त्रिणस्तौ मिथुनौ संभवतः । यदि कश्चिद् ब्राह्मणः ब्राह्मणी च कामवृत्तौ लभ्येते तदा तौ संभवतः । अथ यदि क्षत्रियौ यदि[5] वैश्यौ यदि वा शूद्रौ नात्र वर्णनियम इति ॥

गृहपतेर्दास्यो ऽभीष्टा वा नवानुदहरणान् पूरयित्वा प्रदक्षिणं मार्जालीयं परीयुः हैमहा इदं मध्विदं[7] मधु इति वदन्त्यः ॥ १७ ॥

गृहपतेर्दास्यस्तस्याभीष्टा वा याः काश्चित् कुमार्यो नवानुदकुम्भानद्भिः[8] पूरयित्वा मार्जालीयं परिगच्छेयुः । परिहर्यन्ति इति कल्पान्तरमिति ॥

पञ्चावरार्ध्याः पञ्चशतं परार्ध्याः पञ्चविंशतिर्वा ॥ १८ ॥

स्पष्टमिति ॥

ताभ्यो वीणां वादयेयुः ॥ १९ ॥

तासां दासीनामर्थे ऽपि वीणा वादयेयुः । तदीयनृत्याङ्गत्वेनेत्यर्थः ।

सर्वासु स्रक्तिषु दुन्दुभीनाघ्नीयुः ॥ २० ॥

महावेदेः सर्वासु स्रक्तिष्वित्यर्थः ॥

1 Dcs °क्षिणीयाद्
2 Dc पुं°
3–3 Gb om.; Df repeats these words.
4 Dcs एककाम°
5 DcdGb add वा
6 DfGb नवानुदका°
7 Dcs om., Gb adds इति
8 Dcs om. अद्भिः
9 Gb परिहुल°
10 Gb पर्वीणा
11 Dcs तदीयं नृत्यं नृत्यांग°, Dd तदियं°, Gb तदियं नृत्तानाङ्ग°
12 Dcs °नां

उत्तरोत्तरि वाचो व्याहारयेयुर्यावतीरधिगच्छेयुः ॥ २१ ॥

अस्मिन् स्तोत्रे पूर्वोक्ताः सर्वा वाच उत्तरोत्तरमात्रायुक्ता ब्रूयुः । यावत्यो- च्चैर्मात्रया युक्ता वक्तुं क्षमास्तावत्या मात्रया युक्ता ब्रूयुः । यथा ईमहा इदं मधिदं[2] मधु इत्युत्तरोत्तरमुच्चैर्गानम् । तथा उत्क्रोदं यजमानाः कुर्वते इति शाखान्तरमुत्क्रोदा- दिकर्मुच्चैरुच्चैरिति ॥

घोषांश्च ॥ २२ ॥

दुन्दुभिघोषान् वीणाघोषांश्च सर्वानपि यावतो ऽधिगच्छेयुस्तावतो ऽत्युच्चै- स्तरान् कुर्युरिति ॥ एवं शिल्पान्युक्त्वा तदनुष्ठानकालमाह—

हिंकारमन्वभिगरप्रभृतयः कृत्वा यथार्थं स्युः ॥ २३ ॥

स्तोत्रोपक्रमे हिंकारवेलायामभिगरप्रभृतयः स्वंस्वं कर्म कृत्वा यथार्थं गच्छेयुः । ब्राह्मणो ऽभिगरः पूर्वस्यां [sūtra 1] इत्यारभ्य मैथुनान्तं कर्म [sū. 2] यदुक्तं तत् स्वंस्वं कर्म । तथा संनद्धो राजापि हिंकारवेलायामपि प्रदक्षिणं देवय- जनं परीयीः [10. 2. 13] इति प्रैषार्थं कृत्वा यथार्थं गच्छेदिति ॥

आ स्तोत्रान्तात् कुम्भिन्यः सर्वे च घोषाः ॥ २४ ॥

कुम्भिन्यो दास्यो वीणादुन्दुभिघोषाश्च हिंकारप्रभृति यावत्स्तोत्रसमाप्त्य- नुवर्तेते तेषामुपगानरूपत्वात् । केचित् तु हिंकारात् पूर्वमेव घोषाः आहत दुन्दुभीन् प्रवदन्तु वीणाः [11. 2. 1] इति यथाप्रैषमुपक्रम्य प्रवर्तन्त इत्याहुरिति ॥

॥ तृतीयः खण्डः ॥३॥ ॥७॥

---

अथेदानीं सुपर्णो ऽसि गरुत्मान् [11. 2. 11] इति जपानन्तरं राजनेन पञ्च- विंशेन स्तोतव्यम् । अनाम्नातपर्यायश्च पञ्चविंशस्तोमः । तस्य पर्यायक्लृप्तौ[10] जातिसंहारो[11] [17. 2. 25] युग्मायुक्संहार [17. 1. 27] आवापश्चेति [17.

1 Gb adds अतिवोच्चैस्तरामित्यर्थः
2 Gb om.; Dd adds मधिदं
3 Dce य॰
4 Gb ॰न्तरोक्तमुत्क्रोदादिरु॰
5 Dcdf ॰स्तरां
6 Dd ॰मनु, Gb ॰मेव
7 Ddf ॰याद्
8 Dcdef ॰विश-
9 Ddf स्तोत्रीयं
10 Dce ॰क्लृप्तो
11 Gb सूत्रकारा

1. 3] त्रीन् पक्षान् वर्धमानपटले [pat. 17] वक्ष्यति । दशरात्रिकेभ्य एकया ज्यायःसु [17. 3. 4] इत्यादिना तत्रावापपक्षे कुत्रावाप इत्यपेक्षायामाह—

पञ्चविंशे चतुर्विंशस्तोत्तमे पर्याये परिचरायामावपेदिति[1] गौतमः॥१॥

उत्तमे पर्याये परिचरायां[2] मध्यमायामृच्यावपेत् । मध्यमां द्विर्गायेदित्यर्थः ॥

आवापस्थान इति धानंजय्यः ॥ २ ॥

उत्तमे पर्याये प्रथमायामावापस्थान एवावपेदिति ॥

प्रथमस्यावार्प इति शाण्डिल्यः ॥ ३ ॥

प्रथमस्य पर्यायस्यावापस्थान इत्यर्थः ॥

चतुर्विंशेन वा स्तुत्वा मध्यमामहिंकृतां तृचस्य प्रस्तुयात् ॥ ४ ॥

अथवा चतुर्विंशेन स्तोमेनाविकृतेनैव तृचं समाप्य पुनर्मध्यमामृचं हिंकाररहितां प्रस्तुयात् । प्रस्तुत्य सकृद्गायेदित्यर्थः ॥

स आस्कन्दो नाम ॥ ५ ॥

तस्य बहिःपर्यायगानस्यास्कन्द इति संज्ञा । बहिःपर्यायमास्कन्दनादिति । स्रवनात् संज्ञाकरणं च व्यवहारार्थम् । आस्कन्दं तु गौतमश्चत्वारिंश इति ॥

तं न कुर्यादिति शाण्डिल्यायनः ॥ ६ ॥

न सार्वत्रिको ऽयं निषेधः । आस्कन्दस्य श्रुत्युक्तत्वात् । तेन महाव्रते तमास्कन्दं न कुर्यादित्यर्थः ॥

उत्तमायां स्तोत्रीयायां प्रस्तुतायां पादावुपावहरेत् ॥ ७ ॥

राजनस्य साम्न उत्तमायां प्रस्तुतायामात्मनः पादावुपावहरेदिति ॥

सह निधनेन भूमौ प्रतिष्ठापयेत् ॥ ८ ॥

निधनोच्चारणवेलायां पादौ भूमौ प्रतिष्ठापयेत् । ततः पूर्वमाकाश एव स्थापयेदिति ॥

आह्रियमाणे भक्षे प्रतिलोमैरारोहणीयैरवरुह्य जपेत्—

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ।

पिपृतां नो भरीमभिः ॥

1 Gb परिचाया वापस्थान एवावपेदिति
2 Gb °चाराया
3 Des °चा°
4 Dod add-स्थान( = Lāṭ.)
5 Gb °नैव for °न वा
6 DodGb पर्यार्य

इति ॥ ९ ॥

अध्वर्युभिराह्रियमाणे नाराशंसादिभक्षणे प्रतिलोमैरारोहणमन्त्रैरवरोहेत्। अवरोहन्तु अवरोहामि[1] इति च मन्त्रसंनामः कार्यः। अवरुह्येति विधानादन्यथा मन्त्रलिङ्गविरोधाच्च। तद्यथा—विश्वे त्वा देवा आनुष्टुभेन छन्दसावरोहन्तु तानन्ववैरोहामि इत्युपक्रम्य वसवस्त्वा इत्येवमन्तैः। अवरोहणमन्त्रातिग्राह्यभक्षणमप्युन्नाताहभिः कार्यं स्तुत्वा पृष्ठेन [9.2.11] विषुवद्व्रतयोश्च [9.2.12] इति पूर्वमुक्तत्वादिति[3] ॥

अथ आसीनाः शेषेण स्तुवीरन् ॥ १० ॥

अह्नः शेषेण वामदेव्यप्रभृतिना स्तोत्रेणाथ एवासीनाः स्तुवीरन्। आसन्दीकूर्चान् वर्जयेयुरिति। एवं महाव्रतकथा[4] समाप्ता ॥

अथोदयनीयमतिरात्रं प्रत्याह—

उदयनीये ऽतिरात्रे संस्थिते ऽवभृथमभ्यवेयुः ॥ ११ ॥

सिद्धमेवैतदुत्तरविवक्षार्थं वचनमिति ॥

अनुपमज्जन्तः पाणिभिस्तु संधावेरन् ॥ १२ ॥

अप्सु शिरस उपमज्जनमकुर्वन्तः पाणिभिः शरीरमन्योऽन्यं शोधयेयुरिति ॥

यस्यात्र पत्नी स्यात् पृष्ठं तया व्युद्धावयेत् ॥ १३ ॥

यस्यात्र यजमानस्य पत्नी विद्यते स तया पत्न्या स्वदेहं[6] पृष्ठवंशं शोधयेत्। कर्मव्यतिहारे विशब्दः। पत्न्याश्च देहं[7] यजमानः शोधयेदिति ॥

तानुन्नेतोदानयेत् ॥ १४ ॥

तान् सत्त्रिण उन्नेतावभृथादुदानयेत्। तीरप्रदेशं[7] नयेदिति ॥

उदेत्य गृहपतिः सोमोपनहनं परिदधीत ॥ १५ ॥ अहतानि वसनानीतरे[8] ॥ १६ ॥

स्पष्टं इति ॥

अभ्युक्षणप्रभृति समापयेयुः ॥ १७ ॥

1 Gb °हानि
2 Gb °न्वधि°
3 Gb वचनात् for पूर्वमुक्त°
4 Gb °व्रतकार्या
5-5 Gb आसन्दीकूर्चं अवनम्र वामदेव्यादि स्तुवीरन्.
6 Gb om.
7 Dd °देशं
8 Db वासांसीतरे

अवभृथेष्टौ संस्थितायाम् अवभृथ निचुम्पुण [6.4.8] इत्यभ्युक्षणप्रभृति[1] कर्मशेषं तस्मिन्नहनि समापयेयुरिति ॥

येनेतो गच्छेयुरन्येन[3] प्रत्याव्रजेयुः[4] पाप्मनो व्यतिषङ्गाय ॥ १८ ॥

इतो देवयजनाद् येन पथावभृथं गच्छेयुस्ततो ऽन्येन मार्गेणावभृथात् प्रत्याव्रजेयुः । त्यक्तेन पापेनासंबन्धार्थम् । पूर्वस्मिन् हि[5] मार्गे पाप्मा तिष्ठतीति मन्यत[6] इति ॥

अनूबन्ध्यवपायां[7] हुतायां दक्षिणे वेद्यन्ते केशश्मश्रूणि वापयेत् ॥ १९ ॥

स्पष्टमिति ॥

तस्मिन् संस्थिते प्राञ्च उदञ्चो वा गत्वा पृथगुदगवसानीयाभिरिष्टिभिराहिताग्नयो यजेरन् ॥ २० ॥

तस्मिन्नुदयनीये[8] संस्थिते देवयजनात् प्राञ्च उदञ्चो वा[9] पृथक्पृथगिष्टिभिर्यजेरन्निति ॥

गृहपतिं यजमानमनाहिताग्नय उपासीरन् ॥ २१ ॥

ये पुनरनाहिताग्नयः सत्त्रिणस्तेषामग्न्यभावाद् गृहपतिमुदयनीयेन[10] यजमानमुपासीरन् । अत एव वचनादनाहिताग्नेरपि सत्त्रमस्तीति गम्यते । आश्वलायनो ऽप्याह — दीक्षणायनमीनाम् [4. 1. 10] इति ॥

तद्देवत्यैः स्थालीपाकैर्यजेरन्निति धानंजय्यः ॥ २२ ॥

श्रौताग्न्यभावे ऽप्यौपासनाग्नौ स्थालीपाकैरुदयनीयेष्टिदेवत्यैरनाहिताग्नयो यजेरन्निति ॥

संवत्सरं संवसेयुः[11] ॥ २३ ॥

समासे[12] हि[13] सत्त्रे[14] सत्त्रिणः संवत्सरं सहैकत्र वसेयुरिति ॥

1 Gb adds यदुक्तं
2 Db भिग°
3 Db adds वा
4 Dd adds इति
5 Df om. हि ; Dd puts it after मार्गे
6 Ddf मन्यंत
7 Gb अनु°
8 Gb °न्नुदवसानीये
9 Gb adds गत्वा
10 Gb °मुदसानिया
11 Df om. this sūtra and its com.
12 Reuter समासे
13 Dce पि, Dd वृत्तः पि for हि
14 Dce सत्त्रिणे

द्वादशरात्रमहोरात्रौ वा ॥ २४ ॥

स्पष्टमिति ॥

यावद्वा सुनुयुर्यावद्वा सुनुयुः ॥ २५ ॥

यावन्तं कालं सत्त्रे सुनुयुस्तावन्तं कालम् । त्रयोदशरात्रे समाप्ते त्रयोदशरात्रं संवसेयुः । तथा चतुर्दशरात्रादावपि तावन्तं कालं सह वसेयुरिति ॥

चतुर्थः खण्डः ॥४॥ ॥८॥

एकादशः पटलः ॥११॥

द्राह्यायणकृते सूत्रे[1] दीपे धन्विविनिर्मिते[3] ।
द्वितीये दशके वृत्तः[4] प्रथमः पटलो ऽधुना ॥

1 DbGb °त्रं

2 Gb om.

3 Gb धन्विना च विनिर्मिते

4 Gb दीपे

अथ सर्वयज्ञेषु ब्रह्मत्वं विधातुमुपक्रमते—

सर्वत्र ब्रह्मा दक्षिणतः ॥ १ ॥

सर्वेष्वपि श्रौतस्मार्तेषु कर्मसु ब्रह्मा दक्षिणतो[1] भवेत्। न पुनरुद्गात्रादिवत्। श्रौतेष्वेव ब्रह्मणः प्रवृत्तिरित्यर्थः। तथा[2] तेषु कर्मसु क्रियमाणेषु नित्यं दक्षिणतो भवेदिति। द्वयमप्यत्र विवक्षितमिति ॥

उदङ्मुखः कुर्याद्धोमेभ्यो ऽन्यत् ॥ २ ॥

उपवेशनप्रभृति ब्रह्मणो यत् कृत्यं तत् सर्वं होमव्यतिरिक्तमुदङ्मुख एव कुर्यात्। [3]होमांस्तु प्राङ्मुख एव कुर्यात्[3]। प्राङ्मुखकरणं चानादेश इति सामान्यविधानादिति ॥ प्रथमं पाकयज्ञेषु ब्रह्मत्वं विधास्यन् पाकयज्ञपदं व्याचष्टे—

पाकयज्ञा इत्याचक्षत एकाग्नौ यज्ञान् ॥ ३ ॥

एकाग्निरौपासनः। तत्र क्रियमाणान् यज्ञान् पाकयज्ञा इत्याहुरिति ॥

तेषां होष्यत्सु तूष्णीमुपविशेत् ॥ ४ ॥

तेषामर्थे ब्रह्मणैतत् कृत्यम्। किं तत्। होष्यत्सु कर्तृषु तूष्णीमुपविशेदिति। श्रौतेषु कर्मसु प्रायेण मन्त्रत उपवेशनात् तन्निवृत्त्यर्थमिह तूष्णीमिति वचनम्। यद्वा तूष्णीमिति वाग्यमनविधिरिति ॥

हुते यथार्थं स्यात् ॥ ५ ॥

होमे कृते यथार्थं स्यात्। आसीत वा गच्छेद्वेत्यर्थः ॥

शूलगवे च बलीन् ह्रियमाणाननुगच्छेत् ॥ ६ ॥

शूलगवं[5] नाम गवां पोषणार्थमध्वर्युबह्वृचैरुक्तं कर्मेति ॥

1 Gb om.

2 Dce तेषां

3–3 Dcdef om.

4–4 Dce उपवेशनार्थं नि(De adds य)त्य॰

5 Dce ॰वां

6 Dcdf पोषार्थम॰

निधीयमानानां दक्षिणतः स्थित्वा निहितेष्वप उपस्पृश्यानवेक्ष्यं[2]
प्रत्याव्रजेत् ॥ ७ ॥

निर्धीयमानानां बलीनां दाक्षिणतं इत्यर्थः । अनवेक्षमिति अवेक्षणमकृत्वे-त्यर्थः ॥

तूष्णीं पाकयज्ञे दक्षिणाम् ओम् इति वा प्रतिगृह्णीयात् ॥ ८ ॥

स्पष्टमिति ॥

पशुरेव पशोर्दक्षिणा ॥ ९ ॥

पशुहविषः पाकयज्ञस्याष्टकादेः पशुरेव दक्षिणेति ॥

पूर्णपात्रं स्थालीपाकस्य ॥ १० ॥ उभयोर्यथोत्साहं वा ॥ ११ ॥

स्पष्टे इति ॥

न वितानं पृष्ठतः कुर्वीत ॥ १२ ॥

न वितानं श्रौताग्निविहारदेशं[4] पृष्ठतः कुर्यादिति ॥

येन यज्ञाङ्गेन[5] संयुज्येत तदभ्यावर्तेत ॥ १३ ॥

अध्वर्य्वादिभिः सह कर्मकरणे सति तदानीं येन यज्ञाङ्गेन ब्रह्मा संयुज्यते[6] संयुक्तो भवति तद्यज्ञाङ्गमभ्यावर्तेत[7] । अग्नीन्[8] पृष्ठतः कृत्वापि तदभिमुखः स्यादित्यर्थः ॥

कर्मादिषु सर्वेष्वध्वर्युसंप्रैषमागमयेत्[9] ॥ १४ ॥

कर्मणामुपक्रमेष्वध्वर्युणा प्रार्थनं कारयेत् । अत्र भवता ब्रह्मत्वं कार्यमित्य-ध्वर्युप्रार्थित एव ब्रह्मत्वं कुर्यात् । नान्यथेत्यर्थः ॥

पूर्वया द्वारानादेशे[10] प्रविशेत् ॥ १५ ॥

स्पष्टमिति ॥

अग्न्याधेये दक्षिणया द्वारा प्रपद्य चातुष्प्राश्यं निर्वप्स्यत्सु तूष्णी-
मुपविशेत् ॥ १६ ॥

1 Gb °णास्थां
2 Dbcde °पेक्षं ( = Lāt. )
3 Df om.
4 Dcde °देशे
5 Gb °न्तेन
6 Gb om.
7 Dcde °वर्तेतेति; Dce add आसातः
8 Dce अभि
9 Dcde °गमयेतेति
10 Gb °देशं

अग्न्याधेय इत्यधिकारः। चातुष्प्राश्यं ब्रह्मौदनम्। चत्वारो हि तद् ब्राह्मणाः प्राश्नन्तीति[1]। तन्निशायां निर्वपन्ति। तदानीं वाग्यत उपविशेदिति॥

निरुप्ते यथार्थं स्यात्॥ १७॥

स्पष्टमिति॥

तदुद्धरिष्यत्स्वेवमेव॥ १८॥

तच्चातुष्प्राश्यं ब्रह्मौदनं पात्रेषूद्धरिष्यत्स्वध्वर्युष्वेवमेव तूष्णीमुपविशेदिति॥

तच्चेदनृत्विग्भिः प्राशयेयुस्तण्डुलानादायापविध्येयुः—[3]निष्ट आविद्धं[3] कृन्तानि[4] इति॥ १९॥

यदि[5] चातुष्प्राश्यमृत्विग्व्यतिरिक्तैः कैश्चित् प्राशयेयुरध्वर्यवस्तदा तस्मादोदनादृत्विजस्तण्डुलानादाय बहिर्निरस्येयुः [6]निष्ट आविद्धं[6] इति मन्त्रेण। तस्य चायमर्थः—हे यज्ञ तवाविद्धं शल्यं निष्कृन्तानीति। तस्याविद्धं निरकृन्तन् यवेन संमितम् [TS 2.6.8.3-4] इति तैत्तिरीयकैः प्राशित्रमधिकृत्योक्तम्। तद्वदेतदिति॥

अथान्यान् निदधीरन्॥ २०॥

यतः प्रदेशात् तण्डुलादानं तत्र तण्डुलानन्यान् निदधीरन्निति॥

आधास्यमानस्यारण्योः प्रत्तयोर्यथार्थं स्यात्॥ २१॥

यदि तस्यामेव निशायामाधास्यते यजमानस्तदा तस्य हस्ते ऽध्वर्युणारण्योः प्रत्तयोर्यथार्थं स्यात्। अथ यदि तत ऊर्ध्वं संवत्सरादिकालेष्वग्न्याधानं[10] तदा प्राशनानन्तरमेव यथार्थमिति॥

पूर्वाह्णे दक्षिणेनाग्न्यायतनानि गत्वा यत्राग्निं मन्थिष्यन्तः स्युस्तद्दक्षिणतः निरस्तः परावसुः इति दक्षिणा तृणं निरस्येत् [=4.4.11] आवसोः सदने सीदामि इत्युपविशेत् [=4.4.12]॥ २२॥

यस्मिन् दिवसे ऽग्न्याधानं तस्य दिवसस्य पूर्वाह्ण एव गार्हपत्यस्य संभा[12]

1 Dcd om. इति
2 Dbc °स्तंदु°(=Lāt.). तन्दुल occurs later also, but sporadically.
3-3 DbcdeGb नें(DeGb नि)ष्टाविद्द (=Lāt.)
4 Dd शल्यं कृन्तानि
5 Gb मंत्रेण यदि
6-6 DcdGb नेष्टाविद्द[11] (=Lāt.)
7 Gb निकृ°
8 Gb प्रदत्त°
9 Gb adds इति
10 Dc °ग्न्याधेयान्तमाधानं
11 DcdGb om.
12 Gb संहा°

राहरणकाले गार्हपत्यमन्थनदेशो[1]ऽस्य दक्षिणतो मन्त्रेण निरसनोपवेशने कुर्यात्। संभाराहरणानुसंधानार्थमिति ॥

भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मानुष ओम् इति ॥ २३ ॥

उपविश्य जपेदिति शेषः। जपश्चोपवेशनाङ्गमिति[2] ॥

एतेनोपविशेद्यजुषेति यत्र स्यात् ॥ २४ ॥

यत्रयत्र यजुषोपविशेदिति विधिः स्यात् तत्र सर्वत्रैतेनोपविशेत् निरस्तः परावसुः इत्यादिना मानुषः[3] इत्यन्तेनेति ॥

अग्निं ह्रियमाणमनुगच्छेत् ॥ २५ ॥

गार्हपत्यमग्निं[4] मथित्वा ह्रियमाणमनुगच्छेदिति ॥

निहिते[5] यजुषोपविशेत् ॥ २६ ॥

निहिते आहिते गार्हपत्ये यजुषोपविशेदिति ॥

अत्र प्रथममिति शाण्डिल्यः ॥ २७ ॥

अत्रैव यजुषा प्रथममुपवेशनं न पूर्वाह्णे संभाराहरणकाले मन्थनदेश[7] इति ॥

द्वितीयमिति धानंजय्यः ॥ २८ ॥

पूर्वाह्णे यजुषा प्रथममु[8]पवेशनम्। आहिते गार्हपत्ये द्वितीयं यजुषोपवेशनं कार्यमिति ॥

जाते रथंतरं गायेत् ॥ २९ ॥ वामदेव्यं ह्रियमाणे ॥ ३० ॥ बृहन्निहिते ॥ ३१ ॥

त्रीण्यपि सामानि गार्हपत्याधान[9] एवेति ॥

सर्वाणि तृचेषु मनसा ॥ ३२ ॥

सर्वाण्यपि सामान्यग्न्याधेयविषयाणि मनसैव गायेत्। अरण्येगेयानां[10]

1 Dce °मंथदेश°, Dd °मंथंदेश°, DfGb °मण्डलदेश°
2 Dcd °नाङ्ग इति
3 Dcd मानुष ॐ°, De मानुषोम्
4 Dcd ह्री°
5 Dcde °पत्याग्नि
6 DbGb निधीयमानस्य दक्षिणत स्थित्वा निहिते (= Lāt.)
7 Df मण्डल°, Gb मण्डन°
8 Dcde प्रथमोप°
9 Gb °त्यायतन
10 Dcdef गेयमानानां

तावद् ग्रामे वाचिकगानमयुक्तमिति मानसमेवं शास्त्रार्थः। तथैव ग्रामेगेयानामपि गानम्। शास्त्रार्थस्यैकरूप्यार्थमिति[4] ॥

वाचा वा गायेदिति ह्युक्ते किमन्यद्वाचा प्रतीयेत[5] ॥ २३ ॥

अथवोभयान्यपि वाचैव गायेत्। कुतः। गायेदिति ह्युक्ते वाचा विना किमन्यत् प्रतीयते। वाचेति विनार्थे तृतीया। तेन वाचैव गानमिति ॥

अथापि गानमेवाध्वर्यवे विधीयते न मनसेति ॥ २४ ॥

अध्वर्युब्राह्मणे ऽपि गानमेव विधीयते न मनसेति ॥ पक्षान्तरमाह—

अपि वा रहस्यान्येव मनसा गायेत्। न ह्यरण्येगेयानां ग्रामे गानं[10] विद्यते ॥ २५ ॥

अथवारण्येगेयान्येव मनसा गायेत्। तेषां ग्रामे वाचिकगानस्यायुक्तत्वात्। ग्रामेगेयं तु वाचैव गायेद्दोषाभावादिति ॥

प्रथमोत्तमयोः स्थाने वारवन्तीययज्ञायज्ञीये इति लामकायनः ॥ २६ ॥

प्रथमोत्तमयो रथंतरबृहतोः स्थान इत्यर्थः ॥

पूर्वे कल्पे भूयांसीति शाण्डिल्यः ॥ २७ ॥

पूर्वस्मिन्नेव पक्षे स्थित्वा पुनरप्यधिकानि सामानि शाण्डिल्यो ब्रूत इति[12] ॥ तान्येव दर्शयति—

प्रथमः खण्डः ॥ १ ॥ ॥ ६ ॥

---

मन्थिष्यत्स्वरणी आलभ्य अरण्योः [SV 1. 79] इति गायेत् ॥ १ ॥ मथ्यमाने अग्निं नरः [SV 1. 72, 2. 723] इत्येतयो-

1 Dcd add इति
2 Dcdef ॰गेयमानानाम॰
3 Dcd शास्त्रस्यैक॰
4 Dcde ॰रूप्यादिति
5 Gb om.
6 Dbcef om. हि
7 Gb प्रमियत
8 Dcde om. हि
9 Dd प्रतीयते तेन for विधीयते न
10-10 Dbce गानं ग्रामे; Gb adds गातुं after गानं
11 Gb वाचिकं थार्नजाप्यस्या॰
12 Dcd conclude the section here, Dd adds ॥६॥ द्वादश, De adds द्वादशो

रन्यतरत् ॥ २ ॥ धूम उदिते त्वेषस्ते धूम ऋण्वति [SV I. 83] इति ॥ ३ ॥ प्रज्वलिते अदर्शि गातु [SV 1. 47, 2. 865] इति ॥ ४ ॥ निधीयमाने गवां व्रतं यत् अग्निमीडे [ĀrS 3. 4] इति ॥ ५ ॥

पञ्चस्वपि सूत्रेषु गायेदित्यनुषङ्ग इति । प्रज्वलित इति जननानन्तरमध्वर्युभिः प्रज्वलित इत्यर्थः ॥

तान्युद्गातृकर्मैके ॥ ६ ॥

तानि गानान्युद्गातुरेव कर्म न ब्रह्मण इत्येक इति ॥ कुत इत्यत आह—

उद्गाता सामवेदेन [ŚB 11. 5. 8. 4] इति श्रुतेः ॥ ७ ॥

वेदशब्दो मन्त्रब्राह्मणवचनम् । साममन्त्रैर्यत् कार्यं तत् कर्तृविशेषानादेशे उद्गातैवेति वचनार्थः । तेनाग्न्याधेये सामगानविधौ ब्रह्मणः प्रकृतत्वे ऽप्युद्गातुरेव गानमिति ॥ अत्र दृष्टान्तमाह—

यथा विहव्यसजनीयकयाशुभीयानि होतुः ॥ ८ ॥

यथा प्रकृते ऽप्यौद्गात्रे कर्मणि विहव्यं शस्त्रं सजनीयं शस्त्यमगस्त्यस्य कयाशुभीयं शस्त्यमिति । विहव्यादीनि सूक्तानि होतुरेव शस्त्यानि । ऋग्वेदे होतुः[5] [ŚB 11. 5. 8. 4] इति श्रुतेः । तद्वदत्रापीति ॥

प्रस्तोतुश्च वैराजशाक्वरप्रस्तावाः ॥ ९ ॥

चकारो यथेत्यनुकर्षणार्थः । वैराजे साम्नि ब्राह्मणं प्रस्तावं प्रस्तुत्य विष्टम्भान् विष्टभ्नोति [PB 12. 10. 7] इति । तथा महानाम्नीषु क्षिप्रं प्रस्तुत्य क्षिप्रं गेयम् [PB 13. 4. 11] इति । उभयत्रापि प्रस्तुत्येत्युद्गात्रा समानकर्तृकत्वेऽवगते ऽपि तदनादृत्य प्रस्तोतुरेव प्रस्तावाः । सर्वत्र प्रस्तोता प्रस्तुयादिति सामान्यविधेरभङ्गार्थम् । तद्वदत्रापीति ॥

सर्वैश्चाविधानाद् ब्रह्मत्वकारिभिः ॥ १० ॥

न च ब्रह्मत्वविधायिभिः सूत्रकारैः सर्वैरपि ब्रह्मणो गानं विहितम् । किं तु कतिपयैरेव । तत्र ब्रह्मणो गानपक्षे सर्वैरपि वक्तव्यं स्यादिति ॥

1 Dd om. अतः
2 Df °वाचनं, Gb मंत्रवचनः
3 Dcde °विशेषादनादेशे
4 Gb तेन श्रुतिष्वग्न्या°
5 Gb ऋग्वेदन होता करोति
6 Dbce °री-( = Lat. ), Ddf °रे, Gb °रीः
7 Dcdf °कर्तृकत्वश्च°

कर्मयोगाच्चोद्गातुश्चत्वारो महर्त्विजः प्राश्नन्तीति[1] चातुष्प्राश्यप्राशनम् ॥ ११ ॥

महर्त्विजः प्राश्नन्तीति वचनादुद्गातुरपि ब्रह्मौदनप्राशनम् । तेन तस्याधाने ऽप्यार्त्विज्येन योगो ऽस्ति न च गानं विना तस्यार्त्विज्यमस्तीति । तथा च जैमिनिरुद्गातुरेव गानमाहेति ॥ अथ स्वमतमाह—

अधिकारात् तु ब्रह्मणः ॥ १२ ॥

तुशब्दो मतान्तरनिवृत्त्यर्थः।[2] गानविधौ ब्रह्मणः प्रकृतत्वात् तस्यैव गानमिति[2] ॥

औद्गात्रे चाविधानात् ॥ १३ ॥

यद्युद्गातुरेव गानं स्यात् तदानीमौद्गात्रप्रकरणे विधातव्यम् । न च तदस्तीति॥

दृष्टं चानेन सामगानं ब्रह्मा रथचक्रे ऽभिगायति [PB 18.7.12] इति ॥ १४ ॥

वाजपेये ब्रह्मणश्च[3] गानं दृष्टमिति । न ब्रह्मणो गानविरोध इति ॥

उद्गाता [sū. 7] इति यथाभूयसो[4] वादः ॥ १५ ॥

यः पुनः उद्गाता सामवेदेन [sū. 7] इति वादः स भूयस्त्वानुसारेण द्रष्टव्यः । तस्य गानभूयस्त्वात् । यथाभूयसमिति[5] भूयस्त्वानुसारेणेत्यर्थः ॥

हौत्रे विधेर्विहव्यादीनि ॥ १६ ॥

यत् पुनरुक्तं यथा विहव्यादीनि होतुः [sū. 8] इति तद्युक्तमेव । हौत्रमधिकृत्य बह्वृचब्राह्मणे तेषां विधानात् । सामवेदे ऽपि तद्विधेस्तेनैकवाक्यत्वादिति ॥

स्तोत्रवत् प्रस्तावाः विराट्सु स्तुवन्ति [PB 12. 10. 10] पुरीषेण स्तुवते [PB 13. 4. 12] इति च बहुश्रुतेः ॥ १७ ॥

अथ यदुक्तं यथा[6] च[7] प्रस्तोतुः प्रस्तावा[7] [sū. 9] इति तत्र ब्रूमः । न हि सामान्यविधेस्तत्र प्रस्तोतुरन्वयः । समानकर्तृकत्वा[8]विरोधादेवं । किं तु विराट्सु स्तुवन्ति ॥ पुरीषेण स्तुवते इति च बहुवचनात् प्रस्तोतुस्तत्रान्वयः । समानकर्तृकत्वं

1 Dbcd add ह (=Lāṭ.), Gb adds हि

2-2 Gb श्रुतौ ब्रह्मत्वं विधिं प्रकृत्य तन्मध्ये गानविधानात् ब्रह्मण एव गानश्रुतिश्च सूत्रकारेण दृष्टेन

3 Dcde ब्रह्मणः साम-

4 Da °भूयसा, Gb °भूयः स

5 Dcdef यथाभूयमिति

6 Gb om.; Dcde तथा

7-7 Gb प्रस्तोतुश्च वैराजशाकरीः प्रस्तोता गा

8 Dde °त्वाद् for °त्व-

9 Df adds इति

विवक्षितम्[1] । स्तोत्रवदिति को ऽर्थः । यथा गौरीविते[2] षोडशिना स्तुवीत [PB 12. 13. 13] शाक्लेन तुष्टुवानः [PB 13. 3. 10] मानवेन तुष्टुवानः [PB 13. 3. 15] इत्यादावेकवचनादुद्गातुरेव स्तोत्रे[3] प्राप्ते ऽपि हिरण्यं संप्रदाय षोडशिना स्तुवते[4] [PB 12. 13. 25] इत्यादि बहुवचनात् तत्र[5] प्रस्तोतुरन्वयः । तद्वदत्रापीति ॥

अविधानं विधेर्द्वैधात्[6] ॥ १८ ॥

यत् पुनरुक्तं सर्वैर्ब्रह्मणो गानं विहितं [com. on sū. 10] इति तद्युक्तम् । विधेर्द्वैविध्यात् विकल्पात् । क्वचिच्छाखायां ब्रह्मणो गानं विहितं क्वचिन्निषिद्धम् । तत्र निषेध[7]श्रुतिमाश्रित्य गानं न विहितमिति ॥

यावद्वचनं कर्मयोगः ॥ १९ ॥

यत एव न्यायतो ब्रह्मण एव गानं[8] तेन यावद्वचनं ब्रह्मौदनप्राशनमेवोद्गातुरार्त्विज्यं न गानमिति ॥

हुतायां पूर्णाहुतौ यथार्थं स्यात् ॥ २० ॥

गतमिति[9] ॥

अद्यांश्चेदभिजुहुयुस्तत्र[10] गत्वा तूष्णीमुपविशेत् ॥ २१ ॥

यद्यध्वर्यवो ऽद्याभिहोमं कुर्युस्तदोपविशेदिति ॥

तैर्हुते यथार्थं स्यात् ॥ २२ ॥

अद्यहुते कृत इत्यर्थः ॥

इष्ट्यादिषु सर्वेषु यजुषोपविशेत् पूर्वो यजमानादाहवनीयं प्रति ॥ २३ ॥

अग्न्याधेयेष्टीनामादिष्वारम्भेषु सर्वेषु[11] यजमानस्य पुरस्तादाहवनीयाभिमुखो यजुषोपविशेत् । कः पुनरिष्टीनामारम्भः । यदीदमध्वर्योः कर्मणे वां देवेभ्यः शकेयम् [Āp. 1. 15. 4] इति हस्तप्रक्षालनं कृत एतत् । आपस्तम्बेन उदित

1 Dcde अपेक्षितं
2 Dcde °वितेन
3 Dce om.
4 Gb स्तुवीत
5 Dcd repeat तत्र
6 Daf °द्वैविध्यात्
7 Dce om. निषेध; Ddf निषिद्ध-
8 Dc adds विहितं
9 Gb om.
10 Gb °जुहुयात्तत्र
11 Gb सत्सु

आदित्ये पौर्णमास्यास्तन्वं प्रक्रमयति [1. 15. 1] इत्युक्तत्वादनन्तरं प्रक्षालनविधानात् तथा यजमानस्यापि तदानीमारम्भाभिधानात्। तद्यथा इदं शकेयं यदिदं करोम्यात्मा करोत्वात्मने [Āp. 4. 4. 1] इति। तथा तदानीमेव [l.c.2] ब्रह्मणो वरणं तदासनकल्पनं मन्वत उपवेशनं चापस्तम्बेन विहितमिति ॥

परिध्योर्वा संधिम् ॥ २४ ॥

प्रतीत्यनुवर्तते। दक्षिणपश्चिमयोः परिध्योर्वा संधिमभिमुखं उपविशेदिति ॥

स्रुचां वाग्राणि ॥ २५ ॥ उत्करं वा ॥ २६ ॥

प्रतीत्यनुवर्तत एव ॥

तमन्तरेणाहवनीयं च यजमानस्य संचरो नान्येषाम् ॥ २७ ॥

तं ब्रह्माणमिति ॥

तं यदाध्वर्युर्ब्रूयात् ब्रह्मन्निदं करिष्यामि इति सवितृप्रसूतोऽदः कुरु ॥

भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मानुष ओम् इत्येतेनानुमन्त्रयेत ॥ २८ ॥

ब्रह्मन्नपः प्रणेष्यामि इति ब्रह्मन् प्रोक्षिष्यामि इत्यादेरुपलक्षणं ब्रह्मन्निदं करिष्यामि इति। ओं प्रणय ॥ प्रोक्षं इत्यादेरुपलक्षणं अदः कुरु इति ॥

एतत् सर्वानुमन्त्रणम् ॥ २९ ॥

सर्वानुमन्त्रणमिति संज्ञाकरणं व्यवहारार्थमिति ॥

उच्चैः अदः कुर्वोम् इति ॥ ३० ॥

तस्मिन्ननुमन्त्रणमन्त्रे अदः कुर्वोम् इत्यंशमुच्चैर्ब्रूयादितरदुपांश्विति ॥

प्रणीतासु प्रणीयमानासु वाचं यच्छेदा तासां विमोचनात् ॥ ३१ ॥

स्पष्टमिति ॥ पक्षान्तरमाह—

तास्वेव प्रणीयमानास्वा हविष्कृतः स्तम्बयजुषश्चाघ्या समिधः

1 Dod इत्युक्तत्वात्तदनन्तरं, Gb इत्युक्त्वा तदनन्तरं
2 Dcde add हि
3 Dcde °रम्भावि°
4 Dd करोम्यात्मना
5 Thus Āp. and Dd; other mss, करोम्या°
6 Reuter य°
7 Gb om. अभिमुखः
8 Dce चा°
9 Dd om. ओं
10 Dce ओं प्राह
11 Gb om.
12 Dcdf omit इति; Df °रार्थं for °रार्थ
13 Gb °मु°

प्रस्थानीयाया इति वा ॥ ३२ ॥

प्रणीताप्रणीयमानप्रभृति हविष्कृदेहि इति संप्रैषात् पूर्वं वाग्यमनम्। तथा स्तम्बयजुरारभ्य प्राक् समिदाधानात्। प्रस्थानमनुयाजप्रचारः। तदर्था समित् प्रस्थानीयेति ॥ पक्षान्तरमाह—

यत्र वाध्वर्युबह्वृचौ चेष्टेताम् ॥ ३३ ॥

अध्वर्युबह्वृचयोश्चेष्टायामवश्यं वाग्यमनमिति ॥ किमन्यत्र कामचारो नेत्याह—

यत्र वा न चेष्टेतां वाग्यतः प्रायस्त्वेव स्यात् ॥ ३४ ॥

तयोश्चेष्टाभावे ऽपि प्रायेण वाग्यत एव स्यादिति ॥

द्वितीयः खण्डः ॥२॥ ॥१०॥

---

प्रायश्चित्तं चेत् कर्तव्यं स्यात् भूः स्वाहा इति गार्हपत्ये जुहुयात्। भुवः स्वाहा इति दक्षिणाग्नौ। आग्नीध्रीये सुत्या चेत्। स्वः स्वाहा इत्याहवनीये। भूर्भुवः स्वः स्वाहा इति तत्रैव ॥ १ ॥

मन्त्रस्य कर्मणो वा भ्रेषे सति तत्समाधानं प्रायश्चित्तम्। तत्राविशेषेण त्रिष्वग्निषु होमः। सुत्या चेद्वर्तेत[5] आग्नीध्रीये भुवः स्वाहा इति होम इति ॥

हुत्वा ब्रूयात्—चेष्टताकार्ष्म प्रायश्चित्तम् इति ॥ २ ॥

चेष्टत प्रवर्तध्वं यूयम् अकार्ष्म वयं व्याहृतिहोमेन प्रायश्चित्तमित्यर्थः ॥

अवेलायां चेद्व्याहरेदयज्ञीयं वापद्येतैता एव व्याहृतीरनुप्रेक्षेत ॥३॥

अयज्ञीयं द्विविधं दैवकृतमात्मकृतं च। विहारदेशे कृष्णशकुनिश्वापदादिसंचारो दैवम्। अमेध्यदर्शनं पतितादिसंभाषणादिकं चात्मकृतम्। अनुप्रेक्षणं मनसानुद्रवणम्। तथैव षड्विंशश्रुतेरिति[10] [1.6.7] ॥

1 Dce च
2 Gb om.
3 Dce तत्र विशेषेण, Gb यत्राविशेषेण
4 Dcd त्रिष्वप्यग्निषु
5 Gb adds तदा
6 Dcde add इति
7 Gb दैवकृतं
8 Dce अमेध्यं
9 Gb पतितसं॰
10 Gb ॰श्रुतिरिति

इदं विष्णुः [SV 1.22, 2.1019] इति वर्चम् ॥ ४ ॥

स्पष्टमिति ॥

अमावास्यायां दोहनपवित्रे मार्जयेरन्नापोहिष्ठीयाभिः[1] ॥ ५ ॥

अमावास्यायां दर्शयोगे ऽयज्ञीयोपनिपाते ऽभ्युच्चयविधिरयम् । दोहनपवित्रं दोहनार्थं शाखापवित्रम् । अकाले वाग्विसर्जने ऽयज्ञीयापत्तौ च दोहनपवित्रं[2] हस्ते गृहीत्वापोहिष्ठीयाभिस्तिसृभिर्मार्जनमधिकं[4] कुर्युरिति[5] ॥

बहुवचनात् सर्वे ऽपि कर्मान्विताः कुर्युः ॥ ६ ॥

एवमुत्तरत्रापि बहुवचनप्रयोगे[6] वेद्यमिति ॥

तद्भावे दार्भे ॥ ७ ॥

यदा शाखापवित्रं नास्त्यग्नौ प्रहरणात् तदानीं दर्भमयं पवित्रं कृत्वा तेनैव मार्जनं कार्यमिति ॥

सर्वेष्टिष्विति शाण्डिल्यायनः[7] ॥ ८ ॥

न केवलममावास्यायाम् । सर्वेष्टिष्वपि दर्भमये पवित्रे[8] मार्जनमधिकं[9] कार्यमिति । नन्वग्न्याधेयेष्टयः प्राकृतीः[10] । कथममावास्यायामिष्ट्यन्तरेषु वै[11] विशेषविधिरुच्यते । एतत् सर्वेष्टीनां प्रकृतम् [12.4.4] इत्यतिदेशं वक्ष्यति । तद्बुद्धि[12] कृत्वा विशेषविधिरिति[13] ॥

प्राशित्रमाह्रियमाणं प्रतिमन्त्रयेत—मित्रस्य त्वा चक्षुषा प्रतिपश्यामि इति ॥ ९ ॥

अध्वर्युणा प्राशित्रमाह्रियमाणमिति ॥

अप आचम्य देवस्य त्वा इति प्रतिगृह्णीयात् ॥ १० ॥

स्पष्टमिति ॥

व्यूह्य तृणानि पुरस्ताद्दण्डं सादयेत्—पृथिव्यास्त्वा नाभौ सादयामि

1 Da °हिष्ठीयादिभिः
2 Dcd °त्रि°
Dce °त्रे
4 DdGb om. अधिकं
5 Gb कार्यमिति
6 Gb °योगेन
7 Gb शाण्डिल्यः
8 Dce add कृत्वा
9 Gb om. अधिकं
10 Dce प्रकृतायाः, Ddf प्रकृताः
11 Gb om.
12 Bb तं हृ°
13 Gb विशेषकथनमिति

इति ॥ ११ ॥

अन्तर्वेदि दर्भतृणानि व्यूहेत्यर्थः ॥

अङ्गुष्ठेनानामिकया [1]चादाय अप्रेष्ट्वास्येन प्राश्नामि इति प्राश्नीयात् ॥ १२ ॥

स्पष्टमिति ॥

असंखादं निगिरेत् ॥ १३ ॥

दन्तैः खादनमकुर्वन्नित्यर्थः ॥

अप आचम्योरसि पाणिं निदधीत—इन्द्रस्य त्वा जठरे सादयामि इति ॥ १४ ॥

स्पष्टमिति[2] ॥

प्रक्षाल्य प्राशित्रहरणं तत्र[3] निदध्यात् ॥ १५ ॥

तत्रेति पूर्वोक्तस्थान इति ॥

यथाहृतं वा प्रतिहारयेत् ॥ १६ ॥

स्पष्टमिति ॥

[4]ब्रह्मभागमाहृतमग्रत उप[4]निदधीत ॥ १७ ॥ तमिष्टौ संस्थितायां प्राश्नीयात् ॥ १८ ॥

स्पष्टे इति ॥

अन्वाहार्यमन्तरेण ब्रह्माणं यजमानं चाहरेत् ॥ १९ ॥

[5]अन्वाहार्यमिष्टेर्दक्षिणा । [6]प्रभूतमोदनं[5] पक्त्वान्नं ब्रह्मयजमानावन्तरेणाध्वर्युर्हरेत् ॥

स्वयं चेद् ब्रह्मा यजमानः स्यात् पूर्वेणैनम् ॥ २० ॥

हरेदित्यनुषङ्गः । यदि यजमानः स्वयमेवापत्कल्पेन ब्रह्मा स्यात् तदानीमेनं[7] पूर्वेणान्वाहार्यमाहरेदिति ॥

हृत्वा तमन्तर्वेदि सन्नं तूष्णीमालभेत ॥ २१ ॥

1 Dce वा°
2 Gb om.
3 Dbce तत्रैव
4-4 DcGb ब्रह्मभाग आहृतं तत्रोप°
5-5 Gb अध्वर्युरिति शेषः । अन्वाहार्यपचनमिष्टि दक्षिणाहृतं
6 Dcde om. प्र
7 Gb adds यजमानं

तथो हृत्वाध्वर्युणा वेचां सादितं ब्रह्मा स्पृशेदिति ॥

प्रजापतेर्भागो ऽसि इति[3] ॥ २२ ॥

एतावन्मन्त्र इति ॥

अथापरं प्रजापतेर्भागो ऽस्यूर्जस्वान् पयस्वान् ॥ अक्षितो ऽस्यक्षित्यै त्वा ॥ प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ[5] मे पाहि ॥ ऊर्गस्यूर्जं मयि धेहि इति ॥ २३ ॥

अथापरं मतम्—अनेन मन्त्रेणाभिमृशेदिति ॥

तत्रैव यजमानं वाचयेत्—प्रजापतिं त्वया समचम्भूध्यासम्[6] ॥ आ मा गम्याः ॥ अन्वाहार्यं ददामि[7] ॥ ब्रह्मन् ब्रह्मासि ॥ ब्रह्मणे त्वाहुतार्थ ॥ मा मा हिंसीः ॥ अहुतो मह्यं शिवो भव इति ॥ २४ ॥

तत्रैवान्वाहार्यं यजमानं मथित्वा वाचयेदिति ॥

तृतीयः खण्डः ॥ ३ ॥

---

समिधं प्रस्थानीयामनुमन्त्रयेत—देव सवितरेतत् ते यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ मनो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवास इह मादयन्ताम् इत्युपांशु प्रतिष्ठा इत्युच्चैः । भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मानुषः इत्युपांशु ओम् इत्युच्चैः ॥ १ ॥

प्रस्थानमनुयाजप्रचारः । तदर्थां[9] समिधमनुमन्त्रयेत मानुष इत्यन्तेन मन्त्रेण । तत्र च ओम् इति च प्रतिष्ठा इति चोच्चैर्ब्रूयादितरदुपांश्विति ॥

सर्वानुमन्त्रणेन वा ॥ २ ॥

1 Gb यथा
2 Gb–भिमृ॰
3 Dcde add वा
4 Dcde प्रजापतेर्भागोसीत्येता॰
5 Dbcde ॰दानरूपे (=Lāt.)
6 Reuter समचम्भूध्या सं सम्
7 Db ददाति, Dce ददति, Dd ददानि (=Lāt.)
8 DbceGa ॰राज्य
9 Dce तदर्थं

सर्वानुमन्त्रणमन्त्रः पूर्वमुक्तः [12. 2. 28] । तेन वानुमन्त्रयेते[1] ॥

विमुक्तासु प्रणीतासु समिध आदध्याद्यथावभृथादुदेत्य ॥ ३ ॥

प्रणीताविमोचने कृते ब्रह्मा समिध आदध्यात् । यथावभृथादुदेत्य एधो[2] ऽस्येधिषीमहि [cp. 6. 4. 11] इत्यादिभिर्मन्त्रैः समिदाधानं तद्वदिति ॥

एतत् सर्वेष्टीनां ब्रह्मत्वम् ॥ ४ ॥

एतदुपवेशनप्रभृति समिदाधानान्तं न केवलमाधानेष्टीनां किं तु सर्वेष्टीनामित्यर्थः ॥

समानाहन्येकासने न पुनर्यजुषोपविशेदिति शाण्डिल्यः ॥ ५ ॥

संस्काराणामिष्टिसमाप्तावप्रवृत्तत्वादिष्टिभेदे पुनरपि यजुषोपवेशनमहरासनैक्ये ऽपि कार्यमेवेति[3] स्वपक्षः । शाण्डिल्यस्य तन्नाभिमतमिति ॥

अग्न्याधेयेष्टिषु प्रथमायां यजुषोपविशेदुत्तमायां समिध आदध्यादिति गौतमः ॥ ६ ॥

इष्टिभेदे यद्यपि प्रयाजादिवत् पृथगुपवेशनं प्राप्तं तथाप्यग्न्याधानेष्टीनाम[4]ग्न्यर्थत्वादेकेष्टितुल्यत्वात् सकृदेवादौ मन्त्रत उपवेशनमन्ते समिदाधानं चेति गौतम इति ॥

पृथगिष्टिष्विति धानंजय्यः ॥ ७ ॥

स्पष्टमिति ॥

चातुष्प्राश्यं च प्राश्नन्तु ॥ ८ ॥

चकारो धानंजय्यानुकर्षणार्थः । ऋत्विजः चातुष्प्राश्यं प्राश्नन्तु यजुषोपविशेद् ब्रह्मेति[5] ॥

अग्न्याधेयस्य[6] दक्षिणामाह—

धेनुं दद्याद् ब्रह्मणे ॥ ९ ॥

स्पष्टमिति ॥

अध्वर्यवे चाग्निपदम् ॥ १० ॥

अग्नेराहवनीयस्याधाने यदपेक्षितमश्वादिपदं तदग्निपदम्[7] । तत्सिद्धयर्थो

1 Dede *मंत्रयेताम्
2 Dede *धो
3 Gb न्यायमेवेति
4 Dede तथाग्रा*
5 Dede om, ब्रह्मेति
6 Gb अग्ना*
7 Dede om,

यो ऽश्वादिरानीयते स आंग्निपदो ऽश्वादिरिति ॥

धेनूर्होत्रे वत्सतरीर्ब्रह्मणे ऽनडुहो ऽध्वर्यवे सर्वे त्रिवर्गाः ॥ ११ ॥

त्रिवर्गाः त्रिगुणा इत्यर्थः । तिस्रो धेनूर्होत्रे तिस्रो वत्सतरीर्ब्रह्मणे त्रीनडुहो ऽध्वर्यव इत्युक्तं भवति ॥

पष्ठौहीमाग्नीध्राय ॥ १२ ॥

तदेवं द्वादश दक्षिणाः ॥ अथ साधारणमाह—

सर्वेभ्यो ऽश्वरथं कुण्डले चेति ॥ १३ ॥

एकाश्वरथः कुण्डलद्वयं च सर्वसाधारणमिति ॥

एवमेव धेनुमाग्निपदं चेति शाण्डिल्यः ॥ १४ ॥

पूर्वोक्तमाग्निपदं धेनुं[7] च साधारणमाहेत्यर्थः[8] ॥ अथेष्टीनां[9] दक्षिणामाह—

धेनुमनड्वाहं वत्सतरीं वत्सतरमजं पूर्णपात्रमिति तत् प्रथमायामिष्टौ दद्यात् ॥ १५ ॥

तदिति[10] तद्धेन्वादिषट्कमित्यर्थः ॥

तथोत्तरयोरन्यत्राजपूर्णपात्राभ्याम् ॥ १६ ॥

उत्तरयोरिष्ट्योर्धेन्वादिचतुष्टयमिति ॥ पक्षान्तरमाह—

वरः सप्तमो दक्षिणानां त्रयोदशो वा पञ्चविंशो वा—एतद्वाजसनेयकम् ॥ १७ ॥

अग्न्याधेयस्य सेष्टिकस्य षड् गावो दक्षिणाः । तासां सप्तमो वरः स्यात् । अथवा द्वादश गावः स्युः । त्रयोदशो वरः स्यात् । अथवा चतुर्विंशतिर्गावः । पञ्चविंशो वरः स्यात् । तदेतद्वाजसनेयकमतम् [cp. Kāt. 4. 10. 12] । अत्रापस्तम्बः षड् देया द्वादश देयाश्चतुर्विंशतिर्देयाः [5. 20. 13] इति प्राह[11] विकल्पते[12] इति ॥

1 Dcdef अ॰
2 After सा one leaf is missing in Df. Sūtras 13–20 which are missing here are supplied by a supplementary leaf.
3 Dbce ॰म॰
4 Dcde ॰म॰
5 Dcde om.
6 Gb साधारणशब्दमित्यर्थः
7 Gb अथाग्न्याधेयेष्टीनां
8 Gb om.
9 Daf (supp. folio) अ॰
10 Daf (supp. fol.)Ga इति for एतद्
11 Gb om.; Dcde ता
12 DcdGb ॰ल्पंत, De ॰ल्प्यंत

अग्न्याधेयान्तान् कुर्वते पूर्णाहुतिमद्याभिहोममिष्टीरिति ॥ १८ ॥

अग्न्याधेयस्य त्रीनन्तानध्वर्यवो विकल्पेन कुर्वते । तदानीमिष्ट्यभावे तद्दक्षिणालोप इति ॥

मिथुनौ दक्षिणान्वारम्भणीयायामिष्टौ ॥ १९ ॥

दर्शपूर्णमासयोरारम्भार्थेष्टिरन्वारम्भणीया । तस्यामन्वाहार्यस्थाने मिथुनौ गावौ दक्षिणा । तयोः प्रजापतेर्भागो स्थः इत्यनुमन्त्रणमन्त्रस्योहः [cp. 12. 3. 22] कार्य इति ॥

वाजिनाश्विनघर्माणामृत्विक्षूपहवमिष्ट्वा प्राणभक्षं भक्षयेत् ॥ २० ॥

आश्विनो नाम सौत्रामण्यां कश्चिद् ग्रहः । चातुर्मास्येषु वाजिनं नाम हविः । घर्मः प्रवर्ग्यः । प्राणभक्षो ऽवघ्राणमिति ॥

प्रत्यक्षभक्षं स्वे[3] यज्ञे ॥ २१ ॥

स्पष्टमिति ॥ वाजिनस्य भक्षणमन्त्रमाह—

यन्मे रेतः प्रसिच्यते यद्वा मे ऽपिगच्छति यद्वा जायते पुनस्तेन मा शिवमाविश तेन मा वाजिनं कुरु तस्य ते[4][5] वाजीपीतस्योपहूत उपहूतस्य भक्षयामि इति वाजिनस्य[6] ॥ २२ ॥ ऋतूनां त्वा वाजिनां वाजिनं भक्षयामि इति वा ॥ २३ ॥ उभाभ्यां वोभाभ्यां वा ॥ २४ ॥

स्पष्टानीति[8] ॥ आश्विनघर्मयोस्तु मन्त्रो वक्ष्यत [13.4.8, 14.3.7] इति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ १२ ॥

---

द्वादशः पटलः ॥ १२ ॥[9]

---

1 G त्रीनवसानान॰

2 Gb प्राण॰

3 DaGb स्व-

4 Dbcd om. अ (=Lāt.)

5 Dce add उ

6 DbG वाजि॰

7 Ddf om.

8 Gb स्पष्टमिति

9 Dcde add
द्राह्यायणकृते सूत्रे दीपे धन्विविनिर्मिते ।
द्वितीये दशके वृत्तो द्वितीयः पटलो ऽधुना ॥

ब्रह्मत्वमिदमाधाने सर्वेष्टिषु च दर्शितम् ।
द्वितीये पटले तच्च व्याख्यातं धन्विना स्फुटम् ॥

इति चतुर्थो ऽध्यायः ॥

---

1 Dcde प्रपाठकः (= Lāṭ.)

चातुर्मास्येषु वरुणप्रघासानां स्तम्बयजुर्हरिष्यत्सु यजुषोपवि-
शेत् ॥ १ ॥

चातुर्मास्येष्वित्यधिकारः । चतुर्षुचतुर्षु मासेषु क्रियन्त इति चातुर्मास्यानि । वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाणि चत्वारि[1] पर्वाण्येकतन्त्राणि[2] । आपो दारा इतिवद् वरुणप्रघासा इति नित्यं बहुवचनान्तम् । तेषां स्तम्बयजुर्हरणकाल ऐष्टिकात् [3]प्रथमोपवेशनादधिकमेतदुपवेशनमपूर्वं कार्यम् । तथाध्वर्योर्हस्तप्रक्षालनकाले ऽप्यैष्टिकमुपवेशनं द्वितीयं कार्यमिति ॥

विलिखिते चात्वाले ऽध्वर्युणा सह प्रत्याव्रज्याहवनीयं[4] उपवि-
शेत् ॥ २ ॥

उत्तरवेदिनिर्माणार्थं यस्मादवटान्मृदमाहरन्ति तच्चात्वालम् । तस्मान्मृदाहरणकाले ऽध्वर्युणा[5] सह गत्वा चात्वाले ऽभ्रियां परिलिखिते सति[6] तेनैव सह प्रत्याव्रज्याहवनीयं प्रत्युपविशेत् । ननु । इदानीमाहवनीयो नास्ति उत्तरवेदिकरणोत्तरकालमध्वर्युभिः प्रणयनविधानात् । सत्यम् । अत्र पक्षद्वयमध्वर्युभिरुक्तम् । गार्हपत्यस्य पुरस्ताद् वेदिद्वयं कृत्वा गार्हपत्याद् द्वयोरग्न्योः प्रणयनमित्यापस्तम्बः [8. 5. 4, 22] । आहवनीयस्य पुरस्ताद् वेदिद्वयकरणं[7] ततश्च[8] प्रणयनमिति बोधायनकात्यायनौ [Kat. 5. 3. 9] । तत्र द्वितीयपक्षाश्रयणे नेदं सूत्रम् । तदानीं पूर्वमेवाहवनीयस्य सद्भावादिति ॥

अग्नी प्रणीयमानौ यथैतमनुगच्छेत् ॥ ३ ॥

1 Dede चत्वार्येव
2 Gb पर्वाण्यैष्टिक°
3 Gb om. प्रथम
4 DbedeG °नीयम्
5 Dede °णा
6 Gb om.
7 Des वेदिद्वयकरणे
8 Dede om.

आहवनीयस्य पुरस्ताद् वेदिद्वयं कृत्वा तत एवाहवनीयाद् द्वावग्नी प्रणेयाविति[1] बोधायनकात्यायनौ । तावग्नी यथैतमनुगच्छेत् । येन पथाध्वर्युः प्रणयति तेन तमनुगच्छेत् । येन प्रतिप्रस्थाता तेन तमनुगच्छेदित्यर्थः ॥

अध्वर्युश्चेद् ब्रूयात् ब्रह्मन्नेकस्फ्ययोपसंभिन्द्धि इति स्फ्येनाहवनीयात् पांसूनुपहत्योत्तरस्या वेदेर्दक्षिणादन्तात् कर्षन्नियात् ॥ ४ ॥

एकयत्नेन स्फ्यकृता कर्षणक्रिया एकस्फ्या । तया संभेदनमेकीकरणं सकृदेव पांसूनाहवनीयान्तात् संततमाकृष्य तस्याहवनीयस्य पूर्ववेदिद्वयेन मेलनं कुर्विति प्रैषार्थः । उत्तरस्या वेदेर्दक्षिणमन्तं यावत् पांसून् कर्षन् गच्छेदित्यर्थः । एवं मेलने कृते ऽग्निद्वयमप्येकायतनस्थं कृतं भवेदिति भावः ॥

आ वेदिमध्यादेका चेत् ॥ ५ ॥

यत्र साकमेधपशुबन्धादिषु पूर्वा वेदिरेकैव भवति तदा तन्मध्यं यावत् पांसूनाकर्षन् गच्छेदिति ॥

प्रोह्य स्फ्यं पश्चिमेन वेदीं[2] गत्वा निधीयमानयोरग्न्योस्तूष्णीमुपविशेत् ॥ ६ ॥

प्रोहणमुदसनम् । तत् कृत्वा तयोरग्न्योर्दक्षिणत उपविशेदिति ॥

एतत् कर्माग्निप्रणयनेषु सर्वेषु ॥ ७ ॥

अग्नी प्रणीयमानौ यथैतमनुगच्छेत् [80. 3] इत्यारभ्य यदुक्तं तत् सर्वेष्वग्निप्रणयनेषु स्यादिति ॥

अवभृथन्यङ्गं गच्छत्सु पूर्वेणाग्नी[3] चात्वालं च गच्छेत् ॥ ८ ॥

मुख्यावभृथः सौमिकः । तस्य क्रियास्पर्शो न्यङ्गः । स यत्रास्ति तदवभृथन्यङ्गं तुषनिष्कापप्रतिपादनम् । तत् कर्तुमध्वर्युषु गच्छत्सु पूर्वेण गच्छेदिति ॥

पश्चिमेन वेदीं चात्वालं च स्वे यज्ञे ॥ ९ ॥

स्वे यज्ञे सत्त्रे कुण्डपायिनामयनगतेषु चातुर्मास्येष्टिष्वित्यर्थः ॥

हविर्यज्ञेष्वेष संचर उत्तरेण विहारं कर्मभ्यः ॥ १० ॥

उत्तरेण विहारं यानि कर्माणि क्रियन्ते तदर्थमेष एव संचरः । न तु अपरेणाहवनीयं दक्षिणातिक्रम्य [6.5.3] इत्यापस्तम्बोक्तः संचरो ऽभिप्रेत इति ॥

1 Dcdef प्रयोक्ष्यामिति
2 Dabdf वेदि
3 DfGa °ग्नि
4 Dcde कर्ष°

यथा चात्वाले तथा यूपे शामित्रे च पशौ ॥ ११ ॥

निरूढपशौ यूपशामित्रयोः पुरस्तादेव संचरश्चात्वालवदिति ॥

अवभृथन्यङ्गं प्राप्याभ्युक्षणप्रभृति सौत्यं कर्म समापयेयुः ॥१२॥

अवभृथदेशं गत्वाभ्युक्षणप्रभृति [6. 4. 8] समिदाधानान्तं [6. 4. 11] सुत्यायां यदुक्तं तत् सर्वं कुर्युः । एतदन्तं वरुणप्रघासेषु ब्रह्मत्वम् । बहुवचनं सर्वार्थमिति ॥

साकमेधेषु क्षीरोदनस्य यथार्थं प्राश्नीयात् ॥ १३ ॥

द्व्यहेन साकमेधानुष्ठानम् । पूर्वस्मिन् दिवसे रात्रौ क्षीरोदनो गृहमेधीयः । साकमेधे गृहमेधीयस्य शेषं यथेच्छं प्राश्नीयाद् वा न वेति ॥

यजमानं ब्रूयात्—प्रभूतमन्नं कारय ॥ सुहिता अलंकृता भवतेत्यमात्यान् ब्रूहि ॥ वत्सांश्च मातृभिः सह वासय ॥ १४ ॥

कारय ॥ ब्रूहि ॥ वासय इति त्रयः प्रैषा इति ॥

पूर्वाह्णे ऽध्वर्युः क्षीरोदनमृषभस्य रवथे जुहोति ब्रह्माणमुपवेश्य ॥ १५ ॥

उत्तरेद्युः पूर्वाह्ण ऋषभमानीय तस्य रवथे शब्दे सत्यध्वर्युर्जुहोतीत्यनुवादो ऽयमुत्तरार्थः ॥

ऋषभे ऽरुवति ब्रह्मैव ब्रूयात्—जुहुधि इति ॥ १६ ॥

यद्यृषभो न शब्दं कुर्यात् तदा ब्रह्मैव जुहुधि इति ब्रूयात् । अरुवतीति नञ्समासात् सप्तमीति ॥

तूष्णीं[5] पैतृयज्ञिकायां सर्वं कुर्यात् ॥ १७ ॥

अथ पितृयज्ञिकायामिष्टौ[7] सर्वमुपवेशनादिकं तूष्णीमेव कुर्यादिति ॥

ओम् इत्येवानुमन्त्रयेत ॥ १८ ॥

सर्वानुमन्त्रणमन्त्रे ओम् इत्येतावन्मात्रं ब्रूयादिति ॥

यज्ञोपवीतप्राचीनावीतयोरध्वर्युमनु विदधीत ॥ १९ ॥

1 DfGb निरूढे
2-2 Dede om.
3 Dede वासयेत (=Lāt.), Ga संवासयेत्, Gb वासयेत्
4 DeGb °र्थः
5 Daf add वै
6 G पैतृक°
7 Gb पित्र्यायामिष्टौ

यदाध्वर्युर्यज्ञोपवीती प्राचीनावीती वा स्यात् तदानीं तद्वदेव ब्रह्मापि स्यादिति ॥

तस्या हवींषि निर्वप्स्यत्सु दक्षिणया द्वारा प्रपद्य पश्चात् प्राङ्मुख उपविशेत् ॥ २० ॥

निर्वापदेशस्य पश्चादिति ॥

एवमेव वेदिं गत्वा स्तम्बयजुर्हरिष्यत्सु ॥ २१ ॥

स्तम्बयजुर्हरणदेशस्य पश्चात् प्राङ्मुख इति ॥

आज्यभागयोर्हुतयोर्दक्षिणेनाग्निं परिक्रम्य पुरस्तात् प्रत्यङ्मुख उपविशेद् यजमानश्च ॥ २२ ॥

स्पष्टमिति ॥

प्रथमः खण्डः ॥ १ ॥ ॥१॥

---

हुते स्विष्टकृति यथेतं[1] प्रत्याव्रज्योपविशेताम् ॥ १ ॥

स्पष्टमिति[2] ॥

प्राशित्रमाहृतमुपघ्रायापविध्येत् ॥ २ ॥

आघ्रायोदस्येदिति ॥

आज्यं चेत् प्राशित्रभागादवद्येयुस्तदुपघ्रायाप उपस्पृशेत् ॥ ३ ॥

स्पष्टमिति ॥

इडां च प्रतिगृह्य प्रतिप्रयच्छेत् ॥ ४ ॥

इडाप्रतिग्रहः प्रकृतौ नास्ति । तस्यापूर्वस्य विधिः सर्वा दृष्टार्थे भक्षणाभावादिति ॥

अध्वर्युणा परिषिच्यमाने व्युत्क्रम्य परिषिक्त आहवनीयमुपतिष्ठेरन् ॥ ५ ॥

अध्वर्युणा वेदिपरिषेचने प्रक्रान्ते परिश्रिताया वेदेर्निष्क्रम्य परिषिक्त उपस्थानमिति ॥

1 Ddef om.
2 DboeG यथैतं
3 Dedef om.
4 Daf °दव° for °दुप°
5 Dee सवाः सर्वा

दक्षिणेन दक्षिणाग्निमुत्तरेण दक्षिणाग्निं स्वे[1] यज्ञे ॥ ६ ॥

दक्षिणेन दक्षिणाग्निं स्थित्वाहवनीयमुपतिष्ठेरन् सत्रेषूत्तरेण स्थित्वेति ॥

अक्षन्नमीमदन्त हि [SV 1. 415] इति प्रथमा ।

सुसंदृशं त्वा वयं मघवन् मन्दिषीमहि ।

प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशां अनु योजा न्विन्द्र ते हरी ॥

इति द्वितीया । उपो षु शृणुही[2] गिरः [SV 1. 416] इति तृतीया ॥ ७ ॥

एताभिस्तिसृभिरुपस्थानमिति ॥

तत एवेक्षमाणा गार्हपत्यं

मनो न्वा हुवामहे नाराशंसेन स्तोमेन[3] ।

पितॄणां च मन्मभिः ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः ।

जीवं व्रातं सचेमहि ॥

आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।

ज्योक् च सूर्यं दृशेयम् ॥

इति ॥ ८ ॥

तस्मिन्नेव स्थाने स्थित्वा[4] मनो न्वा हुवामहे इति तिसृभिर्गार्हपत्यमुपतिष्ठेरन्निति ॥

कया नश्चित्र आ भुवत् [SV 1. 169] इत्येकैया दक्षिणाग्निम् ॥ ९ ॥

स्पष्टमिति[5] ॥ पित्र्या समाप्ता ॥

त्रैयम्बका नामापूपा भवन्त्येककपालाः । तेषां यमध्वर्युरास्तूत्कर उपवपेत् तस्मिन्नप उपस्पृशेयुः—

1 Daf स्व·
2 DfG °हि
3 Dbcde सोमेन (=Lāt.)
4 Dcde om.
5 Daf °ष्ट°
6 Gb om.
7 Dcdef have here the figure ॥२॥ denoting thereby the conclusion of this khaṇḍa.

शिवा नः शंतमा भव सुमृडीका सरस्वति ।
मा ते व्योम संदृशि[1] ॥
इति ॥ १० ॥

त्र्यम्बकदेवत्यत्वात् त्रैयम्बका नाम केचनापूपाः पुरोडाशाः । तेषामेकमध्वर्युराखूत्करे निवपति । तस्योपरिष्टादप उपस्पृशेयुरिति[2] ॥

आसीतेतरेषां हूयमान इति धानंजय्यः ॥ ११ ॥

इतरेषां पुरोडाशानां होमे क्रियमाणे आसीतेत्येकमतमिति ॥

तिष्ठेदिति शाण्डिल्यः ॥ १२ ॥

गतमिति[3] ॥

हुते तिष्ठन्तो जपेयुः—अवाम्ब रुद्रमयक्ष्महाव देवं त्र्यम्बकम् । यथा नः श्रेयसः करद् यथा नो वस्यसः[4] करद् यथा नः पशुमतः करद् यथा नो व्यवसाययात् । भेषजमसि भेषजं गवे ऽश्वाय पुरुषाय भेषजं सुगं मेषाय मेष्यै सुभेषजं यथासन् इति ॥ १३ ॥

सर्वेषु हुतेषु तिष्ठन्तो जपेयुरिति ॥

द्वितीयः खण्डः ॥ २ ॥ ॥२॥

---

यजमानस्यामात्या एकैकमपूपमादाय[5] प्रदक्षिणमग्निं परीयुः[6] । तत्र ब्रह्मा परियज्जपेदिति धानंजय्यः ॥ १ ॥

अमात्याश्चतुष्पथ्यमग्निं परियन्ति । तदानीं ब्रह्मापि तमग्निं परिगच्छञ्जपेद् वक्ष्यमाणं मन्त्रमिति ॥

तिष्ठन्निति शाण्डिल्यः ॥ २ ॥

1 Dbd °श (= Lāt.)
2 Gb om. इति ; Dce read °शेयुरित्या न इति मंत्रेणोति
3 Gb om.
4 Dbcde वसीयसः (= Lāt.)
5 Dbcde (and Lāt.) add त्रिः
6 Dcde add इति
7 Dcde उपस्प°

मन्त्रमाह—

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

इति । जामी कुमारी वा या स्यात् पतिकामा सा[1] विपरीयात्[2]—

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।

उर्वारुकमिव बन्धनादितो मुक्षीय ॥

इति ज्ञातीनभिकल्पयेत ॥ ३ ॥

सा कुमारी त्र्यम्बकम् इति मन्त्रं ब्रुवाणा मृत्योर्मुक्षीय इत्यस्य स्थाने इतो मुक्षीय इत्युक्त्वा इतः इत्यनेन पादेन[6] ज्ञातीनभिसंदध्यात् । इतः पितृकुलादित्यर्थः ॥

मामुतः इतीष्टमभिनिर्दिशेदमुष्य गृहादिति ॥ ४ ॥

मामृतात् इत्यस्य स्थाने मामुतः इतीष्टं परिग्रहं निर्दिशेत् । तद्यथा—इतो[7] मुक्षीय मां पत्युर्महादेवस्य गृहात्[7] इति ॥

एवं त्रिः परीत्योदस्येयुः ॥ ५ ॥

एवमग्निं त्रिः परीत्य पुरोडाशानाकाशे हस्ताभ्यामुदस्येयुरमात्या इति ॥

तेषां ब्रह्मैकं लिप्सित्वा यस्य स स्यात् तस्मै प्रयच्छेत् ॥ ६ ॥

तेषामुत्क्षिप्तानां[8] पुरोडाशानामेकमाकाश एव ब्रह्मा स्वहस्तेन प्रतिलभ्य तस्मा एव च पुनः प्रयच्छेद् येनोत्क्षिप्त इति ॥

तस्य वैव सन्तं पाणावालभेत ॥ ७ ॥

अथवा तस्यैव पाणौ सन्तं ब्रह्मा स्पृशेत् । न स्वयमाकाशे गृह्णीयादिति ॥

तथैव त्रिः प्रतिपरीयुः ॥ ८ ॥

तथैव त्रिः प्रसव्यं परीयुरिति[9] ॥

यत्रैनानध्वर्युरासजेत् तत्रोपतिष्ठेरन्—एष ते रुद्र भागस्तेनावसेन

1 Gb om.

2 Gb °र्न्यं

3 Gb पुष्वारु°

4 Dbce पर्यायात्, Gb विपर्य्यादिति

5 Df °र्न्यं

6 Dcf पदेन

7–7 Dce नय मां पुनरिष्टमहान्, Ddf मा पत्युर्नारायणस्य गृहं (Dd महा)

8 Dcdef °मुद्दिष्टानां

9–9 Gb om.

परो मूजवतो ऽतीहि कृत्तिवासाः पिनाकहस्तो ऽवततधन्वोम् इति ॥ ९ ॥

यत्र वृक्षेषु तानध्वर्युरपूपानासजेत् तत्र देवमुपतिष्ठेरन्निति ॥

आ तमितोरुपेयुः ॥ १० ॥

यावत् प्राणस्य समस्तावदनुचङ्क्रमन्तः एष ते रुद्र भागः इति मन्त्रं पुनः पुनरावर्तयन्तो जपेयुरिति ॥

शं नो देवीः [SV 1.33] इत्यप उपस्पृश्यानवेक्षं प्रत्याव्रजेयुः ॥ ११ ॥

स्पष्टमिति ॥

एवं चातुर्मास्येषु ब्रह्मत्वमुक्तम् । शुनासीरीये पर्वणि वैशेषिकाभावान्न किंचिदुक्तम्[1] । अथ यदुक्तं वरुणप्रघासिकं ब्रह्मत्वं तच्चात्वालादिकमस्तु हविर्यज्ञेष्वतिदिश्यत इति ॥

वरुणप्रघासैर्व्याख्यातं ब्रह्मत्वं हविर्यज्ञेषु ॥ १२ ॥

सप्त हविर्यज्ञान् वक्ष्यति । तेषामादित्यश्चतुर्थ्ये तावच्चात्वालाग्निप्रणयनावभृथानामभावाद् ब्रह्मत्वं नातिदेष्टव्यम् । पारिशेष्याच्चात्वालादिमस्तु हविर्यज्ञेष्वतिदिश्यत इति ॥ अथ पशुबन्धेषु वैशेषिकमाह—

पशूनां यूपाहुतिं होष्यत्सु तूष्णीमुपविशेत् ॥ १३ ॥ हुतायां यथार्थं स्यात् ॥ १४ ॥

स्पष्टे इति ॥

वपायां हुतायां इदमापः इति चात्वाले मार्जयित्वा सर्वपशूनां यथार्थं स्यात् ॥ १५ ॥

सर्वेषु पशुषु यागेषु इदमापः इति तृचेन मार्जनं कार्यम् । सर्वपशुग्रहणं पशुविशेषं प्रत्याचार्याणां मार्जने विप्रतिपत्तिर्नास्तीति दर्शयितुमिति ॥

पुरोडाशेन चरिष्यत्सु तूष्णीमुपविशेत् ॥ १६ ॥

स्पष्टमिति[6] ॥

1 Gb तेन for देवं
2 Gb om.
3-3 Gb °भावात्तथोक्तं
4 Gb विशेषप्र°
5-5 Ga पुरोडाशे चरित्वा सु
6 DdfGb om.

आहृतं पुरोडाशमालभ्य ब्रूयात्—प्राश्नन्तु ये प्राशिष्यन्त इति ॥ १७ ॥

पुरोडाशमिडामाहृतामालभ्य ब्रूयात्—ये मद्व्यतिरिक्ताः प्राशिष्यन्ते त एव प्राश्नन्तु नाहमिति । प्रकृतौ ब्रह्मण इडाप्राशनाभावादिति[1] ॥

अनुव्रजेत् सर्वपशूनां पत्नीसंयाजानिति गौतमः ॥ १८ ॥

सर्वेष्वपि पशुयागेषु[2] पत्नीसंयाजान् क्रियमाणाननुव्रजेद् ब्रह्मेति गौतम इति ॥

सवनीयस्यैवेति[3] धानंजय्यः ॥ १९ ॥

गतमिति[4] ॥

न[5] सवनीयस्य चनेति[6] शाण्डिल्यः ॥ २० ॥

चनेति निपाते व्यर्थे सवनीयस्यापि पत्नीसंयाजान्[7] नानुव्रजेदित्यर्थः ॥

हृदयशूलो ऽत्रावभृथन्यङ्गस्थाने भवति ॥ २१ ॥

वरुणप्रघासेषु यदवभृथन्यङ्गमुक्तं तत्स्थाने हृदयशूलोद्वासनमत्र भवतीति ॥

तस्मिन्नप उपस्पृशेयुः—धाम्नोधाम्नो राजंस्ततो वरुण नो मुञ्च । यदापो अघ्न्या वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ सुमित्र्या[8] न आप ओषधयः सन्तु दुर्मित्र्यास्[9]तस्मै सन्तु यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः इति ॥ २२ ॥

हृदयशूलस्योपरिष्टादुपस्पर्शनमिति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ३ ॥

---

अभ्युद्यणप्रभृत्यत ऊर्ध्वम् ॥ १ ॥

1–1 Dcdef om.
2 Dcd °यागेषु
3 Da सवनीयानामेवेति
4 Gb om.
5 Ga om.
6 Gb चैवेति
7 Gb adds क्रियमाणान्
8 Dbcde सुमित्रिया (=Lāt.)
9 Dbcde दुर्मित्रिया° (=Lāt.)

अभ्युक्षणादुपस्पर्शनादूर्ध्वमभ्युक्षणप्रभृति सर्वं सौत्यकर्म कुर्युरिति । तत्रादित्योपस्थानमप्युक्तम् [6. 4. 9] । तदिह न कार्यमित्याह—

आदित्यं नोपतिष्ठेरन् ॥ २ ॥

गतमिति ॥

पूर्णाहुतौ हूयमानायामासित्वा हुतायां यथार्थं स्यात् ॥ ३ ॥

बोधायनमते पूर्णाहुत्यन्तः पशुरिति ॥

सक्तुहोमांश्चेज्जुहुयुरासीतो तेषां होमात् ॥ ४ ॥

सक्तुहोमाश्च पशौ बोधायनेनोक्ताः । तेषामा होमादासित्वा पश्चाद् गमनमिति ॥

सौत्रामण्यां सुराकर्मस्वाव्राजमासीत ॥ ५ ॥

आव्राजमिति णमुल्प्रत्ययान्तः । अध्वर्युणा सुरासंधानादिषु क्रियमाणेष्वाव्रज्याव्रज्येत्यर्थः ॥

तत्र द्वावग्नी अतिप्रणयन्ति । तयोर्दक्षिणत आसीत ॥ ६ ॥

ननु च वरुणप्रघासधर्मातिदेशात् सिद्धमेव द्वयोर्दक्षिणत आसनम् । सत्यम् । पशुबन्धेषु चात्वाले मार्जनानन्तरं यथार्थं स्यात् [13. 3. 15] इत्युक्तम् । तन्मा भूदित्येवमर्थं सूत्रम् । मार्जनानन्तरं कुम्भ्यामासक्तायां पुनरप्यासीत न पुनर्यथार्थं गच्छेदिति ॥

दक्षिणमध्यधि कुम्भ्यामासक्तायां सुराशेषेष्वासिच्यमानेषूपतिष्ठेरन्—

यत् ते पवित्रमर्चिष्यग्ने विततमन्तरा ।

ब्रह्म तेन पुनीहि मा ॥

इति ॥ ७ ॥

दक्षिणमग्निं मथितस्योपरिष्टाच्छतच्छिद्रायां कुम्भ्यां सुराशेषेष्वासिच्यमानेष्वग्नेरुपस्थानं कार्यम् । बहुवचनमध्वर्य्वादेरप्यावश्यकमुपस्थानमिति ॥

अश्विनोर्ग्रहस्य भक्षयेत्—

1 Thus amended. Dcde अभ्युक्षउप°, Df अभ्यु उप°, Gb अभ्युक्ष उप°

2 Thus Dbcde (and Lāt.); other mss. °यासित्वा

3 Dce °देशेन for °देशात्

4 Dbc add शतातृण्णायां

5 Dbdef °न्तरं (= Lāt.)

6 Dcde °च्छिद्रया, DfGb °च्छिद्रया

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियेण ।

इमं तं शुक्रं मधुमन्तमिन्दुं सोमं राजानमिह भक्षयामि ॥

इति[1] ॥ ८ ॥

स्पष्टमिति ॥

यजमानं चेद् वसातिशेषेणाभिषिञ्चेयुरुपोत्थायान्तरेणाग्नी[2] गत्वाध्वर्युणोक्तः संशानानि गायेत् ॥ ९ ॥

यदि पशुरसेन यजमानमभिषिञ्चेयुस्तदा संशानसाम्नां गानमध्वर्युणोक्त इति वचनात् प्रैषाभावे न गायेदिति ॥

पदायपदाय स्तोभेत् ॥ १० ॥

परिसामत्वात् स्वाध्यायवद् गाने प्राप्त इदं वचनमिति ॥

निधनान्युपयन्तो यजमानस्य मूर्धानमालभेरन् ॥ ११ ॥

बहुवचनं सर्वेषामृत्विजां ग्रहणार्थमिति ॥ के पुनः स्तोभाः कानि वा निधनानीत्यत आह—

सं त्वा हिन्वन्ति इत्येतेषां पूर्वःपूर्वः स्तोभ उत्तरं[4] निधनम् ॥ १२ ॥

बृहदिन्द्राय गायत [SV 1. 258] इत्यस्या ऋचः पुरस्तात् सं त्वा हिन्वन्ति धीतिभिः[5] ॥ सं त्वा रिणन्ति धीतिभिः[6] ॥ सं त्वा ततक्षुर्धीतिभिः ॥ सं त्वा शिशन्ति धीतिभिः[7] इति चत्वारि वाक्यानि गीतानि । चतुर्थं वाक्यमुपरिष्टादपि गीतम् । तदितरेषामपि प्रदर्शनार्थम् । तेन तस्यैव गीतिप्रकारेणेतराण्यपि पुरस्तादुपरिष्टाच्च विभज्य गेयानि[8] । ततः औहो[8] वा इत्युपायात् पूर्वःपूर्वो ऽशः स्तोभ उत्तरमुत्तरं संश्रवसे इत्यादि निधनम् । स्तोभनिधनभेदात् सामभेदः । एकरूपमेवार्चिकं गानमिति ॥

श्रवसे इति स्थाने[10] जित्यै इति क्षत्रियस्य पुष्ट्यै इति वैश्यस्येत्येके[11] ॥ १३ ॥

1 Dbcde add भक्षयेत् (=Lāṭ.)

2 DfG °ग्नि

3 Dcd om.

4-4 Ga स्तोभमुत्तरं; Gb repeats उत्तरं

5 Dcdef om.

6 Gb धपी °for गी°

7 Dcdef add इति

8-8 Dcd तत्रोहो

9 Dcd पूर्वांश for पूर्वो ऽशः

10-10 Dbcde श्रवस स्थाने (=Lāṭ.)

11 Dbd वैश्यस्यैके, Gb वैश्यस्य कुर्यादित्येके

संश्रवसे ॥ विश्रवसे ॥ सत्यश्रवसे ॥ श्रवसे इति चत्वारि निधनानि[1]। तत्र श्रवसे इति स्थाने[2] जित्यै इति क्षत्रियस्य यजमानस्य कुर्यात्। पुष्ट्यै इति वैश्यस्य कुर्यात्। तद्यथा—संजित्यै विजित्यै[3] सत्यजित्यै जित्यै इति। [4]संपुष्ट्यै विपुष्ट्यै सत्यपुष्ट्यै पुष्ट्यै इति[4] ॥

द्वे सौत्रामण्यौ कौकिली चरकसौत्रामणी च ॥ १४ ॥

गतमिति[3] ॥

कौकिल्यां सामगानं नेतरस्याम्। संज्ञानानि गायेदिति ह स्माह कौत्सः ॥ १५ ॥

कौकिल्यामेव सामगानं नेतरस्यामिति कौत्सो मन्यते[5] इति ॥ अथ [6]केषु पुनर्हविर्यज्ञेषु[6] ब्रह्मत्वमुक्तं तानाह ॥

सप्त हविर्यज्ञसंस्थाः—अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणी च[3] ॥ १६ ॥

स्पष्टमिति ॥

अग्निहोत्रे ऽपि ब्रह्मा भवतीति[7] सूत्रकारस्य पक्ष इति ॥ इदानीं सुत्यायां[8] ब्रह्मत्वं विधास्यंस्तस्याः [9]संस्थाया भेदाद् ब्रह्मत्वविषयानाह[9] ॥

सप्त सोमसंस्थाः—अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयो ऽतिरात्रो ऽप्तोर्याम इत्यप्तोर्याम इति ॥ १७ ॥

ब्राह्मणेष्वग्निष्टोमादयः शब्दाः संस्थाविशेषवाचिनो न पुनर्विश्वजिदादिशब्दवदेकाहविशेषवाचिन इत्यर्थः। तेनै वाजपेयादिसंशब्देन[10] ब्रह्मत्वं विधीयमानं तत्संस्थाप्रयुक्तं [11]न पुनः क्रतुविशेषप्रयुक्तमिति[11] दर्शितं भवति। केचित् तु संस्थानुक्रमणं तासां नित्यताप्रतिपादनार्थमित्याहुः। तदयुक्तम्। न ह्यनुक्रमणमात्रान्नित्यतासिद्धिरिति ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ ४ ॥

---

1 Dcd स्थानानि

2-2 Dcde श्रवस स्थाने

3 Gb om.

4-4 Gb om.; Dcf om. only सत्यपुष्ट्यै

5 Dcde मित्यमन्यत

6-6 Gb के पुनर्हविर्यज्ञा येषु

7 Dbcde add इति; Ga inserts इति before

8 Gb मवेदिति

9-9 Ddf संस्थाभेदमाह

10 DcdeGb °संशब्देन

11-11 Gb om.

## त्रयोदशः पटलः ॥ १३ ॥

---

इति छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते ।
तृतीयः पटलो वृत्तो हविर्यज्ञा निरूपिताः ॥

अथ सोमयागेषु ब्रह्मत्वं विधातुमारभते—

सुत्यायां ब्रह्मणः प्राक् सुब्रह्मण्याया औद्गात्रेण समानं कर्म ॥ १ ॥

सुत्यायामित्यधिकारः। क्रीते राजनि [cp.1.2.23] सुब्रह्मण्याप्रवृत्तेर्यत् पूर्वमुद्गातुः कर्म तद् ब्रह्मणो[1] ऽपि समानम् । किं पुनस्तत् । महन्मे ऽवोचः इति प्रतिमन्त्रणं[2] [1.1.10] सोमप्रवाकस्य परिवेषणमिति [1.1-12] ॥

ईक्षणाक्रमणे वेदेः ॥ २ ॥

समानमित्यनुवर्तते । पूर्वमुद्गातुः उत्तरं[3] वेद्यन्तमाक्रम्य दक्षिणामीक्षमाणः पितरो भूः इति [1.1.25][4] तदपि ब्रह्मणः समानमित्यर्थः । सुब्रह्मण्याप्रवृत्तेरुद्गातुर्वेदेराक्रमणमिति सूत्रारम्भः । देवो देवमेतु इति मन्त्रेण गमनम्[4] [1.1.23] अप्याक्रमणाङ्गत्वाद् ब्रह्मणः समानमेवेति ॥

संचरधिष्ण्योपस्थानदक्षिणाप्रतिग्रहभक्षाः ॥ ३ ॥

समानमित्येवम् । अन्तरेण चात्वालोत्करौ संचरः [2.1.6] इति यदुक्तं[5] यच्च धिष्ण्योपस्थानं [4.2.1] यच्च दक्षिणाप्रतिग्रहो [5.3.15] यच्च सोमभक्षः [5.1.3] तत् सर्वं समानमिति ॥

स्तोमविमोचनाच्चोर्ध्वमन्यत् सामगानात् ॥ ४ ॥

तृतीयसवने स्तोमविमोचनादूर्ध्वम् [6.3.4] । तदपि समानम् । अवभृथ[6]वर्जमिति [6.4.1] ॥ तत्रौद्गात्रवदौपवसथ्ये ऽहनि गमने प्राप्त [1.1.22] आह—

अनुष्यात् तु दीक्षणीयायाम् ॥ ५ ॥

दीक्षणीयायामिष्टिमनु ब्रह्मा स्यात् । तत्काल एव मन्त्रेण देवयजनं गत्वा-

1 Dcdef °णा
2 Dce मंत्रेण, Ddf मंत्रणं
3 Gb om.
4–4 Df गमनं तत् ब्रह्मणः,
5 Gb adds यदुक्तं
6 Gb adds साम after अवभृथ

वेदेराक्रमणमीक्षणं च कार्यं दीक्षणीयायां ब्रह्मत्वकरणार्थमिति[1] भावः। तदानीं ब्रह्मणो ऽपि मधुपर्काहरणं तु[2] कार्यम् [cp.1.2.1]। मधुपर्कभक्षणं तु शाखान्तरोक्तप्रकारेण ब्रह्मणः कार्यम्। ननु पुनरुद्गातुः प्रकारेणातिदेशाभावादिति ॥

तस्यां संस्थितायामासीता दीक्षणाद् यजमानस्य ॥ ६ ॥

इष्ट्यनन्तरमा दीक्षासमाप्तेरुभावपि न कुत्रचिद् गच्छेताम्। अदीक्षिष्टायं ब्राह्मणः इत्यावेदनात् पूर्वमिति यावदिति ॥

तं यदाध्वर्युर्वाचं यमयेदथ यथार्थं स्यात् ॥ ७ ॥

तं यजमानमित्यर्थः। दीक्षित वाचं यच्छ इत्यध्वर्युप्रैषानन्तरं यथार्थं स्यादिति ॥

महावीरान् संभरिष्यत्सु तूष्णीमुपविशेत् ॥ ८ ॥

दीक्षितासु महावीरान् संभरिष्यति[6] [cp. Kat. 26.1.1] इति कात्यायनसूत्रम्। महावीराः प्रवर्ग्यपात्राणि। तेषां संभरणकाले वाग्यत उपविशेदिति ॥

संभृतेषु यथार्थं स्यात् ॥ ६ ॥

स्पष्टमिति ॥

प्रायणीयायां संस्थितायां[8] पूर्वेण पत्नीशालां तिष्ठेदाभिहोमात् पदस्य राजक्रयण्याः ॥ १० ॥

सोमक्रयण्याः पदाभिहोमं यावत् तिष्ठेदिति ॥

अभिहुत उत्तरेण सोमवहनं गत्वा प्राग् वा पदाभिहोमाद् दक्षिणेन यत्र राजानं क्रेष्यन्तः स्युस्तत्र गत्वा तूष्णीमुपविशेत् ॥ ११ ॥

पदाभिहोमे कृते सोमवहनं शकटमुत्तरेण गत्वा यत्र सोमं क्रेष्यन्तः स्युस्तत्र गत्वोपविशेत्। अथवा पदाभिहोमात् पूर्वमेव सोमवहनं दक्षिणेन गत्वा क्रयदेश उपविशेदिति ॥

क्रीते[10] प्राडुत्क्रामेत् पश्चिमेनैनं हृत्वा राजानमादध्युराहितं पूर्वेण परीत्योह्यमानमनुगच्छेद् दक्षिणेन चेद् गतः स्यात् ॥ १२ ॥

1 Gb ब्रह्मत्वप्रकरणमिति
2 Gb om.
3 Dcdef om.
4 Gb प्रकरणा°
5 Dcd om.
6 Dcde °ष्यंति, Gb °भरेद्
7 Gb संभार°
8 Dbcde add यथेतं निष्क्रम्य (= Lat.)
9 Gb °क्रयिण्याः
10 Gb adds सोमे

यदि पूर्वं सोमवहनं दक्षिणेन ब्रह्मा[1] गतः स्यात् तदा क्रयानन्तरं प्राङ् प्रसर्पेत्। तं पश्चिमेन राजानं हृत्वा शकट आदध्युरध्वर्यवः। अथ ब्रह्मा तमाहितं सोमं पूर्वेण प्रसव्यं[2] परीत्य शकटेनोह्यमानमनुगच्छेदिति ॥

उत्तरेण चेत् क्रीते प्रत्यङ्ङुत्क्रामेत् पूर्वेणैनं हृत्वा राजानमादध्युराहितं पश्चिमेन परीत्योह्यमानमनुगच्छेत् ॥ १३ ॥

यदि[3] सोमवहनमुत्तरेण ब्रह्मा गतः स्यात् तदा क्रयानन्तरं प्रत्यङ् प्रसर्पेत्। गतमन्यदिति ॥

तामेवात्रेषामन्वावर्तेत ॥ १४ ॥

प्राङ्मुखे शकटे वर्तमाने यस्याः पार्श्वेन गतस्तत्पार्श्वेनैवं प्रत्यङ्मुखे शकटे ऽपि[5] गच्छेदित्यर्थः ॥ का पुनरसौ तामाह—

सा हि[6] प्राचीर्वर्तमानस्य दक्षिणेषा भवति ॥ १५ ॥

प्राग्वर्तमानस्य शकटस्य दक्षिणेषा सैवासाविति। दक्षिणेषा पार्श्वेनैवं प्राग्गमनं प्रत्यग्गमनमपीत्यर्थः ॥

विमुक्ते चान्तरेण सोमवहनं पत्नीशालां च दक्षिणोत्[11]क्रम्य तिष्ठेद् दीक्षितश्चेदा राज्ञो ऽपहरणात् ॥ १६ ॥

अनडुहि विमुक्त इत्यर्थः[12] ॥

प्रवेश्यमानं राजानमनुप्रविशेद्व्यवयन्नग्निनौ ॥ १७ ॥

अग्निर्नोहवनीयेन सह सोमस्य व्यवायमकुर्वन् प्राग्वंशं प्रवेश्यमानं राजानमनुप्रविशेदिति ॥

1 Gb om.
2 Gb सर्पेत्
3 Gb adds पूर्वं
4 Gb गतस्तस्याः पार्श्वे
5-5 Dcde पि शकटे
6 Dbcde ह्यस्य
7 Dbcde प्राचिव॰ (=Lāt.)
8 Gb प्राचीव॰
9 DcdGb add चा
10 DbcdGb ॰नैव
11 Dbcdf दक्षिणेनो॰
12 Gb adds अदीक्षित इति पर्युदासः सत्रे दीक्षितस्यातिव्याप्तौ निर्वापानुसंधानार्थमन्तःप्रवेशस्यावश्यंभावात् सत्रादन्यत्र राजरक्षणार्थं तिष्ठेदेवेति
13 Ga ॰द्व्यवयं नाना, Gb ॰द्व्ययं न निनीते
14 DcdeGb अग्निरा॰
15 Gb om. स्य

संबाधं[1] चेत् स्याद् दक्षिणयापि[2] द्वारा प्रविशेत् ॥ १८ ॥

स्पष्टमिति ॥

उत्तरेणाहवनीयं पश्चिमेन वेदिं संचरेद् दीक्षितश्चेत् ॥ १९ ॥

स्पष्टमिति ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ५ ॥

---

आतिथ्यामिष्टिं निर्वपन्ते ॥ १ ॥

अध्वर्यव इति शेषः ॥

तां चेदनपहृते[3] राजनि निर्वपेरन् ब्राह्मणं राजनि समादिश्य तत्र गत्वासीत ॥ २ ॥

यदि राज्ञो ऽपहरणात् पूर्वमेव निर्वपेरन् तदा राजरक्षार्थं[5] कंचिद् ब्राह्मणं समादिश्यान्तः प्रविशेदिति ॥

तस्यां संस्थितायां तानूनप्त्रमाज्यमवमृशन्तो जपेयुः—हविरसि वैश्वानरम् । अनाधृष्टमस्यनाधृष्यं देवानामोजो ऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम् । अञ्जसा सत्यमुपगेषं सुविते मा धाः इति ॥ ३ ॥

ऋत्विजामन्योन्यद्रोहपरिहाराय यद् घृतं स्पृश्यते तत् तानूनप्त्रम् । तत् सर्वे ऽप्युद्गातारो ब्रह्मा चावमृश्य जपेयुरिति ॥

अप उपस्पृश्याध्वर्युणोक्तो राजानं विस्रंसयेत्[6] ॥ ४ ॥ तं हिरण्यमन्तर्धायाभिमृशेयुः—अंशुरंशुष्टे [7]देव सोमाप्यायतामिन्द्रायैकधनविदे । आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व । आप्याययास्मान् सखीन् सन्या मेधया । स्वस्ति ते[7] देव सोम

1 Dbcde संबधः

2 Gb om. अपि

3 DbcdG °पहृते (=Lāt.)

4 Dbcd व°

5 Gb °रक्षणार्थं

6 Dabcd विस्रंभयेत् (=Lāt.), Df विश्रंभयेत्. Cp. Reuter's note on X. 2. 13. Gb has the following commentary on this sūtra: सोमोंऽशुं विस्रंसयेत् आप्यायनायेति.

7–7 Gb om.

सुत्यामुदृचमशीय इति ॥ ५ ॥

स्पष्टे इति[1] ॥

काशमये प्रस्तरे निह्नुवीरन्[2] दक्षिणान् पाणीनुत्तानान् कृत्वा सव्यान् नीचैः[3]—एष्टा रायं एष्टा वामानि प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे[4] नमः पृथिव्यै इति ॥ ६ ॥

निह्नवो नमस्कारः। कृते हि नमस्कारे पुरुषस्य दोषश्छादितो भवतीति। तदुपायत्वान्निह्नव इत्युच्यते। तथा च ब्राह्मणम्—न वै देवा नमस्कारमति। यज्ञो वै नमस्कारः इति। आतिथ्यासंबन्धिनि काशमये प्रस्तरे दक्षिणान् पाणीनुत्तानान् निधाय तत उपरि सव्यान् नीचः कुर्युः। सो ऽयं नमस्काराञ्जलिरिति ॥

सुब्रह्मण्यास्वाहूयमानासु दक्षिणोत्क्रम्य तिष्ठेद् दीक्षितश्चेत् ॥ ७ ॥

आहूतासु यथार्थं स्यात् ॥ ८ ॥

स्पष्टे इति[1] ॥

उपसदिष्टिरत ऊर्ध्वं तस्यां तथैवाभिमर्शननिह्नवने ॥ ९ ॥

तस्यामुपसदि संस्थितायां तथैव हिरण्यमन्तर्धाय सोमाभिमर्शननिह्नवने कुर्युरिति ॥

सव्या अपराह्ण उत्तानाः स्युर्दक्षिणा न्यञ्चः ॥ १० ॥

आपराह्णिक्यामुपसदि सव्याः पाणय उत्तानाः स्युर्दक्षिणाः पाणयो न्यञ्चः स्युरिति ॥ कः पुनरुपसदन्तो[8] यत्र निह्नवः[9]। तमाह—

स्रुवेणोपसद्धोमे हुते विद्यात् संस्थितेति ॥ ११ ॥

त्वेषं वचो अपावधीर्मे इत्यध्वर्युणा हुते संस्थितेति विद्यादिति ॥

तस्या घर्मः प्रवर्ग्यवति पूर्वस्तमभीन्धिष्यत्सु ॥ १२ ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ ६ ॥

---

1–1 Gb om.
2 Df निह्नुवीयात्
3 Ga सव्यान्यञ्च
4 Ga repeats नमो दिवे
5 Gb तदुपायं नि॰
6 Gb ॰णं च
7 DefGb om. अ
8 Dede ॰सदोन्तो
9 Gb निह्नवनः
10 Dd ॰धीद्
11 Ga ॰मभिसंबोध्यत्

गार्हपत्यं गत्वा यजुषोपविशेद् दक्षिणेन ॥ १ ॥

प्रवर्ग्यवति क्रतौ तस्या उपसदिष्टेः पूर्वः[1] प्रवर्ग्यो भवति । तमभीन्धिष्यत्स्वध्वर्युषु गार्हपत्यं गत्वा तस्य दक्षिणत उपविशेदिति ॥

दक्षिणाग्निमुत्तरेण वहिश्चेत् ॥ २ ॥

यदि गार्हपत्यायतनाद् बहिः प्रवर्ग्यः स्यात् तदानीं[3] दक्षिणाग्निमुत्तरेणोपविशेदिति ॥

रुचितो घर्मः [cp. 2. 2. 28] इत्युक्ते ऽनुवाकेन तिष्ठन्तो ऽवेक्षेरन् यमध्वर्युर्ब्रूयात् ॥ ३ ॥

रुचितो घर्मः इत्यध्वर्युणोक्ते अपश्यं गोपाम् इति यमनुवाकमध्वर्युर्ब्रूयात् तेनानुवाकेन महावीरमवेक्षेरन्ननुज्ञातारो ब्रह्मा चेति ॥

तं ह्रियमाणं यथेतमनुव्रजञ्जपेत्—

विश्वा आशा दक्षिणसत् सर्वान् देवानयाडिह ।

स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥

इति ॥ ४ ॥

तं घर्मं ह्रियमाणं यथेतमनुव्रजञ्जपेदिति ॥

आश्राविते उपविश्य जपेत्—

अश्विना घर्मं पातं हार्द्विानमहर्दिवाभिरूतिभिः ।

तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥

इति ॥ ५ ॥ हुते यजमानं वाचयेत्—

अपातामश्विना घर्ममनु द्यावापृथिवी अमंसाताम् ।

इहैव रातयः सन्तु ॥

इति ॥ ६ ॥

1 Dcd पूर्वं
2 Gb यजुषेप॰
3 Gb तदा
4 Ga तनानु॰
5 Gb ॰मनुवांचेर॰
6 DfG यथैत॰

घर्मशेषस्य भक्षयेत्—मधु हुतमिन्द्रतमे ऽग्नावश्याम ते देव घर्म नमस्ते ऽस्तु मा मा हिंसीः इति ॥ ७ ॥

स्पष्टानीति ॥

सत्त्रं चेत् स्यात् यजमाना उपह्वयध्वम् इत्येवोपह्वानम् ॥ ८ ॥

सत्त्रव्यतिरिक्तेषु होतरुपह्वयस्वाध्वर्य उपह्वयस्व इति कर्मनामधेयेनोपह्वानं कार्यं वाजिनाश्विनघर्माणामृत्विग्भूपह्वमिष्ट्वा [12.4.20] इति वचनादिति ॥

एवं सदा प्रवर्ग्योपसदः कुर्यात् ॥ ९ ॥ महावेदेः स्तम्बयजुर्हरिष्यत्सु यजुषोपविशेत् ॥ १० ॥ विलिखिते चात्वाले यथार्थं स्यात् ॥ ११ ॥ उत्तरवेदिं निर्वप्स्यत्सु तूष्णीमुपविशेत् । न्युप्तायां यथार्थं स्यात् ॥ १२ ॥

स्पष्टानीति ॥

अग्निचित्यायां प्राग्दीक्षणीयायाः सावित्रान् होमान् होष्यत्सु यजुषोपविशेत् ॥ १३ ॥

अग्निचित्यायामित्यधिकारः । यदि क्रतावग्निचित्या स्यात् तदेत्यर्थः अनुष्यात्तु दीक्षणीयायाम् [14.1.5] इति वचनात् । साग्निचित्ये ऽपि सोमयागे दीक्षणीयाप्रभृत्येव ब्रह्मत्वमिति शङ्का स्यात् तन्निवृत्त्यर्थं प्रागपि दीक्षणीयायाः सावित्रेषूपविशेत् । सावित्रहोमस्त्वेक एवेत्यापस्तम्बः [cp. 15. 9. 3] । होमानिति बहुवचनं कस्यांचिच्छाखायां होमबहुत्वादिति ॥

तेषु हुतेषूख्यां मृत्तिकामाह्रियमाणामनुगच्छेत् ॥ १४ ॥ तस्यां ह्रियमाणायामासित्वा संभृतायां यथार्थं स्यात् ॥ १५ ॥

स्पष्ट इति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ७ ॥

1 Dce °पा°
2 Gb स्मृति° for सत्त्र°
3 Gb om. कर्म
4 Daf °सदोः
5 Ddf (sec. m.) निव°
6 Gb निरुप्ता°
7 Gb °याः
8 Df °यां
9 1 Dce तेषूपविशेत्, Ddf सत्रेषूपविशेत्, Gb सावित्रेषूपविशेदित्युक्तमिति
10 Da (first hand) संहांय°, Dbcde संभ्रिय° (= Lāt.)
11 Da संह°

आहवनीयं चेष्यत्सु यजुषोपविशेत् ॥ १ ॥

आहवनीयः शालामुखीयः । तस्यायतनमिष्टकाभिश्चेष्यत्स्वित्यर्थ[1] इति ॥

तस्मिन् संचित उख्यामासन्दीं नैर्ऋतीश्चेष्टका अरण्यं ह्रियमाणा अनुगच्छेत् ॥ २ ॥

तस्मिन् शालामुखीये ऽध्वर्युणा चिते सत्युख्याग्निर्यत्रासन्द्याः पूर्वं निहितस्तामुख्यां निधा[2]नभूतामासन्दीं नैर्ऋतीश्चेष्टका[3] ऽरण्यं प्रति ह्रियमाणा अनुगच्छेदिति ॥

निधीयमानानां दक्षिणतः स्थित्वा निहितास्वप उपस्पृश्यानपेक्षं[4] प्रत्याव्रजेत् ॥ ३ ॥

स्पष्टमिति ॥

अग्निं विकृक्ष्यत्सु[5] सर्वौषधं च वप्स्यत्सु तत्र गत्वा तूष्णीमुपविशेत् ॥ ४ ॥

महावेद्यामग्निक्षेत्रस्य कर्षणं तत्र बीजावपनं[6] च करिष्यत्स्वित्यर्थः ॥

तैः सार्धं प्रत्याव्रज्य चितीः प्रणीयमाना अनुगच्छेत् ॥ ५ ॥

चितीश्चयनार्था[7] इष्टकाः प्रणीयमाना इत्यर्थः ॥

निधीयमानानां दक्षिणतः स्थित्वा निहितासु दक्षिणस्य पक्षस्यासन्नो यजुषोपविशेत् ॥ ६ ॥

उपधीयमानानामिष्टकानां तस्यास्तस्यां दक्षिणतः स्थित्वा सर्वासु समाप्तासु दक्षिणस्य पक्षस्य दक्षिणतः संनिकृष्ट उपविशेदिति ॥

लोकंपृणास्वु[9]पधीयमानासु ब्राह्मणं[10] तत्र समादिश्य यथार्थं स्या-

1 Df °श्चेष्यन्नित्यर्थः, Gb °श्चेष्यत्सु सत्स्वित्यर्थः
2 Gb निध°
3 Gb नैर्ऋतीारण्काश्च
4 G °पेक्षं
5 Df विकृम्यत्सु, Ga विकर्वन् सु, Gb विकृष्यत्सु
6 Dcdef °वापनं, Gb °वापं
7 Dd °नार्थं
8 Gb om.
9 Da नि° for उप°
10 Da ब्राह्मणं

दिति शाण्डिल्यः ॥ ७ ॥ आसीतैवेति धानंजय्यः ॥ ८ ॥

स्पष्टे इति ॥

एवं सदा चितिषु कुर्यात् ॥ ९ ॥

एवं पञ्चस्वपि चितिषु कुर्यादिति ॥

संचितकर्माणि करिष्यत्स्वाग्नेजमासीत ॥ १० ॥

वसवस्त्वा रुद्रैः पुरस्तात् पान्तु इत्याज्यप्रोक्षणप्रभृति[3] मण्डूकविकर्षणान्तानि संचितकर्माणि[4]। तेष्वाव्रज्यासीतेति ॥ एतदन्तमग्निचित्यानिमित्तं ब्रह्मत्वमिति ॥

सम्राडासन्दीं ह्रियमाणामनुगच्छेत् ॥ ११ ॥

प्रवर्ग्योद्वासनकालं[5] इति शेषः ॥

निधीयमानायां[6] दक्षिणतः स्थित्वा परिषिच्यमाने ऽप उपस्पृश्य तैः सार्धं प्रत्याव्रज्याग्निं प्रणीयमानमनुगच्छेद[7]प्रतिरथं जपन् ॥ १२ ॥

घर्मे परिषिच्यमाने ऽप उपस्पृश्य तैः सार्धं प्रत्याव्रज्य सौमिकमग्निं प्रणीयमानम् आशुः शिशानः[8] [SV 2. 1199] इति सूक्तमप्रतिरथसंज्ञकमध्वर्युप्रसिद्धं जपन्ननुगच्छेदिति ॥

तूष्णीमनग्निचित्या चेत् ॥ १३ ॥

अग्निचित्याभावे तूष्णीमनुगमनं न सूक्तजप इति ॥

निधीयमानस्य दक्षिणतः स्थित्वा निहिते दक्षिणा बहिर्वेदि यजुषोपविशेत् ॥ १४ ॥

अग्निनिधानानन्तरमग्निवर्त्युत्तरं परिग्राहं परिगृह्णातीत्यध्वर्युभिरुत्तरेण परिग्राहो विहितः। तत्काले न केनचिदप्यन्तर्वेदि स्थातव्यमित्यभिप्रायेण बहि-

1 Ga संनिहित॰
2 DfG ॰व॰
3 Gb ॰प्रोक्षणं प्रति
4 Gb adds आध्वर्यवाणि
5 Gb प्रवर्ग्योद्वास
6 Dbcde ॰नानां
7 Gb प्रणीयमानमनुमंत्रयते। प्र॰
8 Gb adds वृषभ
9 Gb ॰धानान्तमग्नीत्तु॰
10 DcdeGb ॰गृह्णामीत्य॰
11 Gb adds ॰वेदि-



46571

वेद्युपविशेदित्युक्तमिति ॥

हविर्धाने प्रवर्त्यमानेऽनुगच्छेत् ॥ १५ ॥

स्पष्टमिति[4] ॥

परिवार्यमाणयोस्तत्रैव गत्वासीत ॥ १६ ॥ उच्छ्रितायामौदुम्बर्यां यथार्थं स्यात् ॥ १७ ॥ वेदिकर्मप्रभृति वाग्नीषोमप्रणयनात् प्रणयनाद् ॥ १८ ॥

अथवाग्निप्रणयनानन्तरं यद् वेदिकर्मोत्तरं परिग्राहस्तत्प्रभृत्यग्नीषोमप्रणयनात् पूर्वं यथार्थं ब्रह्मा स्यात् । तथोक्तं ब्रह्मत्वं कुर्याद् वा न वेत्यर्थः ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ ८ ॥

---

## चतुर्दशः पटलः ॥ १४ ॥

---

धन्विना रोपिते दीपे ब्रह्मत्वस्य विधिं प्रति ।
चतुर्थे पटले त्वर्थं सोमयागस्य कीर्तितम् ॥

1 Dcs °वैंदुपवेशनमित्यु°, Dd °वेंदिरित्युपवेशनमित्यु°

2 Gb adds हविर्धाने इति द्विवचनमप्यर्युक्ता प्रवर्त्यमाने शकटे इति

3 Gb adds the comment परिवारणं कटादिभिः परिश्रयणमिति

4 Gb adds the comment स्पष्टमिति. 16 and 17 are one sūtra in Dc, while Ddf om. them.

5 Da वाग्नीषोमीय°

6 DaGb repeat प्रणयनात्

7 Gb यथा°

8-8 Gb हविर्धानप्रवर्तनकर्मानुसंधानं

अग्नीषोमौ प्रणेष्यत्सु वेदिमाक्रामेन्मन्त्रेण ॥ १ ॥

कः पुनर्मन्त्रः कथं वाक्रमणमत आह—

पश्चिमेनोत्तरवेदिमुदङ्ङतिक्रम्याक्रमणयजुर्जपेत् ॥ २ ॥

मृदा शिथिरा देवानां तीर्थम् [cp.3.1.2] इत्युद्गातॄणां यदाक्रमणयजुरुक्तं[2] तज्ज-पेदिति ॥

चात्वालसमीपे दीक्षितश्चेत् ॥ ३ ॥

स्पष्टमिति ॥

तूष्णीमत ऊर्ध्वं वेदेराक्रमणम् ॥ ४ ॥

सवनमुखेषु च यजुषाहरहरिति गौतमः [3.1.4-5] यावद्वाक्रामेयुरित्येके [3.1.7] इति सूत्रद्वयेन सर्वेषु वेद्याक्रमणेषूद्गातॄणां[3] पुनःपुनर्मन्त्रो विहितः । ब्रह्मणस्तु तन्निवृत्तये[4] तूष्णीमिति[5] वचनमिति[6] ॥

क्रीत्वा राजा येनातिहृतः स्यात् तेन गत्वा तूष्णीमुपविशेत् ॥ ५ ॥

येन मार्गेण सोमं क्रीतमतिहरन्ति तेन गत्वान्तः प्रविश्याध्वर्युप्रभृतीनां दक्षिणेनोत्तरेण वा गत्वापरेणाहवनीयं दक्षिणातिक्रम्योपविशेदिति ॥

राजानं हर इत्युक्तः पूर्वेणाग्निमेकस्मा अतिप्रदाय तान् प्रसव्यं परीत्यादायानुगच्छेद् दक्षिणेन चेद् गतः स्यात् ॥ ६ ॥

यदि राजानं हर इत्यध्वर्युरेनं ब्रूयात् तदा प्रणीयमानमग्निं पूर्वेण सोमं

1 Da °मुदङ्निष्क°
2 Gb यदाक्रमणे उक्तं
3 Gb वेदानुक्र°
4 Gb तत्तन्निवर्तयेत्
5 Dode तूष्णी°
6 Gb om.

कस्यचिद्धस्ते प्रदाय तानध्वर्युप्रभृतीन् प्रसव्यं परीत्य सोममादाय तान् गच्छतो ऽनुगच्छेद् यदि दाक्षिणेन तान् प्रविष्टः स्यादिति ॥

उत्तरेण चेद् यथेतं[2] परीत्यादायानुगच्छेत् ॥ ७ ॥

यद्यध्वर्युप्रभृतीनुत्तरेण गतः स्यात् तदा यथागतं प्रदक्षिणं परीत्यानुगच्छेदिति ॥

अन्येन चेद् ब्रह्मा व्रजितः स्यादन्येन राजा तेनैनं प्रतिगृह्णीयात् ॥ ८ ॥ उत्तरेण विहारं[4] पश्चिमेन वेदिं संचरेद् दीक्षितश्चेत्[5] ॥ ९ ॥

पूर्वमुक्तं यदि तेन पथा ब्रह्मा गतः स्यात् ततो ऽन्येन मार्गेण सोमस्तदापि राजानं हर इति चोदितः प्रत्याव्रज्य राज्ञो मार्गेणैव राजानमाददीतापरेणाहवनीयं दक्षिणातिक्रम्येत्यर्थः[6] ॥

स एव हि[7] राज्ञः पन्था अध्वर्युभिरुक्तः ॥ १० ॥ एतौ त्वेव ब्रह्मणो गतिकल्पावहरतो ऽपि ॥ ११ ॥

राज्ञो हरणमकुर्वतो ऽपि ब्रह्मण एतावेव गतिकल्पौ भवतः । तान् प्रसव्यं परीत्य [sū. 6] इत्येकः कल्पः । यथेतं परीत्य [sū. 7] इत्यपर इति ॥

आसीताग्नीध्रीय आहुत्योर्हूयमानयोरिति धानंजय्यस्तिष्ठेदिति शाण्डिल्यः ॥ १२ ॥

आग्नीध्रीयाहवनीययोर्द्वे वैसर्जनाहुती स्तः । तयोर्हूयमानयोराग्नीध्रीय एवासीत तिष्ठेद् वेति ॥

उत्तरेणाग्नीध्रीयं राजानमाज्यानि च ह्रियमाणान्यनुगच्छेत् ॥ १३ ॥

तयोर्हुतयोः पुनरपि[11] राजानमग्नीषोमीयपश्वर्थानि चैाज्यान्यनुगच्छेदिति ॥

1 Gb om. सोमं
2 Ga यथैतं; Dbcde (and Lāṭ.) add अपि
3 Ga प्रव॰
4–4 Gb उत्तरेणाहवनीयं
5 DbGa (and Lāṭ.) om. sūtras 9,10.
6 Gb ॰क्रमेणेत्यर्थः
7 Dcde om.
8 Dcde वहरण॰
9 Gb गमनक॰
10 Dbcd ह्रौ॰
11 Gb adds ह्रियमाणानि
12 Gb om. च

प्रवेशितेषु हविर्धानं पश्चिमेन गत्वासीतेति गौतमः ॥ १४ ॥

पूर्वेणेति धानंजय्यो दक्षिणस्य द्वारबाहोः पुरस्ताद् यजुषोपविशेत्[1] ॥ १५ ॥

स्पष्टे इति ॥

अग्नीषोमीयवपायां हुतायां यथेतम्[2] उदङ्ङतिक्रम्य चात्वाले मार्जयेत्[3] ॥ १६ ॥

मार्जनं सिद्धमेव[4] [13. 3. 15] । यथेतमित्येतत्त्वद्विधेयमिति ॥

एवमेवापररात्र आज्येषु प्रविष्टेषूपवेशनम् ॥ १७ ॥

अपररात्रे सवनीयपशोराज्येषु प्रविष्टेष्वेवमेवोपवेशनं कार्यम् । हविर्धानं पश्चिमेन पूर्वेण वा गत्वेत्यर्थः ॥

मार्जनं च ॥ १८ ॥

प्रथमः खण्डः ॥ १ ॥ ॥ ६ ॥

---

सवनीयवपायां हुतायाम् ॥ १ ॥

एवमेवेत्यनुवर्तत इति ॥

पुरोडाशेन चरिष्यत्सु तूष्णीमुपविशेत् ॥ २ ॥

अग्नीषोमीयस्य पशुपुरोडाशेनेत्यर्थः ॥

दीक्षितश्चेत् सर्वा इडा अन्वारभेत ॥ ३ ॥

स्पष्टमिति[5] ॥

वसतीवरीषु परि[6]ह्रियमाणासु दक्षिणोत्क्रम्य तिष्ठेददीक्षितश्चेदा तासां परिहरणात् ॥ ४ ॥

अदीक्षितो बहिर्वेदि दक्षिणोत्क्रम्य तिष्ठेदिति ॥

1 G यजुषेति (=Lat.)
2 G यथैत°
3 Daf °त्
4 Gb सर्वपशूनां पूर्वमुक्तमेव for सिद्धमेव
5 Gb om.
6 Daf om. परि

आग्नीध्रीयं राजानं ह्रियमाणमनुगच्छेत् ॥ ५ ॥

वसतीवरीहरणोत्तरमाग्नीध्रीयं प्रति सोमं ह्रियमाणमनुगच्छेदिति । ननु चापस्तम्बादिभिः सोमस्य हरणं नोक्तम् । सत्यम् । अत एव विधानादन्यैः कैश्चिदुक्तमिति । कल्पसामर्थ्यसिद्धं चैतत् । कथम् । ऋत्विजो यजमानश्चाग्नीध्रीये हि वसन्ति यजमानो राजानं गोपयतीति विहितम् । ततश्च सामर्थ्यसिद्धं हरणमिति ॥

दीक्षितश्चेत् तत्रैव संविशेत् ॥ ६ ॥

स्पष्टमिति ॥

अपररात्र आज्यानि ग्रहीष्यतः पूर्वेण गत्वाग्निं च पश्चिमेन वा यजुषोपविशेत् ॥ ७ ॥

सवनीयपश्वर्थान्याज्यानि ग्रहीष्यतोऽध्वर्योराग्नीध्रीयमग्निं च पूर्वेण पश्चिमेन वा गत्वोपविशेदिति ॥

आत्तेषु प्राङुत्क्रम्य प्रसव्यं परीत्यानुगच्छेत् पूर्वेण चेद् गतः स्यात् ॥ ८ ॥

आत्तेष्वाज्येषु प्राङुत्क्रम्य तानध्वर्यून् प्रसव्यं परीत्यानुगच्छेदिति ॥

पश्चिमेन चेद् यथेतं परीत्यानुगच्छेत् ॥ ९ ॥

यद्याज्यग्रहणकाले पश्चिमेनोपविष्टस्तदा प्रदक्षिणं परिगमनमिति ॥

प्रवेशितेषूपविशेत् ॥ १० ॥

हविर्धानमाज्येषु प्रवेशितेष्वित्यर्थः ॥

आज्येष्वेव ग्रहीष्यमाणेष्वत्रोपविशेदिति शाण्डिल्यः ॥ ११ ॥

आज्यग्रहणवेलायामेवाग्नीध्रीयान्निष्क्रम्य हविर्धानस्य पश्चिमेन पूर्वेण वोपविशेदिति ॥

अध्वर्युणोक्तो वाचं यच्छेदा तृतीयं प्रातरनुवाकस्य ॥ १२ ॥

1 Dbc ह्रीय°
2 Dcd °हरणानन्तरमा°, Gb वसतीवरीपरिहरणाग्रहणानन्तरमा°
3 Dcde om.
4 Gb om.
5 Gb adds च
6 Dadf om.
7 Ga संवसेत्
8 G यथेतं ; Dbcde (and Lat.) add अग्नि
9 Gb om. यदि
10 Daf गृह्णमा°
11 Gb °काले for °वेलायां

प्रातरनुवाकस्य प्रथमायास्तृतीयं यद् वचनम् आ तस्माद् वाग्यतः स्यादिति । अथवा आ तृतीयमित्या तृतीयाया ऋच इत्यर्थः ॥

आ वा परिधानीयायाः ॥ १३ ॥

अथवा प्रातरनुवाकस्य परिधानीयान्तं वाग्यतः स्यादिति ॥

आ वोपांश्वन्तर्यामयोर्होमात् ॥ १४ ॥

स्पष्टमिति[1] ॥

आ वा बहिष्पवमानात् ॥ १५ ॥

प्रातरनुवाकप्रभृति बहिष्पवमानपर्यन्तं इति ॥

हविर्धानं चेत् पूर्वेण गतः स्यादुपांश्वन्तर्यामौ होष्यत्सूदक्कृतिक्रम्य तिष्ठेत् ॥ १६ ॥

यदि[3] हविर्धानं पश्चिमेनोपविष्टस्तदोपांश्वन्तर्यामयोर्होमकाले स्थानं न कार्यमिति[5] ॥

दीक्षितश्चेदा तयोर्होमात् ॥ १७ ॥

दीक्षितस्य ब्रह्मणो होमसमाप्ति यावत् स्थानं न कार्यमिति ॥

निःसर्पत्स्वन्वारभेत ॥ १८ ॥

बहिष्पवमानार्थं हविर्धानान्निःसर्पत्स्वध्वर्य्वादिषु प्रतिहर्तारमन्वारभेत ब्रह्मा । तद् पूर्वमेव [3. 3. 12] सूत्रकृतोक्तमिति ॥

तस्य प्रस्तोत्रा समानं कर्म प्रागुपवेशनात् ॥ १९ ॥

प्रवृत्तैहोमादिकर्म [cp. 3. 3.17] तस्य प्रस्तोत्रा समानमुपवेशनवर्ज[8]मिति ।

आस्तावं प्राप्यानासन्नो यजुषोपविशेत् प्रस्तोतारं प्रति ॥ २० ॥

बहिष्पवमानस्तुतिदेशं प्राप्योद्गातृभ्यः किंचिद् विप्रकृष्टः प्रस्तोतारमभिमुखो यजुषोपविशेदिति [cp. 2. 4. 20] ॥

द्वितीयः खण्डः ॥ २ ॥ ॥ १० ॥

---

1 Gb om.
2 DdGb °न्तम्
3 Dee यदा
4 Dee पूर्वेण प्रविष्ट°
5–5 Gb न्याय्यमिति
6 Gb सत्रेषु दीक्षितस्य तु
7 Dede प्रकृत°
8 Dedef(first hand) om. वर्जं

रश्मिरसि [PB 1. 9, 10] इत्येतावनुवाकौ स्तोमभागाः ॥ १ ॥

तस्मा एतान् स्तोमभागानब्रवीत् [PB 15. 5. 24] इति ब्राह्मणे स्तोमभाग-पदेन रश्मिरसि इत्यादयः समाख्यायन्त इत्यर्थः ॥ समाख्याप्रयोजनं च वक्ष्याम इति ॥

तैः पृथगनुपूर्वं स्तोत्राण्यनुमन्त्रयेत ब्रह्मन् स्तोष्यामः प्रशास्तः इत्युक्तः ॥ २ ॥

बहिष्पवमानादीनि स्तोत्राण्यतिरिक्तस्तोत्रपर्यन्तानि त्रयस्त्रिंशत् तानि। तैः स्तोमभागैस्तावत्संख्यैः क्रमेण पृथगनुमन्त्रयेत ॥ तत्र विशेषं वक्ष्याम इति ॥

ऊर्ध्वं प्रथमाद् रात्रिपर्यायाद् यत्र स्यात् अमुष्मै त्वा इति तं जिन्व इति तत्र[1] ब्रूयात् ॥ ३ ॥

प्रथमाद् रात्रिपर्यायादूर्ध्वं स्तोमभागेषु यत्रयत्र[2] अमुष्मै त्वा इति पदद्वय-मस्ति। अमुष्मा इति चतुर्थ्यन्तानां पदानामुपलक्षणम्। तत्र पदद्वयानन्तरमध्यय-नाभावे ऽपि तं जिन्व इति ब्रूयात्[3]। तमिति द्वितीयान्ततया प्रयोज्यानां त्रिवृदादि-पदानामुपलक्षणम्। तेनैवं प्रयोगः—त्रिवृदसि त्रिवृते त्वा त्रिवृतं जिन्व। [4]प्रवृदसि प्रवृते त्वा प्रवृतं जिन्व[4] इति ॥

सवितृप्रसूता बृहस्पतये स्तुत इत्येकैकस्यान्तः ॥ ४ ॥

तेषु सवितृप्रसूता [5]बृहस्पतये स्तुत[5] इति प्रत्येकमनुषञ्जनीयमिति ॥

पूर्वेषां च ॥ ५ ॥

पूर्वेषां रश्मिरसि इत्यादीनां विंशतिमन्त्राणामपि [PB 1. 9. 1-12, 10. 1-8] सवितृप्रसूता[6] इत्येवान्तः[7]। नन्वध्ययनसिद्धमेवैतन्न वक्तव्यम्। सत्यम्। वक्ष्यमाण-विकल्पदर्शनार्थमनुवादो मन्त्रपरिमाणज्ञानार्थं[8] चेति ॥

भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं [9]मानुष ओम्[9] [cp. 12. 2. 28] इत्ये-तद् वाधिकं कुर्यादोंकारं वा ॥ ६ ॥

सवितृप्रसूता बृहस्पतये स्तुत इत्यस्यानन्तरमधिकं निवेशयेद् विकल्पेनेति[10] ॥

1 Gb तद्
2 Dee यत्र only once; Gb यथा
3 Gb adds पूर्वेषु तथाध्ययनात्
4-4 Gb om.
5-5 Ded om.
6 Gb adds बृहस्पतये स्तुत
7 Gb इत्येव मन्त्रान्तः
8 Gb मन्त्रमोच्चार्थं
9-9 De मानुषोम्
10 Gb इति मन्त्रस्या°

यथाम्नायं संधेरनुमन्त्रयेत ॥ ७ ॥

वसुको ऽसि [PB 1. 10. 11] इत्यादिसंधिस्तोत्रानुमन्त्रणमविकृतमेवेति ॥ मतान्तरमाह—

त्रेधं विभजेदिति[1] धानंजय्यः —वसुको ऽसि वस्यष्टिरसि वेषश्रीरसि । वसुकाय त्वा वस्यष्ट्यै त्वा वेषश्रियै त्वा । वसुकं[3] जिन्व वस्यष्टिं जिन्व वेषश्रियं जिन्व । सवितृप्रसूता बृहस्पतये स्तुत इति ॥ ८ ॥

वसुको ऽसि वसुकाय त्वा वसुकं जिन्व इत्येवमर्थः[4] संबन्धः । सो ऽयमेको विभाग एवमुत्तरावपीति[5] ॥

स्तुत देवेन सवित्रा प्रसूताः इत्यनुमन्त्रयेत मानसं वाजपेये च बृहत् ॥ ९ ॥

अविवाक्ये दशमे ऽहनि मानसं स्तोत्रं वाजपेये च बृहदुत्तमं स्तोत्रं स्तुत देवेन इत्येवानुमन्त्रयेतेति ॥

आनन्तर्येणेतराणि ॥ १० ॥

इतराणि मानसवाजपेयान्त्यव्यतिरिक्तानि[7] सर्वसंस्थासु संहत्य त्रयस्त्रिंशदेव स्तोत्राणि तानि त्रयस्त्रिंशता स्तोमभागैः[8] क्रमेणानुमन्त्रयेत । ननु च । अत्यग्निष्टोममेकमधिकमस्ति[9] । तत् कथं त्रयस्त्रिंशत् स्तोत्राणि । उच्यते । उक्थ्यानन्तरमुत्पन्नस्य षोडशिनः[10] स्तोत्रस्य तत्रापकृष्य प्रयोगमात्रं न पुनरपूर्वं स्तोत्रान्तरमस्तीति ॥ अथ नैमित्तिकेषु स्तोत्रेषु कथमनुमन्त्रणमत आह—

ईध्राद् स्तोत्राणि पूर्वेण तद्वृद्धैः[11] ॥ ११ ॥

ईध्रशब्दो निमित्तवचनः । निमित्तं च सोमातिरेकः । यदि प्रातःसवनात् सोमो ऽतिरिच्येत [PB 9. 7. 1] इति ब्राह्मणेन[12] निमित्तान्यन्यानि[13] विहितानि । पूर्वेण

1 Dbcde °भजेतेति
2 Gb adds इति, thus making this a separate sūtra.
3 Ga वसुन्, Gb वसुर्
4 Dcd °मर्थतः
5 Gb °मुत्तरत्रापीति
6 Gb इत्यनु°
7 Dce °पेयोन्त्यानि व्य°, Gb °पेयव्य°
8 Dcde स्तोत्रभागैः, Gb स्तोमविभागैः
9 Gb अत्यग्निष्टोमे स्तोत्रमेकमस्ति
10–10 Gb °मुक्तस्य वपनस्य षोडशि-
11 DbcdeGa तद्विवृद्धैः (=Lāṭ.)
12 Gb ब्राह्मणे
13 Gb निमित्तायानि

पूर्वस्तोत्रस्य स्तोमभागेनानुमन्त्रयेत नित्यस्तोत्रस्य वृद्धिमात्रत्वात् तस्येति[2] ॥

परेण वा तन्निकामनात् ॥ १२ ॥

पश्चाद्भाविना वा स्तोमभागेनानुमन्त्रणम् । कुतः । माध्यन्दिनं वा एष सवनं निकामयमानो ऽभ्यतिरिच्यते [PB 9. 7. 2] इतीतरस्य[3] माध्यन्दिनादेर्निकामनश्रवणात्[4] । निकामनमिच्छेति ॥

मानसवद् वातिरिक्तसामान्यात् ॥ १३ ॥

अथवा[5] मानसस्तोत्रवदनुमन्त्रणमतिरिक्त[6]त्वसामान्यात् । अग्निष्टोमादतिरिक्तं हि मानसम् । नैमित्तिकमपि नित्यादतिरिक्तमिति ॥

सर्वानुमन्त्रणेन वानुक्तत्वात् ॥ १४ ॥

अथवा यः[7] पूर्वमिष्टिप्रकरणे सर्वानुमन्त्रणसंज्ञको मन्त्र उक्तस्तेन वानुमन्त्रणमन्यस्यानुक्तत्वादिति ॥

यद्यत् स्तोत्रं लुप्येत सहैव[8] स्तोमभागेन ॥ १५ ॥

यदि पर्यासानभिव्युच्छेत् सर्वेभ्य एकं संभरेयुः [6. 6. 1] इत्याश्वलायनोक्ते संभार[9]पक्षे यानि स्तोत्राणि लुप्तानि यश्च षोडशी वैकल्पिकत्वाल्लुप्यते तानि स्वकीयैः स्तोमभागैः सहैव लुप्यन्ते । न तैः शिष्टानुमन्त्रणं कार्यं क्रमसंख्याभ्यां नियतत्वात् स्तोमभागानाम्[10] । स्तोत्रस्यासाधारणो भागः स्तोमभाग इति हि[11] समाख्या । एतदेव हि समाख्याप्रयोजनम् । ननु च । प्रधानलोपे गुणलोपो न्याय्य एवेति । न वक्तव्यमित्येतत् । सत्यम् । आपस्तम्बस्तु सप्तदश वाजपेये [11. 10. 13] इति वदन् तं नियमं मन्यते तदनिष्टमिति दर्शयितुमेतदुक्तमिति ॥

स्तुते बहिष्पवमाने[12] वपायां हुतायां मार्जयित्वा धिष्ण्यानुपस्थायोक्तं सदस्युपवेशनम् ॥ १६ ॥

दक्षिणार्धे तु सदसः पूर्वमुपवेशनम् [4. 4. 9] इत्यादि षट्पटल्यामुक्तमनुसंधे-

1 Gb स्तोत्र°
2-2 Gb °स्तोत्रवृद्धिमात्रत्वात् नैमित्तिकस्येति भावः
3 Dcde विद्र°
4 Gb इति परस्य
5 Dcs अथ
6 Gb °रिक्तस्य
7 Gb यत्
8 Df संह°
9 Dcd संभरण°, Def संहरण°
10 Gb adds हि
11 DeeGb om.
12 Dd °मानेन (=Lāt.); Dbcde (and Lāt) add तत्रैव गत्वासीत

यमिति[1] ॥

स्तुतशस्त्रयोर्वाचं यच्छेत्[2] ॥ १७ ॥

स्पष्टमिति[3] ॥

अनूच्यमाने च सर्वत्र ॥ १८ ॥

सर्वेषु[4] पुरोनुवाक्यामनोतानुवचनेषु वाग्यमनमिति ॥

वषट्कृते विसृजेत्[5] ॥ १९ ॥

स्पष्टमिति ॥

अवभृथादुदेत्यानुष्याद् यज्ञशेषम् ॥ २० ॥

यज्ञशेषमन्वासीतेत्यर्थः ॥

अहर्गणेष्वेनं सदातिप्रैषेण प्रशास्ता वाचं यमयति राजानं रक्ष इति चाह तदुभयं कुर्यादा वसतीवरीणां परिहरणात्[6] ॥ २१ ॥

प्रशास्ता मैत्रावरुणः स एनमतुप्रैषेणाश्वलायनोक्तेन हारियोजनप्रचारानन्तरं वाचं यमयति—ब्रह्मन् वाचं यच्छ [Āśv. 6.11.16] इति ॥

तद् सत्रे पर्यायेण कुर्युरहीने तु ब्रह्मैव ॥ २२ ॥

सत्रेषु यजमानाः पर्यायेण तदुभयं कुर्युः । प्रथमे दिवसे कश्चिद् द्वितीये ऽपर इत्येवम् । अहीने तु ब्रह्मैव प्रतिदिवसमुभयं कुर्यादिति ॥

तृतीयः खण्डः ॥ ३ ॥ ॥ ११ ॥

---

वाजपेये पृष्ठ्यस्य स्तोत्रमनुमन्त्र्य सदस्यं ब्रह्मासने उपवेश्य निष्क्रामेत् ॥ १ ॥ पूर्वेणाग्नीध्रीयं स्थूणा निखाता स्यात् ॥ २ ॥

अध्वर्युणेति शेषः ॥

1 Dd adds ॥११॥ thus ending the section here (= Lāṭ.).

2-2 Gb °शस्त्रवपायां वाचं यच्छेयुरिति

3 Gb om.

4 Deda सर्वत्रेति सर्वेषु

5 Dbed °जेत (= Lāṭ.)

6 Ga °हरणान्तम्

7 Ded एनमति°

8-8 Gb °यनोक्तहारियोज°

9 Gb om. अहीने तु ब्रह्मैव

10 Gb om.; Deda सत्रे तु

11 Gb °सनम्

दक्षिणेन मार्जालीयमन्तर्वेदीति शाण्डिल्यः ॥ ३ ॥ तस्यामौदुम्बरं सप्तदशारं रथचक्रं प्रतिमुक्तं स्यात् ॥ ४ ॥

[1]स्पष्टे इति[1] ॥

तदभावे यत् किंचिद् रथचक्रम् ॥ ५ ॥

उदुम्बराभावे यदेव किंचिद् रथचक्रं सप्तदशारं स्थूणायां प्रतिमुक्तं स्यादिति ॥

तस्मिन् बाहू आदध्यात्—देवस्याहं सवितुः प्रसवे सत्यसवसो बृहस्पतेर्वाजिनो वाजजितो वर्षिष्ठमधि नाकं रुहेयम् इति ॥ ६ ॥

तस्मिन् रथचक्रे[5] बाहू आदध्यान्मन्त्रेणेति ॥

रथेष्वाजिं धावत्सु आविर्मर्याः इति गायेदाकारमुद्गीथादौ लुप्त्वा तस्य स्थाने प्रत्याहृत्य अक्षरम् अग्मन् इति ॥ ७ ॥

लक्षणमुद्दिश्य रथेषु धावत्सु साम गायेत् । आ वाजं वाजिनो अग्मन् इत्युद्गीथादावाकारमुपसर्गं लोपयित्वा तस्य स्थाने अग्मन्निति अक्षरं प्रत्याहृत्य गायेत् अग्मन्वाजं वाजिनः इति[8] । किमर्थः पुनराल्लोपः । गमनकाले मन्त्रेण गमनमेव प्रतिपादनीयं न पुनरागमनमिति लोप उक्त इति ॥

गतेषु वा ॥ ८ ॥

अथवा रथेषु लक्ष्यं प्रतिगतेष्वेव गायेन्न धावत्सु अग्मन् इति भूतनिर्देशविरोधादिति ॥

यथाधीतमाधावत्सु ॥ ९ ॥

प्रत्यागच्छत्सु रथेषु यथाधीतमाकारमलुप्त्वैव गायेत् तस्यागमनाभिरूपत्वादिति ॥

आहृतेषु[11] वा ॥ १० ॥

1-1 Gb om.
2 DbdGb किन (= Lāt.)
3 Da (sec. m.) °श°, Df(?)Ga °थ°
4 Ga वरिविष्ठमधि, Gb वर्षिष्ठे अधि
5 Gb adds ब्रह्मा
6 Dcd नि°
7 Df अक्षमु°, Gb लक्षमु°
8 Gb adds आविर्मर्या इति
9 In Dd the rest of the patala is missing.
10 Df ends here.
11 Dbc °ह°, Gb °हु°

आगेतेष्वेव गायेद् भूतनिर्देशादेवेति ॥

सर्वत्र वां यथाधीतम् ॥ ११ ॥

गमने चागमने चेत्यर्थः । सर्वथापि द्विरेव गानमिति परिवर्तयन् गायेदिति ॥

गानकाले रथचक्रं बाहुभ्यां प्रदक्षिणं परिवर्तयन् गायेत् ॥१२॥

परिवर्त्य[5] गायेद् गीत्वा वा परिवर्तयेत् ॥ १३ ॥

अथवा परिवर्तनात् पूर्वकालमुत्तरकालं वा गानं न सकालमिति ॥

गायतो वान्यस्तं[6] परिवर्तयेत् ॥ १४ ॥

ब्रह्मणि गायति सति रथचक्रमन्यः परिवर्तयेदिति ॥

उदङ्ङवरोहं मन्येत—विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि इति ॥ १५ ॥

उदङ्मुखो भूत्वा रथचक्रादवरूढमात्मानं मन्येत । अत एव गम्यते न प्रत्यक्षेणारोहणमवरोहणं वेति ॥

अभिदक्षिणमावृत्य सदः प्रविशेत् ॥ १६ ॥

स्पष्टमिति[7] ॥

तत्रासीनो हिरण्यस्थालं[8] मधु च नाना प्रतिगृह्णीयात् ॥ १७ ॥

हिरण्यस्थालं मधुना पूर्णं ब्रह्मणे [24. 3. 27] दद्यादिति वाजपेये वक्ष्यति । तत्र स्थालस्य प्राधान्यात् तस्यैव मन्त्रेण प्रतिग्रहो न मधुन इति शङ्कानिवृत्त्यर्थं नानेति वचनमिति ॥

ऋतपेये च दक्षिणां चमसम् ॥ १८ ॥

ऋतपेये क्रतौ सोमचमसो दक्षिणा [PB 18. 2. 10] इति ब्राह्मणम् । तत्रापि सोमरसं तत्पात्रं च दक्षिणाभूतं पृथगेव प्रतिगृह्णीयादिति ॥

ब्राह्मणाय मधु दद्यान्निदधीत हिरण्यम् ॥ १९ ॥

आत्मार्थमेव हिरण्यस्थालं निदधीतेति ॥

1 Dcc आह॰
2 Ga om.
3 Gb सर्वत्रा॰
4-4 DbGa (and Lāt.) om., Da om. प्रदक्षिणं परिवर्तयन् गायेत्
5 Gb adds वा
6 Da वान्यस्तत्, DbGa वान्यं, Gb वान्यः (=Lāt.)
7 Gb om.
8 DbG हिरण्यं (=Lāt.)
9 Gb हिरण्यं हिरण्य॰
10 Dcc ब्राह्मणे

त्रिष्टुप्छन्दसा सर्वभक्षं चमसं भक्षयेत् ॥ २० ॥

सोमचमसस्य दक्षिणार्थत्वादप्राप्तमेव मन्त्रेण भक्षणं विधीयत इति ॥

तं प्रतिगृह्णीयादिति स्थविरो गौतमः ॥ २१ ॥

तं सोमरसमेव प्रतिगृह्णीयान्न पुनः पात्रस्य पृथग् ग्रहणमक्षेः । कुतः । हुतो देयः [24.1.22] इति वचनात् सोमरसस्यैव दक्षिणात्वप्रतीतेरिति गौतम इति[3] ॥

गौतममतेनैव चमसभक्षणे मन्त्रान्तरमाह ॥

कस्त्वा ददाति स त्वा ददाति कस्मै त्वा ददाति तस्मै त्वा ददाति कस्त्वा कं भक्षयामि इति भक्षयेत् ॥ २२ ॥ वाग् देवी सोमस्य तृप्यतु इति वा ॥ २३ ॥ उभाभ्यां वोभाभ्यां वा ॥ २४ ॥

गौतमस्य मतेन मन्त्रद्वयमिति[2] ॥

चतुर्थः खण्डः ॥ ४ ॥ ॥ १२ ॥

---

पञ्चदशः पटलः ॥ १५ ॥

---

द्राह्यायणकृते सूत्रे दीपे धन्विविनिर्मिते ।
द्वितीये दशके वृत्तः पञ्चमः पटलो ऽधुना ॥

इति पञ्चमो ऽध्यायः ॥

1-1 Gb पात्रस्यापि पृथक् प्रतिग्रहः
2-2 Gb om.
3 Dd resumes the text here.

# BHARADVAJA-SRAUTASUTRA

edited by

RAGHU VIRA

The BharŚ, which belongs to the Khā(v.l.Kā)ṇḍikeya group[1] of the Taittirīyas[2], is known to us only partially. Its manuscripts are far from being numerous. The few that we have been able to obtain may be conveniently divided into two groups, D(evanāgarī) and G(rantha), according to the scripts in which they are written. All of them are incomplete. Da (Baroda, Oriental Institute, No. 894), Db (Bombay, University Library, No. 26) give the longest text—complete upto the end of Jyotiṣṭoma, and four sections of the next

---

1 In some of the accounts the Bhāradvājas are replaced by the Audh-(v.l.Augh)eyas. See Wilhelm Siegling's "D ie Rezensionen des Caraṇavyūha", pp. 24, 34.

2 There are six Śrautasūtras attached to the Taittirīyas. Of these four have already been published: (1) Āpastamba, ed. by R. Garbe, 1882–1902 (2) Baudhāyana, ed. by W. Caland, 1904–'23 (3) Satyāṣāḍha-Hiraṇyakeśin, ed. by Kāśinātha Bāla Āgāśe, 1907–'30 (4) Vaikhānasa, ed. by W. Caland, 1933. I possess only the loose printed sheets, which were very kindly supplied to me by Prof. Gonda of the University of Utrecht. The fifth Sūtra, that of the Vādhūlas, was made known by Professor Caland through long extracts printed in the Acta Orientalia, I–IV.

chapter.[1] The text is uniform in these mss., and is derived from a common source. Ga (Lahore, Panjab University Library, No. 1427) concludes with the Jyotiṣṭoma. Gbc were supplied through the good offices of Pt. G. Harihara Śāstrī of Trivandrum. Of these Gb stops with 12. 18 of our text, while Gc has only nine complete chapters. At the end of the Sūtra Gb appends a big fragment of the Bhāradvāja-Darśa-Pūrṇamāsa-Prayoga. Still another Grantha manuscript (Lahore, D. A.-V. College, No. 5980) was examined and even collated. It has, however, not been included in our critical

1 In the year 1926 I had compared the Berlin (Weber's Catalogue, No. 1448) and Munich (Aufrecht's Cat., No. 118) manuscripts with our Da, and was greatly disappointed to discover that they were recent transcripts made from the same source as our Da.

The Munich ms., however, has a Supplement, the Bhāradvāja-Pariśeṣa-sūtra, which is of exceptional interest. After the customary salutations to Gaṇeśa, Sarasvatī and the Gurus the Supplement begins:

अथातः सूत्रपरिशेषान् व्याख्यास्यामः ॥ बाहुमात्राः परिधयः स्फ्यं शम्या च । प्रादेश-मात्राण्यरत्निमात्राणि वेध्मकाष्ठानि शुष्काण्यार्द्राणि वा । सवल्कलानि ॥

It is a small work, not exceeding 200 granthas; but its contents are most varied. We give a few short extracts below:

अथ नक्षत्रेष्टीनां याज्यानुवाक्या यथा समाम्नाता उपहोमाश्च भवन्ति प्राकृतावाज्यभागौ आम्नाते संयाज्ये यथाश्रद्धं दक्षिणा भवन्ति ॥

अत ऊर्ध्वं याजमानं यथासमाम्नातं वाजपेयं साग्निमेके समामनन्ति ॥

यो ब्रह्मचारी स्त्रियमुपेयात् स गर्दभं पशुमालभेत आहिताग्निरित्येकमनाहिताग्निरित्यपरम् ॥

हविर्दोषान् व्याख्यास्यामः॥ अथातोऽग्नीनामुद्वातानां कंडद्वयं **बौधायनवत्**...यथाहिताग्निः पुनर्दारान् कुर्वीत अग्नीन् नोत्सृजेयुर्लौकिकाः संपद्येरन् । तस्य पुनरग्न्याधेयं विद्यत **इत्याश्मरथ्यः** ॥ पुनराधेयमि**त्यालेखनः** पुनरग्न्याधेयमि**त्यौडुलोमिः** ॥ ॥

अथातोऽनुग्रहान् व्याख्यास्यामः समस्तहोमो **बौधायनवत्** ॥ ॥

Vijñāyate-passages are scattered all over the text. It ends:

आज्यालाभे आजमाविकमाहिषं वा घृतंमाज्यार्थे इत्यादि ॥ ॥ इति भारद्वाजीयपरिशेष-सूत्रं संपूर्णं श्री रामार्पणमस्तु ॥ श्री सांबसदाशिवप्रसन्न ॥ श्री वासुदेवप्रसन्न ॥ श्री गोविन्दाय ॥

I also possess a Bhāradvāja-Pravarasūtra in Grantha characters.

apparatus, for it is full of lacunae and is not of much value for the constitution of the text. Its inclusion would have made the critical apparatus unnecessarily heavy.

The Devanāgarī mss. differ from the Grantha mss. in their division and numbering of the chapters. The differences are clearly shown by the colophons of D and Gb, which are given below. Gac have generally no colophons. Ga shows the numbers of chapters sporadically. In its divisions of chapters Gc agrees entirely with Gb. Ga, however, differs from Gb in marking the end of the eleventh praśna. The constituted text follows the divisions of Ga.

The colophons of D and Gb are :

| D | Gb |
|---|---|
| इति प्रथमः ॥ | इति दर्शपूर्णमासे प्रथमः प्रश्नः ॥ |
| इति द्वितीयः ॥ | इति दर्शपूर्णमासे द्वितीयः प्रश्नः ॥ |
| तृतीयः ॥ प्रथमः प्रश्नः समाप्तः ॥ | Praśna continued |
| द्वितीयः प्रश्नः ॥ | इति दर्शपूर्णमासे तृतीयः प्रश्नः ॥ |
| प्रथमः ॥ | इति याजमानश्चतुर्थः प्रश्नः ॥ |
| द्वितीयः ॥ | इति अग्न्याधानः पञ्चमः प्रश्नः ॥ |
| इति तृतीयः प्रश्नः ॥ | इत्यग्न्युपस्थानं समाप्तम् ॥ |
| चतुर्थः प्रश्नः ॥ | अग्निहोत्रं समाप्तम् ॥ |
| पञ्चमः प्रश्नः ॥ | इत्यग्न्युपस्थानाग्निहोत्राग्रय-- न्तः ॥ |
| | षष्ठः प्रश्नः समाप्तः ॥ |

Here D shows a double division : once treating its three praśnas as separate chapters, and hence numbering the sections separately for each praśna, and once taking them as one whole and marking the numbers of the sections continuously (thus agreeing with Gb).

| D | Gb |
|---|---|
| षष्ठः प्रश्नः ॥ | इति पशुबन्धः सप्तमः प्रश्नः ॥ |
| सप्तमः प्रश्नः ॥ | इति समाप्तश्चातुर्मास्यप्रयोगः ॥ इति |

| | |
|---|---|
| | भारद्वाजश्रौते अष्टमः प्रश्नः ॥[1] |
| अष्टमः प्रश्नः ॥ | इति पूर्वप्रायश्चित्तं नाम नवमः प्रश्नः ॥ |
| प्रथमः ॥ | इति भारद्वाजसूत्रे दशमः सोमप्रश्नः ॥ |
| प्रवर्ग्यप्रश्नः ॥ | Praśna continued |

Ga agrees with D in closing the praśna here. Gb ends with the 40th sec. of its 11th chapter. The remaining three colophons of D, viz., द्वितीयः ॥ तृतीयः ॥ नवमः प्रश्नः ॥ correspond to the close of the 12th, 13th and 14th praśnas of Ga. This is the end of Jyotiṣṭoma.

Besides these manuscripts, none of which can claim to be older than three hundred years, the text of the BhārŚ can be partly controlled and partly verified by the large number of citations in ancient commentaries and digests.[2] These would be found collected in Appendix I, which will appear at the end of the complete work.

I have to thank most cordially Pt. G. Harihara Śāstri and the Directors of Lahore and Baroda Libraries for their courtesy in allowing me the use of their valuable manuscripts.

---

1 Gb further adds :

वर्षे प्रमाथिनाम्नि च श्रावण्यां मासि संयुते ।
ऋक्षे बृहस्पतेस्तस्य वारे द्वादशिसंयुते ॥
शुभयोगे शुभे लग्ने शुभकरणसंयुते ।
चातुर्मास्यक्रतुरिदं सूत्रे व्यासदनुग्रहात् ॥
लिखित्वा पुस्तकेन्चैव रामकृष्णाख्यशर्मणा ।
तस्यैव पुस्तकमिदमुदक्तटनिवासिनः ।
काश्यिकारिकुले जातो शिवभक्तो भविष्यति ॥
अष्टमः प्रश्नश्चातुर्मास्यक्रतोः सूत्रं समाप्तम् ॥

2 These citations do not always give the exact words of the Sūtra. Sometimes they give merely the paraphrase of the original. Cp. Rudradatta (on ĀpŚ 1, 4, 5, 2, 4, 9, 2, 19, 9) and Mahādeva (on SatHirŚ 1, 5 : page 126, last line) with BhārŚ 1. 3. 21, 2, 4, 10, 2, 18, 1, 1, 21, 6.

दर्शपूर्णमासौ व्याख्यास्यामः ॥ १ ॥ आमावास्येन हविषा यक्ष्यमाण एकस्या द्वयोर्वा पूर्वेद्युर्दैविरातन्नं दोहयति ॥ २ ॥ अपि वा पुरस्तादेव द्र्यहे त्र्यहे वानुगुप्तं दुग्धं दोहयित्वानुगुप्तेन दध्नातनक्ति ॥ ३ ॥ संततमविच्छिन्नमभिदुहन्त्योपवसथात् ॥ ४ ॥ यदहः पूर्णश्चन्द्रमाः स्यात् तां पौर्णमासीमुपवसेत् ॥ ५ ॥ श्वः पूरितेति वा ॥ ६ ॥ यदहर्न दृश्येत ताममावास्याम् ॥ ७ ॥ श्वो नोदेतेति वा ॥ ८ ॥ तत्रैषो ऽत्यन्तप्रदेशो ये केचन पौर्णमासीममावास्यां वा धर्मा अनारभ्याम्नायन्त उभयत्रैव ते क्रियन्ते ॥ ९ ॥ यज्ञोपवीत्येव दैवेषु कर्मसु भवति ॥ १० ॥ प्राचीनावीती पित्र्येषु ॥ ११ ॥ प्राङ्न्यायान्युदङ्न्यायानि वा प्रदक्षिणं दैवानि कर्माणि कुर्यात् ॥ १२ ॥ विपरीतं पित्र्याणि ॥ १३ ॥ न विहारादपपर्यावर्तेत ॥ १४ ॥ न यज्ञाङ्गेनात्मानमभिपरिहरेदन्यं वा ॥ १५ ॥ उत्तरतउपचारो विहारः ॥ १६ ॥ यत्र क्व च जुहोतीति चोदयेदध्वर्युरेव जुह्वाज्यनाहवनीये जुहुयात् ॥ १७ ॥ अध्वर्युमेवानादिष्टे कर्तरि प्रतीयादाग्नीध्रं द्वितीयम् ॥ १८ ॥ यत्र क्वचोपतिष्ठते ऽनुमन्त्रयत इति चोदयेद् यजमान एव तत् कुर्यात् ॥ १९ ॥ एकमन्त्राणि कर्माणि ॥ २० ॥ आदिप्रदिष्टा मन्त्रा भवन्ति ॥ २१ ॥ ॥ १ ॥

उत्तरस्यादिना पूर्वस्यावसानम् ॥ १ ॥ मन्त्रान्तैः कर्मादीन् संनिपातयेत् ॥ २ ॥ अथ यत्र ह्रस्वो मन्त्रः स्याद् दीर्घं कर्म कर्मादौ मन्त्रं जपेत् ॥ ३ ॥ अथ

1-1 D दोहयित्वा
2 Ga पूर्ण°
3 DGa om. ताम्
4 D °तोति, Gc नोदितेति ; Gb corrupt.
5 DGc °न्तः
6 D केच
7 Gb तद्विप°
8 DGc add ह
9 D °दु°
10 D °दिष्टेषु कर्तारं
11 D om.
12 Gc पूर्वस्यान्तम् ; Gbc add विद्यात्
13 D संपा°

यत्र द्वाभ्यां जुहोति पञ्चभिर्जुहोतीति चोदयेत् प्रतिमन्त्रं तत्राहुतीर्जुहुयात् ॥ ४ ॥ अथ यत्र यज्ञाङ्गे कर्माभ्यावर्तयेन्न मन्त्रोऽभ्यावर्तेत ॥ ५ ॥ ज्वलत्येव सर्वा आहुतीर्जुहुयात् ॥ ६ ॥

---

व्रतमुपैष्यति[2] शाखामच्छैति[3] ॥ ७ ॥ पलाशशाखां शमीशाखां वा ॥ ८ ॥ सा या प्राच्युदीची प्राची वोदीची वा बहुपर्णा[4] बहुशाखाप्रतिशुष्काग्रासुषिरा तामाछिनत्ति—इषे त्वा [1. 1. 1*a*] इति ॥ ९ ॥ ऊर्जे त्वा [l. c.] इति संनमयत्यनुमार्ष्टि वा ॥ १० ॥ अथैनामाहरति—

इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृताम् ।
बहुपर्णामशुष्काग्रां हरामि पशुपामहम् ॥ [TB 3. 7. 4. 8]

इति ॥ ११ ॥ तया षडवरार्ध्यान् वत्सानपाकरोति—वायव स्थोपायव स्थ [1.1.1 *b*] इति ॥ १२ ॥ यावतीनामेका कुम्भी दुग्धं संभरेत् तावती परार्ध्या मात्रा स्यात् ॥ १३ ॥ एकं शाखयोपस्पृशति ॥ १४ ॥ तयैव गाः प्रस्थापयति—देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया इन्द्राय देवभागम् इति ॥ १५ ॥ महेन्द्राय इति वा यदि महेन्द्रयाजी भवति ॥ १६ ॥ एकां शाखयोपस्पृशति ॥ १७ ॥ प्रस्थिता अनुमन्त्रयते—

शुद्धा अपः सुप्रपाणे पिबन्तीः शतमिन्द्राय शरदो दुहानाः ।
रुद्रस्य हेतिः परि वो वृणक्तु ॥

इति ॥ १८ ॥ महेन्द्राय इति वा यदि महेन्द्रयाजी भवति ॥ १९ ॥ ॥ २ ॥

ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः [l. c. *g*] इति यजमानस्य गृहानभिपर्यावर्तेते ॥ १ ॥ अग्निष्ठेऽनस्यग्न्यगारे वा पुरस्तात् प्रतीचीं[9] शाखामुपगूहति—यजमानस्य पशून् पाहि [l. c. *h*] इति ॥ २ ॥ पश्चात् प्राचीमित्येकेषाम् ॥ ३ ॥ यो वा अध्वर्योर्गृहान् वेद गृहवान् भवति । आ चतुर्थात् कर्मणोऽभिसमीक्षेतेदं करिष्यामीदं करिष्यामीति । एते वा अध्वर्योर्गृहाः । य एवं वेद गृहवान् भवतीति विज्ञायते ॥ ४ ॥ सावित्रेणाश्वपर्शुमनडुत्पर्शुमसिदं वादाय गार्हपत्यमभिमन्त्रयते—यज्ञस्य घोषदसि [1. 1. 2*a*] इति ॥ ५ ॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः

1 Gbc °हुतिं जुहु°
2 Gb °मुपैष्यतीति
3 Gac °च्छेति
4 Ga °र्णां
5 D °प्रतिकृष्णा°
6 Gb षड्व°
7 D °त्री
8 Gac °घ्न्या
9 Thus Gbc (= Āp., Hir.); DGa प्रतीं°

[1.1.2b] इत्याहवनीये दात्रं प्रतितपति ॥ ६ ॥ प्रेयमगाद्धिषणा बर्हिरच्छ [l. c. c] इति प्राङ् वोदङ् वाभिप्रव्रज्य यतः कुतश्च दर्भमयं बर्हिराहरति ॥ ७ ॥ विष्णोः स्तूपो ऽसि [1.1.11g] इति प्रथमं स्तम्बमुत्सृजति[2] ॥ ८ ॥ द्वितीयं[3] परिषौति[4]—देवानां परिषूतमसि वर्षवृद्धमसि [1.1.2de] इति ॥ ९ ॥ तस्य द्वे तिस्रो वा नाडीरुत्सृजति—अवशिष्टो गवां भागः इति ॥ १० ॥ स्तम्बमारभते—देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां बर्हिर्देवसदनमारभे इति ॥ ११ ॥ पर्वणि दाति—देवबर्हिर्मा त्वान्वङ् मा तिर्यक् पर्व ते राध्यासमाछेत्ता ते मा रिषम् [l. c. fgh] इति ॥ १२ ॥ संनखं मुष्टिं लुनोति[5] ॥ १३ ॥ स प्रस्तरो भवति ॥ १४ ॥ कुल्मिमात्र इत्येकेषाम् ॥ १५ ॥ [6]ऊर्वस्थिमात्र इत्येकेषाम्[6] ॥ १६ ॥ स्रुग्दण्डमात्र इत्येकेषाम् ॥ १७ ॥ अपरिमितं[7] इत्येकेषाम् ॥ १८ ॥ एवमेवायुजो[8] मुष्टींल्लुनोति[9] ॥ १९ ॥ यदन्यत् परिषवणादुत्सर्जनादिति सर्वं तत् करोति ॥ २० ॥ प्रस्तरो युक्तमित्येकेषामयुक्तमित्येकेषाम् ॥ २१ ॥ अयुञ्जि निधनानि लुनोतीत्येकेषाम् ॥ २२ ॥ ॥ ३ ॥

देवबर्हिः शतवल्शं विरोह [l. c. i] इत्यालवान् प्रत्य[10]भिमृशति ॥ १ ॥ सहस्रवल्शा वि वयं रुहेम [l. c.] इत्यात्मानम् ॥ २ ॥ अथैनत् संभरति—पृथिव्याः संपृचः पाहि सुसंभृता त्वा संभरामि [l. c. hl] इति ॥ ३ ॥ अत एव बर्हिषः शुल्बं करोति त्रिधातु पञ्चधातु वा ॥ ४ ॥ अजुपिता योनिः इति शुल्बमावेष्टयति ॥ ५ ॥ अदित्यै रास्नासि [l. c. m] इति प्रतिदधाति ॥ ६ ॥ तत्रैषो ऽत्यन्तं[11]प्रदेशो यानि कानिच शुल्बानि न समस्यन्ते प्रदक्षिणं तान्यावेष्टयेत् ॥ ७ ॥ अथ यानि समस्यन्ते प्रसव्यं तेषां गुणमावेष्ट्य प्रदक्षिणमभिसमस्येत् ॥ ८ ॥ उदगग्रं शुल्बं निधाय तस्मिन् प्रागग्रं बर्हिर्निदधाति[12] ॥ ९ ॥ अजुभितौ[13] योनिः इत्युत्तमे निधने प्रस्तरमत्यादधाति ॥ १० ॥ अथैनत् संनह्यति—इन्द्राण्यै संनहनम् [l. c.] इति ॥ ११ ॥ पूषा ते ग्रन्थिं ग्रथ्नातु [l. c. n] इति ग्रन्थिं करोति[14] ॥ १२ ॥ स ते मास्थात् [l. c.] इति पश्चात् प्राञ्चमुपगूहति ॥ १३ ॥ पुरस्तात् प्रत्यञ्चमित्येकेषाम् ॥ १४ ॥ अथैनदारभते—

1 Thus Da, others °इ°
2 D °सृज्यति, Gbc °सृज्य
3 Gc adds स्तम्बं
4 D परिषवेति
5 Gac लुनाति
6-6 D om.
7 D विनिमित, Ga विनिर्मित
8 DGb om. एवम्
9 Ga लुना°
10 Gc om. प्रति
11 DGc °न्तः
12 D °र्निधायति
13 Ga °हिता, Gbc °दा
14 Gb करोतु

आपस्त्वामश्विनौ त्वामृषयः सप्त मामृजुः ।
बर्हिः सूर्यस्य रश्मिभिरुषसां केतुमारभे ॥

इति ॥ १५ ॥ उद्यच्छते—इन्द्रस्य त्वा बाहुभ्यामुद्यच्छे [1. 1. 2o] इति ॥ १६ ॥ शीर्षन्नधिनिधत्ते—बृहस्पतेर्मूर्ध्ना हरामि [l. c.] इति ॥ १७ ॥ आहरति—उर्वन्तरिक्षमन्विहि [l. c. p] इति ॥ १८ ॥ अपरेणाहवनीयं परिधीनां काले ऽन्तर्वेद्यनघः सादयति—अदित्यास्त्वोपस्थे सादयामि [1. 1. 4s] इति ॥ १९ ॥ देवंगममसि [1. 1. 2q] इत्यासन्नमभिमन्त्रयते ॥ २० ॥ उपरीव प्रज्ञातं निदधाति ॥ २१ ॥ ॥ ४ ॥

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा ।
तासां पर्व राध्यासं परिस्तरमाहरन् ॥
अपां मेध्यं यज्ञियं सदेवं शिवमस्तु मे ।
आछेत्ता वो मा रिषं जीवानि शरदः शतम् ॥
अपरिमितानां परिमिताः संनह्ये सुकृताय कम् ।
एनो मा निगां कतमच्चनाहं पुनरुत्थाय बहुला भवन्तु ॥ [TB 3.7.4. 9,10]

इति परिस्तरणानां दर्भाणामधि निधान्याछेदनी संनहनीत्येता आम्नाता भवन्ति ॥ १ ॥ एकविँशतिदारुमिध्मं करोति पालाशं खादिरं वा ॥ २ ॥ अष्टादशदारुमिध्मँ संनह्यतीत्येकेषाम् ॥ ३ ॥ पञ्चदशसामिधेनीदारूणि भवन्ति ॥ ४ ॥ त्रयः परिधयः ॥ ५ ॥ पालाशाः कार्ष्मर्यमया वा शुष्का वार्द्रा वा सवल्कलाः ॥ ६ ॥ अथो खादिरा वैल्वा औदुम्बरा वैकङ्कता रौहितका वेति विज्ञायते ॥ ७ ॥ स्थविष्ठो मध्यमो ऽणीयान् द्राघीयान् दक्षिणार्ध्यो ऽणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः ॥ ८ ॥ द्वे आघारसमिधौ ॥ ९ ॥ अनूयाजसमिदेकविँशी ॥ १० ॥ समूलानाममूलानां वा दर्भाणामयुग्धातु तथैव शुल्वं करोति ॥ ११ ॥ तस्मिन्निध्मं संभरति ॥ १२ ॥

यत् कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन् ।
ततस्त्वामेकविँशतिधा संभरामि सुसंभृता ॥
त्रीन् परिधीँस्तिस्रः समिधो यज्ञायुरनुसंचरान् ।
उपवेषं मेक्षणं धृष्टिँ संभरामि सुसंभृता ॥ [l. c.]

इति संनह्यति ॥ १३ ॥ कृष्णो ऽस्याखरेष्ठः [1. 1. 11a] ॥ देव पुरश्चर सघ्यासं त्वा इति पुरस्तात् प्रत्यञ्चं ग्रन्थिमुपगूहति ॥ १४ ॥ अथैनमनघः सादयित्वा प्रज्ञातानीध्मप्रव्रश्चनानि निदधाति ॥ १५ ॥ ॥ ५ ॥

1 D om. दर्भाणाम्
2 D रोहीत°, Gac रौहत°
3 Ge adds इति
4 DGa om. sūtras 11, 12.

श्वो भूत इध्माबर्हिषी व्रतोपेते पौर्णमास्यां कुर्यात् ॥ १ ॥ पूर्वेद्युरेवामावास्यायाम् ॥ २ ॥ यथाकामी पौर्णमास्यामित्यपरम् ॥ ३ ॥ दर्भमयं वेदं करोति—वेदो ऽसि येन त्वं देव वेद देवेभ्यो वेदो ऽभवस्तेन मह्यं वेदो भूयाः इति ॥ ४ ॥ वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृतं ब्रह्मवर्चसकामस्य त्रिवृच्छिरसं ब्रुवते ॥ ५ ॥ नित्यवत् पूर्वौ[2] कल्पावेके समामनन्ति ॥ ६ ॥ अथैनं प्रादेशमात्रे परिवासयति ॥ ७ ॥ शुल्बात् प्रादेशमात्र इत्येकेषाम् ॥ ८ ॥ प्रज्ञातानि वेदाग्राणि[3] निधार्य यया शाखया वत्सानपाकरोति तस्या अन्तर्वेदि पलाशानामेकदेशं प्रशातयति ॥ ९ ॥ मूलतः शाखां परिवास्य तमुपवेषं करोति—

उपवेषो ऽसि यज्ञाय त्वां परिवेषमधारयन् ।
इन्द्राय हविः कृण्वन्तः शिवः शग्मो भवासि नः ॥ [TB 3. 7. 4. 13]

इति ॥ १० ॥ अथास्या दर्भमयं प्रादेशमात्रं पवित्रं करोति त्रिवृदवदलम्—वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् इति ॥ ११ ॥ मूले मूलमवसृजत्यग्रे ऽग्रं न ग्रन्थिं करोति ॥ १२ ॥ क्रियमाणं यजमानो ऽनुमन्त्रयते—

त्रिवृत् पलाशे दर्भ इयान् प्रादेशसंमितः ।
यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु मे ॥ [1. c. 11]

इति ॥ १३ ॥ परिसमूहन्त्यग्न्यगाराण्युपलिम्पन्त्यायतनानि ॥ १४ ॥ यावच्छकृकरैं सांनाय्यकुम्भ्यौ गोमयेनानुलिप्ते भवतः ॥ १५ ॥ अलंकुर्वाते यजमानः पत्नी च ॥ १६ ॥  ॥ ६ ॥

अमावास्यायामधिवृक्षसूर्ये पिण्डपितृयज्ञेन चरन्ति ॥ १ ॥ दक्षिणाग्राग्रैर्दर्भैरन्वाहार्य[10] परिस्तीर्यैकैकशः पिण्डपितृयज्ञपात्राणि प्रक्षाल्य प्रयुनक्ति—स्फ्यं स्रुवमाज्यस्थालीं[11] मेक्षणं कृष्णाजिनमुलूखलं मुसलं शूर्पं येन चार्थी भवति ॥ २ ॥ अध्वर्युर्यज्ञोपवीती दक्षिणतः शकटादेकपवित्रे ऽधि[12] स्थाल्यां निर्वपति ॥ ३ ॥ पूरयित्वा निमार्ष्टि ॥ ४ ॥ कृष्णाजिने उलूखलं प्रतिष्ठाप्य दक्षिणाप्राची पत्नी तिष्ठन्ती परापावमविवेकमवहन्ति ॥ ५ ॥ सकृत् फलीकरोति

1 Gab य°
2 Gbc पूर्व-
3 Gb स्तोत्राणि
4 Gc निदधाति
5 DGa त्रिवृदवलयम्
6 Gb मूलमुपसृ°, Ga मूलमवसृ°
7 D om. अनु
8 Gc ददातु
9 Ga °नोप°
10 Gbc °रन्वाहार्यपचनं
11 Gc adds चरुस्थाली (=Āp.)
12 DGc om. ऽधि
13 Gbc °नम्

॥ ६ ॥ दक्षिणाग्नौ जीवतण्डुलमिव श्रपयित्वोत्पूतेन नवनीतेनाभिघारयत्यनुत्पूतेन वा सर्पिषा ॥ ७ ॥ दक्षिणपूर्वेणान्वाहार्यपचनमुत्तरापरेण वा दक्षिणाप्राचीमेकस्फ्यां वेदिमुद्धत्यावोक्ष्य सकृदाच्छिन्नेन बर्हिषा स्तृणाति—

सकृदाच्छिन्नं बर्हिरूर्णामृदु स्योनं पितृभ्यस्त्वा भराम्यहम् ।

अस्मिन् सीदन्तु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह ॥ [TB 3. 7. 4. 10] इति ॥ ८ ॥ तस्यामेतं स्थालीपाकं प्रतिष्ठाप्य दक्षिणतः कशिपूपबर्हणमाञ्जनमभ्यञ्जनमित्येकैकश आसाद्य ॥ ९ ॥ ॥ ७ ॥

अध्वर्युर्यज्ञोपवीती दक्षिणं जान्वाच्य मेक्षणेन स्थालीपाकस्योपहत्याभिघार्य जुहोति—सोमाय पितृपीताय स्वधा नमः [TB 1. 3. 10. 2] इति प्रथमाम् ॥ १ ॥ यमायाङ्गिरस्वते पितृमते स्वधा नमः इति द्वितीयाम् ॥ २ ॥ ये मेक्षणे तण्डुलास्तान् अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः इति तृतीयाम् ॥ ३ ॥ तूष्णीं मेक्षणमादधाति ॥ ४ ॥ दक्षिणाग्नेरेकोल्मुकं निरूहति—

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।

परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात् प्रणुदात्वस्मात् ॥

इति ॥ ५ ॥ यजमानः सव्यं जान्वाच्य प्राचीनावीती त्रीनुदकाञ्जलीनेकस्फ्यायामुपनिनयति—असाववनेनिक्ष्व इति पितरम् असाववनेनिक्ष्व इति पितामहम् असाववनेनिक्ष्व इति प्रपितामहम् ॥ ६ ॥ अत्रैव नामादेशमवाचीनपाणिर्दक्षिणापवर्गांस्त्रीन् पिण्डान् निदधाति—एतत्ते तत ये च त्वामनु [1. 8. 5b] इत्येतैर्मन्त्रैः ॥ ७ ॥ अथ यदि द्विपिता स्यात् प्रतिपूरुषं पिण्डान् दद्यात् ॥ ८ ॥ अपि वैकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेत् ॥ ९ ॥ अथ यदि जीवपिता स्यात् पितामहाय प्रपितामहाय दद्यात् ॥ १० ॥ न जीवन्तमतिदद्यादित्येकेषाम् ॥ ११ ॥ होमान्तमेव कुर्वीत ॥ १२ ॥ ॥ ८ ॥

अथ यदि[8] बन्धुनामानि[9] न विन्देत[10] स्वधा पितृभ्यः पृथिवीषद्भ्यः इति प्रथमं पिण्डं दद्यात् । स्वधा पितृभ्यो ऽन्तरिक्षसद्भ्यः इति द्वितीयं स्वधा पितृभ्यो दिविषद्भ्यः इति तृतीयम् ॥ १ ॥ तूष्णीं चतुर्थं पिण्डं निधाय अत्र पितरो यथाभागं मन्दध्वम् [l. c.]

1 Ga °पस्थित्वा°, Gb °पस्थाप्या°
2 Gb म°
3 DGa नाम°
4 DbGa °पु°
5 G वैक°
6 Ga जीवत्° for यदि जीव°
7 Gab add च
8 D om.
9 Gb °नाम for °नामानि
10 Gbc विंदितः

इत्युक्त्वा पराङावर्तते ॥ २ ॥ श्रोष्मणो व्यावृत उपास्ते[2] ॥ ३ ॥ व्यावृत्त ऊष्मण्यभिपर्यावर्तते ॥ ४ ॥ अव्यावृत्ते वा अमीमदन्त पितरः सोम्याः [TB 1. 6. 9. 9] इत्यभिपर्यावृत्य यः स्थाल्यां शेषस्तमवजिघ्रति—वीरं धत्त पितरः इति ॥ ५ ॥ आमयाविना प्राश्यो ऽन्नाद्यकामेन प्राश्यो यो ऽलमन्नाद्याय सन्नाद्यात् तेन प्राश्य इति विज्ञायते ॥ ६ ॥ तथैवोदकाञ्जलीनुपनिनीयाञ्जनाभ्यञ्जने ददाति—आङ्क्ष्वासौ ॥ अभ्यङ्क्ष्वासौ इति त्रिरनुपिण्डम् ॥ ७ ॥ एतानि वः पितरो वासांस्यतो नो ऽन्यत् पितरो मा योष्ट इति लोम छित्त्वोपन्यस्यति[7] वाससो वा दशाम् ॥ ८ ॥ उत्तर आयुषि लोम छिन्दीत ॥ ९ ॥ छित्त्वा नमस्कारैरुपतिष्ठते—नमो वः पितरो रसाय [3. 2. 5*s*] इति प्रतिपद्य अहं तेषां वसिष्ठो भूयासम् [l. c. *u*] इत्यन्तेन ॥ १० ॥ अथ पितॄनुत्थापयति[8]—

उत्तिष्ठत पितरः प्रेत शूरा यमस्य पन्थामनुवेता पुराणम् ।
धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद् भागधानं देवतासु ॥

इति ॥ ११ ॥ पितॄन् प्रवाहयति—परेत[10] पितरः सोम्याः [1. 8. 5*f*] इत्येतया ॥ १२ ॥ मनस्वतीभिरुपतिष्ठते—मनो न्वा हुवामहे [l. c. *g*] इति तिसृभिः ॥ १३ ॥ ॥ ९ ॥

उल्मुकमपिसृजति—

अभून्नो दूतो हविषो[11] जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः [12]पितृभ्यः स्वधया ते अक्षन् प्रजानन्नग्ने पुनरप्येहि देवान् ॥

इति ॥ १ ॥ प्राजापत्ययर्चा पुनरेति—प्रजापते [1. 8. 14*m*] इत्येतया पङ्क्त्या ॥ २ ॥ गार्हपत्यमुपतिष्ठते—यदन्तरिक्षं पृथिवीमुत द्याम् [1. 8. 5*k*] इति ॥ ३ ॥ अग्नौ सकृदाच्छिन्नं प्रहृत्याद्भिः प्रोक्ष्य द्वंद्वं पिण्डपितृयज्ञपात्राणि प्रत्युदाहरति ॥ ४ ॥ अपः पिण्डानभ्यवहरेद् ब्राह्मणं वा भोजयेदग्नौ वा प्रहरेत् ॥ ५ ॥

ये समानाः समनसः पितरो यमराज्ये ।
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥

इति प्रथमं पिण्डं प्रहरति ॥ ६ ॥

ये सजाताः समनसो जीवा जीवेषु मामकाः ।

1 Ga परान्ना°
2 DGa om. व्यावृत उपास्ते
3 DGc °वर्त्य
4 Ga सन्नन्यंन्या°
5 D °लिमु°
6 D त्रिस्त्रिर°
7 Gb °न्दस्य for °न्यस्यति
8 Gb °गुत्थाप्य
9 DGac °षां, Gb °षेषां
10 Ga परेतन
11 DGa om.
12 DGa °दात्

तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः ॥ [TB 2. 6. 3. 5]

इतीतरौ[1] ॥ ७ ॥ पत्नी वा मध्यमं पिण्डं प्राश्नाति ॥ ८ ॥ पुमाँसँ ह जानुका भवतीति विज्ञायते ॥ ९ ॥

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।

यथेह पितरो लोके दीर्घमायुः प्रजीवितात् ॥

इति प्राशन आम्नातो भवति ॥ १० ॥ संतिष्ठते पिण्डपितृयज्ञः ॥ ११ ॥ एवं विहित एवानाहिताग्नेर्भवत्यन्यत्र गार्हपत्योपस्थानात् ॥ १२ ॥ अन्यं गार्हपत्यस्थानीयमागमयेदित्येकम्[2] ॥ १३ ॥ यस्मिन् प्रहरेत् तमुपतिष्ठत इत्यपरम्[3] ॥ १४ ॥ तत्र गार्हपत्यशब्दो लुप्येत[4] संस्कारप्रतिषेधात् ॥ १५ ॥ ॥ १० ॥

ततः संप्रेष्यति—

परिस्तृणीत परिधत्ताग्निं परिहितो ऽग्निर्यजमानं भुनक्तु ।

अपां रस ओषधीनां सुवर्णो निष्का इमे यजमानस्य सन्तु कामदुघा अमुत्रामुष्मिंल्लोके ॥

[TB3.7.6.1] इति ॥ १ ॥ ततो ऽग्नीन् परिस्तृणाति पूर्वां[5]श्चापरौ च प्रागग्रैर्दर्भैः ॥ २ ॥ अपि वोदगग्राः पश्चात् पुरस्ताच्च भवन्ति ॥ ३ ॥ दक्षिणः[6] पश्च उपरिष्टाद् भवत्यधस्तादुत्तरः ॥ ४ ॥ दक्षिणेनाहवनीयं ब्रह्मयजमानयोरायतने कल्पयति ॥ ५ ॥ पूर्वं ब्रह्मणो ऽपरं यजमानस्य ॥ ६ ॥ स्वयं यजमानः पर्वण्यग्निहोत्रं जुहोति ॥ ७ ॥ नास्यामावास्याँ रात्रिं कुमारा अपि पयः पिबन्ति ॥ ८ ॥ यवाग्वास्यैतां रात्रिमग्निहोत्रँ हुत्वाग्निहोत्रोच्छेषणँ हविरातञ्चनं निदधाति ॥ ९ ॥ सांनाय्यपात्राणि प्रक्षाल्य द्वंद्वं प्रयुनक्ति ॥ १० ॥ उत्तरेण गार्हपत्यं कुम्भीदोहनँ शाखापवित्रमुपवेषमभिधानीं निदाने येन चार्थी भवति ॥ ११ ॥ अग्निहोत्रहवण्यां तिरः पवित्रमप आनीयोदगग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति—देवो वः सवितोत्पुनातु [1. 1. 5*a*] इति पच्छो गायत्र्या ॥ १२ ॥ अथैना अभिमन्त्रयते—आपो देवीरग्रेपुवः [l. c. *b*] इति प्रतिपद्य शुन्धिता स्थ [l. c. *d*] इत्यन्तेन ॥ १३ ॥ सांनाय्यपात्राणि प्रोक्षत्युत्तानानि पर्यावृत्य[7] ॥ १४ ॥ ॥ ११ ॥

शुन्धध्वं दैव्याय कर्मणे देवयज्यायै [1. 1. 3*a*] इति त्रिः ॥ १ ॥ अथैतानि निष्टपति—निष्टप्तँ रक्षो निष्टप्ता ऽरातयः इति ॥ २ ॥ अथ गा आयतीः प्रतीक्षते—

1 D adds वा
2 DGc °के
3 DbGc °रे
4 D लुप्यते
5 DGac म्रि
6 Ga दक्षिण-
7 Ga om. उत्तानानि पर्यावृत्य

एता आचरन्ति मधुमद् दुहानाः प्रजावतीर्यशसो विश्वरूपाः ।
बह्वीर्भवन्तीरुपजायमाना इह व इन्द्रो रमयतु गावः ॥ [TB 3. 7. 4. 14,15]

**इति ॥ ३ ॥** अदित्यै रास्नासि [1. 1. 2*m*] **इत्यभिधानीमादाय** पूषासि **इति वत्समभिदधाति ॥ ४ ॥** पूषा स्थ [TB 3. 7. 4. 15] **इति वा सर्वान् तत्र आह ॥ ५ ॥ उपसृष्टामनुमन्त्रयते**—अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः [l. c.] **इति ॥ ६ ॥ उपसीदन्तमनुमन्त्रयते**—ऊर्जं पयः पिन्वमाना घृतं च जीवो जीवन्तीरुप वः सदेयम् [l. c.] **इति ॥ ७ ॥ ततः संप्रेष्यति**—विहारं[2] गां चोपसृष्टामन्तरेण मा संचारिष्ट **इति ॥ ८ ॥ न दुह्यमानामन्तरेण संचरन्ति विहारं च ॥ ९ ॥ यदि व्यवेयात्** सांनाय्यं मा विलोपि **इति ब्रूयात् ॥ १० ॥** धृष्टिरसि ब्रह्म यच्छ [1. 1. 7*a*] **इत्युपवेषमादाय गार्हपत्यादुदीचो ऽङ्गारान् निरूहति**—निरस्तं जन्यं भयम् **इति ॥ ११ ॥ तेषु कुम्भीमधिश्रयति**—मातरिश्वनो घर्मो ऽसि [1. 1. 3*b*] **इति ॥ १२ ॥ अथैनां प्रदक्षिणमङ्गारैः पर्यूहति**—भृगूणामङ्गिरसां तपसा तप्यस्व **इति ॥ १३ ॥ अथास्यां शाखापवित्रं प्रागग्रं निदधाति**—वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् **इति ॥ १४ ॥　॥ १२ ॥**

**सपवित्रां कुम्भीमन्वारभ्य वाचं यच्छति ॥ १ ॥ धारयन्नास्ते ॥ २ ॥ धाराघोषमभिमन्त्रयते**—

उत्सं दुहन्ति कलशं चतुर्बिलमिडां देवीं मधुमतीं[4] सुवर्विदम् ।
तदिन्द्राग्नी जिन्वतं सूनृतावत् तद्यजमानममृतत्वे दधातु ॥ [TB 3.7.4.16]

**इति ॥ ३ ॥ दुह्यमाने विप्रुषो ऽनुमन्त्रयते**—हुत स्तोको हुतो द्रप्सः [1. 1. 3*g*] **इति ॥ ४ ॥ दुग्ध्वा हरति ॥ ५ ॥ तं पृच्छति**—कामधुक्षः प्र णो ब्रूहीन्द्राय हविरिन्द्रियम् [TB 3. 7. 4. 16] **इति ॥ ६ ॥** महेन्द्राय **इति वा यदि[3] महेन्द्रयाजी भवति ॥ ७ ॥** अमूं यस्यां देवानां मनुष्याणां पयो हितम् [l. c.] **इति नाम गृह्णाति ॥ ८ ॥** सा विश्वायुः [1. 1. 3*k*] **इत्यनुमन्त्रयते ॥ ९ ॥ कुम्भ्यां तिरः पवित्रमानयति**—देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा **इति ॥ १० ॥ आनीयमानेविप्रुषो ऽनुमन्त्रयते**—हुत स्तोको हुतो द्रप्सः [l. c. *g*] **इति ॥ ११ ॥ एवमेवोत्तरे दोहयति ॥ १२ ॥** सा विश्वव्यचाः [l. c. *k*] **इति द्वितीयामनुमन्त्रयते** सा विश्वकर्मा [l. c.] **इति तृतीयाम् ॥ १३ ॥ तिसृषु दुग्धासु वाचं विसृजते**—

बहु दुग्धीन्द्राय देवेभ्यो हव्यमाप्यायतां पुनः ।

1 Gbe उपसृष्टां मे प्रभृतादिरुप°　　3 Gb om.
2 Gbe add च　　4 Gab °ने

वत्सेभ्यो मनुष्येभ्यः पुनर्दोहाय कल्पताम् ॥ [TB 3. 7. 4. 16,17]

इति विरुद्धदति ॥ १४ ॥ महेन्द्राय इति वा यदि[1] महेन्द्रयाजी भवति ॥ १५ ॥ ॥ १३ ॥

विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयित्वा कुम्भ्यौ संक्षालनमानयति—संपृच्यध्वमृतावरीः [1. 1. 3*l*] इति ॥ १ ॥ कैर्षन्निवोदगुद्वासयति—दृंह गा दृंह गोपति मा वो यज्ञपती रिषत् इति ॥ २ ॥ प्रागित्येकेषां प्रागुदगित्येकेषाम् ॥ ३ ॥ शीतं शुभ्रं कृत्वा दध्नातनक्ति—सोमेन त्वातनच्मीन्द्राय दधि [l. c. *m*] इति ॥ ४ ॥ महेन्द्राय इति वा यदि[4] महेन्द्रयाजी भवति ॥ ५ ॥ अग्निहोत्रोच्छेषणमानयति—यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनु संतनोमि [TB 3. 7. 4. 17] इति ॥ ६ ॥ अग्निहोत्रोच्छेषणमानीय दध्यानयेदित्याश्मरथ्यः दध्यानीयाग्निहोत्रोच्छेषणमित्यालेखनः ॥ ७ ॥ यद्यग्निहोत्रोच्छेषणं न विन्देत् तण्डुलैरातञ्च्यात् । यदि तण्डुलान् न विन्देदोषधीभिरातञ्च्यात् ॥ ८ ॥

आपो हविष्षु जागृत यथा देवेषु जाग्रथ ।
एवमस्मिन् यज्ञे यजमानाय जागृत ॥

इत्यपिधाने ऽप आनीयोदन्वतायस्पात्रेण दारुपात्रेण वापिदधाति—

अदस्तमसि विष्णवे त्वा यज्ञायापिदधाम्यहम् ।
अद्भिररिक्तेन पात्रेण याः पूताः परिशेरते ॥

इति ॥ ९ ॥ ॥ १४ ॥

न मृन्मयेनापिदध्यात् । यदि मृन्मयेनापिदध्यात् तृणं काष्ठं वान्तर्धायापिदध्यात् ॥ १ ॥ अपिधायानधः सादयति—विष्णो हव्यं रक्षस्व [1. 1. 3*n*] इति ॥ २ ॥ तथैव रात्रौ प्रातर्दोहाय वत्सानपाकरोति ॥ ३ ॥ अपि वापराह्ण एवोभयोर्दोहयोर्वत्सानपाकुर्यात् ॥ ४ ॥ उपधाय कपालानि सायंदोहवत् प्रातर्दोहं दोहयति ॥ ५ ॥ एतावन्नानोदगग्रं पवित्रं निदधाति ॥ ६ ॥ नातनक्ति ॥ ७ ॥ नासोमयाजी संनयेदिति विज्ञायते ॥ ८ ॥ संनयेदित्येकेषाम् ॥ ९ ॥ ऐन्द्रमेके सांनाय्यं समामनन्ति माहेन्द्रमेके ॥ १० ॥ त एते[7] महेन्द्रयाजिनः—शुश्रुवान् ग्रामणी राजन्य औवों गौतमो भारद्वाजः ॥ ११ ॥ ते आदित एवाग्नीनाधाय

1 Gb om.
2 Gbc अपयित्वा क°
3 Gb रिषम्
4 Gab om.
5 D पि for अपि
6 Gab मृण्म°
7 DGa om. त एते
8 D तत्र

महेन्द्रं यजेरन् ॥ १२ ॥ अथेतर ऐन्द्रयाजिनः ॥ १३ ॥ स य इन्द्रयाजी महेन्द्रं यियक्षेत संवत्सरमिन्द्रमिष्ट्वाग्नये व्रतपतये पुरोडाशमष्टादशकपालं निर्वपेत् ॥ १४ ॥ ततो ऽधिकामं महेन्द्रं यजेतेति विज्ञायते ॥ १५ ॥ तस्माद् यः कश्चन सोमेनेष्ट्वा महेन्द्रं यजेतेति विज्ञायते ॥ १६ ॥ ॥ १५ ॥

श्वो भूते ऽग्नीन् परिस्तीर्य यथा पुरस्तात् कर्मणे वां देवेभ्यः शकेयम् [1. 1. 4a] इति हस्ताववनिज्य पात्राणि प्रक्षाल्य द्वंद्वं प्रयुनक्ति दशापराणि दश पूर्वाणि ॥ १ ॥ स्फ्यं च कपालानि चाग्निहोत्रहवणीं[3] च शूर्पं च कृष्णाजिनं च शम्यां चोलूखलं च मुसलं च दृषदं चोपलां चेत्युत्तरेण गार्हपत्यम् ॥ २ ॥ स्रुवं च जुहूं चोपभृतं च ध्रुवां च प्राशित्रहरणं चाज्यस्थालीं च वेदं पात्रीं च प्रणीताप्रणयनं चेडापात्रं चेत्युत्तरेणाहवनीयम् ॥ ३ ॥ यथोपपातमेवशिष्टान्यन्ततः प्रातर्दोहपात्राणि ॥ ४ ॥ खादिरः स्रुवः स्फ्यः शम्या प्राशित्रहरणं च । पर्णमयी जुहूः । आश्वत्थ्युपभृत् । वैकङ्कती ध्रुवाग्निहोत्रहवणी च ॥ ५ ॥ प्रादेशमात्र्यो ऽरत्निमात्र्यो[6] वा स्रुचो भवन्ति त्वग्बिला मूलदण्डा हस्त्योष्ठ्यो वायसपुच्छा हंसमुखप्रसेचना वा ॥ ६ ॥ यान्यनादिष्टवृक्षाणि यः कश्च यज्ञियो वृक्षस्तस्य स्युरित्याश्मरथ्यः ॥ ७ ॥ ॥ १६ ॥

वैकङ्कतानीत्यालेखनः ॥ १ ॥ वारणान्यहोमार्थानि स्युः ॥ २ ॥ विज्ञायते—तस्माद् वारणो यज्ञावचारः । न त्वेतानि जुहुयादिति ॥ ३ ॥ गार्हपत्यात् प्रक्रम्य संततां प्राचीमुलपराजीं स्तृणात्याहवनीयात्—यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्य [TB 3. 2. 4. 1] इति ॥ ४ ॥ अत्र ब्रह्मा प्रपद्यते ॥ ५ ॥ बर्हिषः समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते—पवित्रे स्थो वैष्णवी वायुर्वां मनसा पुनातु [TB 3. 7. 4. 11] इति ॥ ६ ॥ तृणं काष्ठं वान्तर्धाय छिनत्ति न नखेन ॥ ७ ॥ अथैने अद्भिरनुमार्ष्टि—विष्णोर्मनसा पूते स्थो [8]वैष्णवौ स्थो वायुपूते स्थः[8] इति ॥ ८ ॥ अथैने अभिमन्त्रयते—

इमौ प्राणापानौ यज्ञस्याङ्गानि सर्वशः ।
आप्याययन्तौ संचरतां पवित्रे हव्यशोधने ॥ [l. c.]

इति ॥ ९ ॥ वेषाय त्वा [1. 1. 4b] इति प्रणीताप्रणयनम् ॥ १० ॥ चमसमादाय प्रक्षालयति—वानस्पत्यो ऽसि देवेभ्यः शुन्धस्व इति ॥ ११ ॥ कंसेन ब्रह्मवर्चसकामस्य

1–1 D इन्द्र
2 D स्फ्यश्च
3 DGa °णी
4 All mss. शम्या
5 Da °पात्रम , Ga °हतम°, Gb °पादम°
6 Ga adds बाहुमात्र्यो
7 Ga कश्चन, Gb कश्चिद्
8–8 D om.

प्रणयेद् गोदोहनेन पशुकामस्य मृन्मयेन प्रतिष्ठाकामस्येति विज्ञायते ॥ १२॥ ॥१७॥

तस्मिन्नुत्तरेण गार्हपत्यमुपविश्य पवित्रान्तर्हिते पात्रे ऽप आनयति—को वो गृह्णाति स वो गृह्णातु इति ॥ १ ॥ अपो गृह्णन्निमां मनसा ध्यायति ॥ २ ॥ उपबिलं चमसं पूरयित्वोदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूयाभिमन्त्रयते ॥ ३ ॥ यथा पुरस्ताद् ब्रह्माणमामन्त्रयते—ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छ इति ॥ ४ ॥ प्रणीताः प्रणयन् वाचं यच्छत्या हविष्कृतः ॥ ५ ॥ प्रसूतो ब्रह्मणा समं प्राणैर्धारयमाणो ऽविषिञ्चन् स्फ्येनोपसंगृह्य हरत्यनुपसंगृह्य वा—को वः प्रणयति स वः प्रणयतु ॥

अपो देवीः प्रणयामि यज्ञं संसादयन्तु नः ।
इदं मदन्तीर्घृतपृष्ठा उदार्कुः सहस्रपोषं यजमाने न्यश्नतीः ॥

इति ॥ ६ ॥ मनसा मन्त्रं जपति ॥ ७ ॥ उत्तरेणाहवनीयं प्रणीताः सादयति—को वो युनक्ति स वो युनक्तु इति ॥ ८ ॥ दर्भैरपिधाय पवित्रे आदाय पात्राणि संमृशति—संसीदन्तां दैवीर्विशः पात्राणि देवयज्यायै इति ॥ ९ ॥ देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे वानस्पत्यासि इत्यग्निहोत्रहवणीमादत्ते ॥ १० ॥ वेषाय त्वा [1.1.4b] इति शूर्पम् ॥ ११ ॥ उर्वन्तरिक्षमन्विहि [1. 1. 2p] इत्यभिप्रव्रज्याहवनीये निष्टपति—प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः [1. 1. 4c] इति ॥ १२ ॥ ॥ १८ ॥

यजमानमामन्त्रयते—यजमान हविर्निर्वप्स्यामि इति ॥ १ ॥ ओं निर्वप इति यजमानः प्रत्याह ॥ २ ॥ यदि यजमानः प्रवसेत् अग्ने हविर्निर्वप्स्यामि इति ब्रूयात् ॥ ३ ॥ अपरेण गार्हपत्यं प्रागीषं शकटमवस्थाप्य पुरोडाशीयानाधाय दक्षिणां युगधुरमभिमृशति—धूरसि धूर्व धूर्वन्तम् इति ॥ ४ ॥ एवमुत्तराम् ॥ ५ ॥ त्वं देवानामसि सस्नितमम् इत्युत्तरामीषामालभ्य जपति ॥ ६ ॥ विष्णुस्त्वाक्रंस्त इत्युत्तरे चक्रे दक्षिणं पादमत्यादधाति ॥ ७ ॥ अह्रुतमसि हविर्धानम् [l. c. g] इत्यारोहति ॥ ८ ॥ मित्रस्य त्वा चक्षुषा प्रेक्षे [l. c. i] इति परिणाहं प्रेक्षते ॥ ९ ॥ उरु वाताय [l. c. l] इत्यपच्छाद्यान्तः शकट उपविश्य दशहोतारं व्याख्याय यच्छन्तु त्वा पञ्च इति व्रीहीन् यवान् वाग्निहोत्रहवण्यां मुष्टीनोप्य तिरः पवित्रं शूर्पे निर्वपति—देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि [l. c. m] इति ॥ १० ॥ त्रीन्

1 Ga मृण्म°
2 D °न्नुत्तरे
3 Gb ब्रह्माणमभि°
4 Gb °गुः
5 D इमा अनु
6-6 DGa om.
7 Gb adds तस्मिन्
8 DGa om.

मुष्टीन् यजुषा तूष्णीं चतुर्थम् ॥ ११ ॥ निरुप्तेष्वन्वावपति भक्षाणामग्रेकाय ॥ १२ ॥ एवमेवोत्तरं पुरोडाशं निर्वपति—अग्नीषोमाभ्याम् [1. 1. 4m] इति पौर्णमास्याम् इन्द्राग्निभ्याम् इत्यमावास्यायामसंनयतः ॥ १३ ॥ अर्थे यदि पात्र्यां निर्वपेद् दक्षिणतः स्फ्यमवधाय तस्यां सर्वान् शकटमन्त्रान् जपेत् ॥ १४ ॥ ॥ १९ ॥

इदं देवानाम् [l. c. n] इति निरुप्तानभिमृशति । इदमु नः सह [l. c.] इति यतो ऽधि निर्वपति ॥ १ ॥ स्फात्यै त्वा नारात्यै[2] [l. c. o] इति हविरादायोपनिष्क्रामति—इदमहं निर्वरुणस्य पाशात् इति ॥ २ ॥ विहारमभिवीक्षते—सुवरभिविख्येषं वैश्वानरं ज्योतिः [l. c. p] इति ॥ ३ ॥ दृंहन्तां दुर्या द्यावापृथिव्योः [l. c. q] इति प्रत्यवरोहति ॥ ४ ॥ आहरति—उर्वन्तरिक्षमन्विहि [l. c. r] इति ॥ ५ ॥ अपरेणाहवनीयमुपसादयति—अदित्यास्त्वोपस्थे सादयामि [l. c. s] इति ॥ ६ ॥ परिददाति—अग्ने हव्यं रक्षस्व [l. c. t] ॥ अग्नीषोमौ हव्यं रक्षेथाम् ॥ इन्द्राग्नी हव्यं रक्षेथाम् इति यथादेवतम् ॥ ७ ॥ अग्ने हव्यं रक्षस्व [l. c.] इति वा ॥ ८ ॥ सशूकायामग्निहोत्रहवण्यां तिरः पवित्रमप आनीयोदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूयाभिमन्त्रयते ॥ ९ ॥ यथा पुरस्ताद् ब्रह्माणमामन्त्रयते—ब्रह्मन् प्रोक्षिष्यामि इति ॥ १० ॥ प्रसूतो ब्रह्मणा हविः प्रोक्षति—देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं प्रोक्षामि ॥ अग्नीषोमाभ्याम् [1.1.5e] इति यथादेवतमेकैकं त्रिस्त्रिः प्रोक्षति ॥ ११ ॥ हविः प्रोक्ष्याग्निमभिप्रोक्षति ॥ १२ ॥ हविः प्रोक्ष्य पात्राणि प्रोक्षति ॥ १३ ॥ उत्तानानि पर्यावृत्य शुन्धध्वं दैव्याय कर्मणे देवयज्यायै [l. c. f] इति त्रिः कुर्यात् ॥ १४ ॥ प्रोक्षणीनां शेषमित्याश्मरथ्यः सर्वाभिः प्रोक्षेदित्यालेखनः ॥ १५ ॥ ॥ २० ॥

सावित्रेण कृष्णाजिनमादायोत्करे त्रिरवधूनोत्यूर्ध्वग्रीवं बहिर्विशसनम्—अवधूतं रक्षो ऽवधूता अरातयः [l. c. g] इति ॥ १ ॥ उत्तरेण विहारं प्रतीचीनग्रीवमुत्तरलोमास्तृणाति—अदित्यास्त्वगसि [l. c. h] इति ॥ २ ॥ प्रति त्वा पृथिवी वेत्तु [l. c.] इति प्रतीचीं भसदं प्रतिसमस्यति ॥ ३ ॥ अनुत्सृजन् कृष्णाजिनमुलूखलमधिवर्तयति—अधिषवणमसि वानस्पत्यम् [l. c. i] इति ॥ ४ ॥ अनुत्सृजन्नुलूखलं हविरावपति—अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि [l. c. kl] इति त्रिर्यजुषा तूष्णीं चतुर्थम् ॥ ५ ॥ अद्रिरसि वानस्पत्यः [l. c. m] इति मुसलमा-

1 Ga भक्षानि, Gb भक्षाणां

2 DGa om.

3 D om.

4 Thus all mss.

5 D °अभिव°

दाय हविष्कृतं त्रिराह्वयति—हविष्कृदेहि इति ब्राह्मणस्य आद्रव इति राजन्यस्य आगहि इति वैश्यस्य ॥ ६ ॥ अवहन्ति—अव रक्षो दिवः सपत्नं वध्यासम् इति ॥ ७ ॥ प्रादुर्भूतेषु तण्डुलेषु उच्चैः समाहन्तवै इत्याग्नीध्रं प्रेष्यति ॥ ८ ॥ कुक्कुटोऽसि मधुजिह्वः इत्याग्नीध्रो ऽश्मानमादाय शम्यां वा सावित्रेणोच्चैर्दृषदुपले समाहन्ति—इषमाव दोर्जमावद [1. 1. 5o] इति ॥ ९ ॥ द्विर्दृषदि सकृदुपलायां त्रिः संचारयन् नव कृत्वः संपादयति ॥ १० ॥ ॥ २१ ॥

उत्तरतः शूर्पमुपोहति वैणवमैषीकं[1] नलमयं वा—वर्षवृद्धमसि [l. c. r] इति ॥ १ ॥ हविरुद्वपति—प्रति त्वा वर्षवृद्धं वेत्तु [l. c. s] इति ॥ २ ॥ उत्करे परापुनाति—परापूतं रक्षः परापूता अरातयः [l. c. t] इति ॥ ३ ॥ अपहतं रक्षः इति तुषान् प्रतिहन्ति ॥ ४ ॥ मध्यमे पुरोडाशकपाले तुषानोप्याधस्तात् कृष्णाजिनस्योपवपति—रक्षसां भागो ऽसि [l. c. u] इति ॥ ५ ॥ अप उपस्पृश्य विविनक्ति—वायुर्वो वि विनक्तु [l. c. v] इति ॥ ६ ॥ पात्र्यां तण्डुलान् प्रस्कन्दयति—देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु [l. c. w] इति ॥ ७ ॥ प्रस्कन्नानभिमृशति—देवेभ्यः शुन्धध्वम् इति ॥ ८ ॥ हविष्कृतं प्रेष्यति—त्रिष्फलीकर्तवै इति ॥ ९ ॥ या यजमानस्य पत्नी साभ्युदेत्यावहन्त्यन्यो[2] वा ॥ १० ॥ त्रिः सुफलीकृतान् करोति[3] ॥ ११ ॥ प्रज्ञातान् फलीकरणान् निधायोत्करे तण्डुलप्रक्षालनं निनयति—

त्रिष्फलीक्रियमाणानां यो न्यङ्गो अवशिष्यते ।
रक्षसां भागधेयमापस्तत् प्रवहतादितः ॥ [TB 3. 7. 6. 20]

इति ॥ १२ ॥ तथैव कृष्णाजिनमादायावधूनोति ॥ १३ ॥ ॥ २२ ॥

व्याख्यातमास्तरणम् ॥ १ ॥ कृष्णाजिने हीवग्रीवाः[4] (?) पश्चादुदीचीनकुम्बां शम्यां निदधाति—दिव स्कम्भनिरसि [1. 1. 6c] इति ॥ २ ॥ शम्यायां दृषदं धिषणासि पर्वत्या [l. c. d] इति । दृषद्युपलां धिषणासि पार्वतेयी [l. c. e] इति ॥ ३ ॥ दृषदि तण्डुलानधिवपति—देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टमधिवपामि ॥ अग्नीषोमाभ्याम् इति यथादेवतं त्रिर्यजुषा तूष्णीं चतुर्थम् ॥ ४ ॥ संततं पिनष्टि ॥ ५ ॥ प्राणाय त्वा [l. c. h] इति प्राचीमुपलां प्रोहति अपानाय त्वा [l. c.] इति प्रतीचीं[5] व्यानाय त्वा [l. c.] इति मध्यदेशे व्यवधारयति ॥ ६ ॥ दीर्घामनु प्रसितिमायुषे धाम् [l. c. i] इति प्राचीमिन्ततो ऽनु-

1 Gb °मिषीकं
2 Gc °न्या
3 D om.
4 Thus DGa; Gb भवग्रीवाः, Gc अभिग्रीवां
5 DGa प्रतीचीनं
6 DaGa प्रतीचीनम°, DbGc प्राचीनम°

प्रोहति ॥ ७ ॥ कृष्णाजिने पिष्टानि प्रस्कन्दयति—देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु [1. 1. 6k] इति ॥ ८ ॥ प्रस्कन्नान्यवेक्षते—अदब्धेन वश्चक्षुषावपश्यामि इति ॥ ९ ॥ हविष्कृतं प्रेष्यति—असंवपन्ती पिंषाणूनि कुरुतात् इति ॥ १० ॥ ॥ २३ ॥

पत्नी पिनष्टि दासी वा ॥ १ ॥ धृष्टिरसि ब्रह्म यच्छ [1. 1. 7a] इत्युपवेषमादाय गार्हपत्यात् प्रत्यञ्चावङ्गारौ निरूह्यान्यतरमुत्तरापरमवान्तरदेशं प्रतिनिरस्यति—अपाग्ने ऽग्निमामादं जहि निष्क्रव्यादं सेध [l. c. b] इति ॥ २ ॥ आ देवयजं वह [l. .c.] इत्यन्यतरमवस्थाप्य तस्मिन् कपालमुपदधाति—ध्रुवमसि पृथिवीं दृंह [l. c. d] इति ॥ ३ ॥ तत् सव्यस्याङ्गुल्याधिनिधाय कपाले ऽङ्गारमधिवर्तयति—निर्दग्धं रक्षो निर्दग्धा अरातयः [l. c. c] इति ॥ ४ ॥ धर्त्रमसि ॥ धरुणमसि [l. c. ef] इति पूर्वंपूर्वं कपालमुपदधाति । धर्मासि [l. c. g] इति दक्षिणम् चित स्थ [l. c. h] इत्युत्तरम् । महतां शर्धो ऽसि[2] इति षष्ठम् । चिदसि ॥ परिचिदसि इत्यवशिष्टे उपदधाति । तूष्णीं वाष्टौ संपादयति ॥ ५ ॥ एवमेवोत्तरं कपालयोगमुपदधाति ॥ ६ ॥ एकादश संपादयति द्वादश वैन्द्राग्नस्य ॥ ७ ॥ एवमनुपूर्वाण्येवैष्वत ऊर्ध्वं कर्माणि क्रियन्ते ॥ ८ ॥ अथैनान्यङ्गारैरभ्यूहति—भृगूणामङ्गिरसां तपसा तप्यध्वम् [l. c. i] इति ॥ ९ ॥ अत्र मदन्तीरधिश्रयति ॥ १० ॥ निष्टप्तोपवातायां पात्र्यां वाचंयमस्तिरः पवित्रं पिष्टानि संवपति—देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं संवपामि ॥ अग्नीषोमाभ्याम् इति यथादेवतं त्रिर्यजुषा तूष्णीं चतुर्थम् ॥ ११ ॥ ॥ २४ ॥

अथैनानि पवित्राभ्यामुत्पुनाति—देवो वः सवितोत्पुनातु [1. 1. 5a] इति पच्छो गायत्र्या ॥ १ ॥ प्रणीताभिर्हवींषि[3] संयौति ॥ २ ॥ अन्या वा यजुषोत्पूय ॥ ३ ॥ स्रुवेण प्रणीताभ्य आदाय वेदेनोपयत्योहरति ॥ ४ ॥ समापो अद्भिरग्मत [1. 1. 8b] इति पिष्टेष्वानयति ॥ ५ ॥ अद्भ्यः परि प्रजाता स्थ समद्भिः पृच्यध्वम् [l. c. d] इति तप्ताभिः प्रदक्षिणं पर्याप्लावयति ॥ ६ ॥ जनयत्यै त्वा सं यौमि [l. c. e] इति संयुत्य विभजते—यथाभागं व्यावर्तेथाम् इति ॥ ७ ॥ यतः पुनर्न संहरिष्यन् भवति ॥ ८ ॥ अथाभिमृशति—अग्नये त्वा [l. c. f] इति दक्षिणं पिण्डं अग्नीषोमाभ्यां त्वा इत्युत्तरं पौर्णमास्यां इन्द्राग्निभ्याम् इत्यमावास्यायामसंनयतः ॥ ९ ॥ इदमहं सेनाया अभीत्वर्यै मुखमपोहामि [TB 3. 7. 5. 1,2] इति वेदेन कपालेभ्यो ऽङ्गारानपोह्य मखस्य शिरो ऽसि [1. 1. 8g] इति दक्षिणं पिण्डमादाय दक्षिणे

1 D °लम्  
2 DGb शर्ध स्थ  
3 Gbc °म्या°

कपालयोगे ऽधिश्रयति—घर्मो ऽसि विश्वायुः [1. 1. 8*h*] इति ॥ १० ॥ एवमेवोत्तरं पिण्डमादायोत्तरेंकपालयोगे ऽधिश्रयति ॥ ११ ॥ एवमनुपूर्वाण्येवैष्वत ऊर्ध्वं कर्माणि क्रियन्ते ॥ १२ ॥ अत्राज्यं निर्वपति । उपरितरं[2] वा ॥ १३ ॥ ॥ २५ ॥

सर्वाणि कपालान्यभिप्रथयति—उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् [l. c. *i*] इति ॥ १ ॥ अनुक्रमनपूपाकृतिं कूर्मस्येव प्रतिकृतिमश्वशफमात्रं करोति ॥ २ ॥ पात्र्यामप आनीय प्रदक्षिणं लेपेनानुपरिमार्ष्टि—त्वचं गृह्णीष्व [l. c. *k*] इत्येकैकम् । नातिचारयति ॥ ३ ॥ त्रिः पर्यग्नि करोति—अन्तरितं रक्षो ऽन्तरिता अरातयः [l. c. *l*] इति ॥ ४ ॥ परि वाजपतिः कविः [4. 1. 2*t*] इति वा ॥ ५ ॥ देवस्त्वा सविता श्रपयतु [1. 1. 8*m*] इत्युल्मुकैः प्रतितपति ॥ ६ ॥ अग्निस्ते तनुवं माति धाक् [l. c. *n*] इति दर्भैरभिज्वलयति ॥ ७ ॥ अविदहन्तः श्रपयत [TB 3. 2. 8. 7] इति वाचं विसृजते ॥ ८ ॥ सं ब्रह्मणा पृच्यस्व [1. 1. 8*p*] इति वेदेन पुरोडाशे साङ्गारं भस्माध्यूहति ॥ ९ ॥ अथाङ्गुलिप्रक्षालनं पात्रीनिर्णेजनमित्युल्मुकेनाभितप्य स्फ्येनान्तर्वेदि तिस्रः प्राचीरुदीचीर्वा लेखा लिखित्वासंस्यन्दयन् प्रत्यगपवर्गं त्रिर्निनयति[3]—एकताय स्वाहा [l. c. *q*] इत्येतैः प्रतिमन्त्रम् ॥ १० ॥ ॥ २६ ॥

इति दर्शपूर्णमासे प्रथमः प्रश्नः ॥

---

1 Gb °रे
2 Gab °रां
3 D °नयन्

4–4 D प्रथमः, Ga प्रथमः खण्डः; Gc gives no colophon.

देवस्य त्वा सवितुः प्रसवे इति स्फ्यमादाय तृणेन संमृशति—शतभृष्टिरसि वानस्पत्यो द्विषतो वधः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः इति ॥ १ ॥ अपरेणाहवनीयं वेदिर्भवति यजमानमात्र्यपरिमिता वा प्राची ॥ २ ॥ यथा हवीँष्यासन्नानि संभवेदेवं तिरश्ची ॥ ३ ॥

वेदेन वेदिं विविदुः पृथिवीँ[1] सा पप्रथे पृथिवी पार्थिवानि ।
गर्भं बिभर्ति भुवनेष्वन्तस्ततो यज्ञो जायते विश्वदानिः ॥ [TB 3. 3. 9. 10]

इति पुरस्तात् स्तम्बयजुषो वेदेन वेदिं त्रिः संमार्ष्ट्युपरिष्टाद् वा ॥ ४ ॥ पूर्वार्धाद् वितृतीयदेशाद् वेदेः स्तम्बयजुर्हरति ॥ ५ ॥ पृथिव्यै[2] वर्मासि इत्यन्तर्वेदि प्रागग्रमुदगग्रं वा दर्भं निधाय तस्मिन् स्फ्येन प्रहरति—पृथिवि देवयजन्योषध्यास्ते मूलं मा हिँसिषम् [1. 1. 9d] इति ॥ ६ ॥ अपहतो ऽररुः पृथिव्यै [l. c. i] इति स्फ्येन सतृणान् पाँसूनपादाय हरति—व्रजं गच्छ गोस्थानम् [l. c. k] इति ॥ ७ ॥ वर्षतु ते द्यौः [l. c. l] इति वेदिं प्रत्यवेक्षते ॥ ८ ॥ उत्तरतो निवपति—बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ अररुस्ते दिवं मा स्कान् [l.c. qr] इति ॥ ९ ॥ स उत्करो भवति ॥ १० ॥ तमाग्नीध्रो गृह्णाति—अररो दिवं मा पप्तः इति ॥ ११ ॥ एवमेव द्वितीयँ हरत्येवं तृतीयम् ॥ १२ ॥ अपहतो ऽररुः पृथिव्यै देवयजन्यै [l. c. i] इति द्वितीयमपादत्ते ॥ १३ ॥ अपहतो ऽररुः पृथिव्या अदेवयजनः [l. c. n] इति तृतीयम् ॥ १४ ॥ ॥ १ ॥

तूष्णीं चतुर्थं हृत्वा स्फ्येन वेदिं परिगृह्णाति ॥ १ ॥ वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसा [l. c. s] इति दक्षिणतः ॥ २ ॥ रुद्रास्त्वा [l. c.] इति पश्चात् ॥ ३ ॥ आदित्यास्त्वा [l. c.] इत्युत्तरतः ॥ ४ ॥ स्फ्येन वै सर्वं वेदिकर्म क्रियते ॥ ५ ॥ ततः संप्रेष्यति—

इमां नराः कृणुत वेदिमेत्य वसुमतीँ रुद्रवतीमादित्यवतीम् ।

1 Ga. °ज्ञ°    2 DGa °वी–

वर्ष्मन् दिवो नाभा पृथिव्या यथायं यजमानो न रिष्येत् ॥ [TB 3.7.7.13,14]
एत देवेभ्यो जुष्टमदित्या उपस्थे ।
इमां देवा अजुषन्त सर्वे ।
रायस्पोषा यजमानं विशन्तु ॥

इति ॥ ६ ॥ अथास्या उत्तमां त्वचं समुद्धत्योत्करं गमयति ॥ ७ ॥ अथैनां खनति द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा सीतामात्रीं[1] रथवर्त्ममात्रीं यावत् पार्ष्ण्याः श्वेतं तावतीं वा—देवस्य सवितुः सवे कर्म कृण्वन्ति वेधसः [1. 1. 9t] इति ॥ ८ ॥ मूलं छिनत्ति ॥ ९ ॥ आ प्रतिष्ठायै खनति ॥ १० ॥ प्राञ्चौ वेद्यंसावुन्नयत्यभित आहवनीयं प्रतीची श्रोणी अभितो गार्हपत्यम् ॥ ११ ॥ मध्ये संनतां प्राचीमुदीचीं प्रवणां पुरस्तादंहीयसीं पश्चात् प्रथीयसीं दक्षिणतो वर्षीयसीं पुरीषवतीं करोति ॥ १२ ॥ यत् पुरीषमतिशिष्येत उत्करं[2] तद् गमयति ॥ १३ ॥ यत् तृणं मूलं वातिशेते स्फ्येन तच्छिनत्ति न नखेन ॥ १४ ॥ ॥ २ ॥

आहार्यपुरीषां पशुकामस्य वेदिं कुर्वीत खननपुरीषां प्रजाकामस्येति विज्ञायते ॥ १ ॥ उद्धुप्य नित्यमन्यदावपेदित्येकमखातायामेवान्यदावपेदित्यपरम् ॥ २ ॥ यत्र खनेत् तत्र खननमन्त्रं जपेत् ॥ ३ ॥ अधिश्रितेषु हविष्षु पौर्णमास्यां वेदिं कुर्यात् ॥ ४ ॥ पूर्वेद्युः प्राग् बर्हिष आहरणादमावास्यायाम् ॥ ५ ॥ यत् प्रागुत्तरस्मात् परिग्रोहात् तत् कृत्वोपवसति ॥ ६ ॥ समानमितरत् ॥ ७ ॥ ब्रह्माणमामन्त्रयते—ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामि इति ॥ ८ ॥ प्रसूतो ब्रह्मणा स्फ्येन वेदिं परिगृह्णाति—ऋतमसि [l. c. u] इति दक्षिणतः ऋतसदनमसि [l. c.] इति पश्चात् ऋतश्रीरसि [l. c. v] इत्युत्तरतः ॥ ९ ॥ अथैनां स्फ्येन प्रतीचीं योयुप्यते—धा असि स्वधा असि [l. c.] इति ॥ १० ॥ अनुवाकशेषेण पश्चार्धे वित्तृतीयदेशे वेदेः स्फ्यं तिर्यञ्चं स्तब्ध्वा संप्रेष्यति—प्रोक्षणीरासादयेध्माबर्हिरुपसादय ॥ स्रुवं च स्रुचश्च संमृड्ढि ॥ पत्नीं[3] संनह्याज्येनोदेहि इति ॥ ११ ॥ आग्नीध्र एतानि कर्माणि कुर्यादित्येकमध्वर्युरित्यपरम् ॥ १२ ॥ उपनिनीय प्रोक्षणीः स्फ्यस्य वर्त्मन् दक्षिणेन स्फ्यमसंस्पृष्टा बर्हिरासादयति ॥ १३ ॥ यं द्विष्यात् तं ध्यायेत् ॥ १४ ॥ उत्करे पुरस्तात् प्रत्यञ्चं स्फ्यमुदस्यति—शतभृष्टिरसि वानस्पत्यो द्विषतो वधः [2. 6. 4. 1] इति ॥ १५ ॥ यं द्वेष्टि तस्य नाम गृह्णाति ॥ १६ ॥ हस्तावचनिज्य स्फ्यं प्रक्षालयति । नाग्रं प्रतिमुञ्चति ॥ १७ ॥ वेदिं कृत्वा नानवनिज्य हस्तौ पात्राणि

1 D °रे
2 Gb om.
3 DbGo °प्र°

पराहृण्यात् ॥ १८ ॥ उत्तरेण प्रणीताः पश्चात् प्रागग्रमिध्माबर्हिषी उपसादयति ॥ १९ ॥ ॥ ३ ॥

दक्षिणमिध्ममुत्तरं बर्हिः ॥ १ ॥ स्रुवं च स्रुचश्च प्राशित्रहरणं चादाय गार्हपत्ये वाहवनीये वा निष्टपति—प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः [1.1.10a] इति ॥ २ ॥ वेदाग्रैः प्रतिविभज्य संमार्ष्टि । अप्रतिविभज्य वा ॥ ३ ॥ स्रुवमग्र उत्तानं धारयमाणोऽग्नेरन्तरतोऽभ्याकारं सर्वतो बिलमभिसमाहारं तन्मूलैर्दण्डम्—गोष्ठं मा निर्मृक्षम् [l. c. c] इति ॥ ४ ॥ जुहूं संमार्ष्ट्युत्तानां धारयमाणोऽग्नेरन्तरतोऽभ्याकारं प्राचीं मध्यैर्बाह्यतः प्रतीचीं मूलैर्दण्डम्—वाचं प्राणं मा निर्मृक्षम् [l. c. d] इति ॥ ५ ॥ उपभृतं संमार्ष्टि तिरश्चीं धारयमाणोऽग्नेरन्तरतोऽभ्याकारं प्रतीचीं मध्यैर्बाह्यतः प्राचीं मूलैर्दण्डम्—चक्षुः श्रोत्रं मा निर्मृक्षम् [l. c.] इति ॥ ६ ॥ यथा स्रुवं तथा ध्रुवाम्—प्रजां योनिं मा निर्मृक्षम् [l. c.] इति ॥ ७ ॥ रूपं वर्णं मा निर्मृक्षम् ॥ वाजिनं[4] त्वा सपत्नसाहं संमार्ज्मि [l. c. c] इति प्राशित्रहरणम् ॥ ८ ॥ न संमृष्टानि चासंमृष्टानि च सँस्पर्शयेत् ॥ ९ ॥ यदि सँस्पर्शयेत् पुनरेव निष्टप्य संमृज्यात् ॥ १० ॥ संमृष्टानि निष्टपति—अग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि [l. c. b] इति ॥ ११ ॥ ॥ ४ ॥

अथैतानि संमार्जनान्यद्भिः सँस्पृश्याग्नौ प्रहरति ॥ १ ॥ यतरस्मिन् निष्टपति—

दिवः शिल्पमवततं पृथिव्याः ककुभि श्रितम् ।
तेन वयँ सहस्रवल्शेन सपत्नं नाशयामसि स्वाहा ॥ [TB 3. 3. 2. 1]

इति ॥ २ ॥ उत्करे वोदस्यति ॥ ३ ॥ पत्नीमूर्ध्वज्ञुमासीनाँ संनह्यति तिष्ठन्तीं वा । स्वयं वा पत्न्यात्मानं मौञ्जेन योक्त्रेणान्यतरतः पाशेनाभ्यन्तरं वाससो बाह्यतो वा—आशासाना सौमनसम् [1. 1. 10e] इति ॥ ४ ॥ उत्तरेण नाभिं निष्टर्क्यं ग्रन्थिं कृत्वा दक्षिणतो नाभेः पर्यूहते ॥ ५ ॥ अग्ने गृहपते उप मा ह्वयस्व इति गार्हपत्यमभिमन्त्रयते ॥ ६ ॥ देवानां पत्नीरुप मा ह्वयध्वम् इति देवपत्नीरपरेण गार्हपत्यम् ॥ ७ ॥ देवपत्न्या लोकमुपतिष्ठते—पत्नि पत्न्येष ते लोको नमस्ते अस्तु मा मा हिँसीः इति ॥ ८ ॥ देशाद् दक्षिणत उदीच्युपविशति—

इन्द्राणीवाविधवा भूयासमदितिरिव सुपुत्रा ।

1 G प्राग् for प्रागग्रम्
2 DaGac add स, Db add -मस-
3–3 D जुहूमुत्तानां संमार्ष्टि प्राची
4 DGb वाजि
5 Gb संमार्ष्टि
6 G लोक उ०

अस्थूरि त्वा गार्हपत्योपनिषदे सुप्रजास्त्वाय ॥ [TB 3. 7. 5. 10,11]

इति ॥ ९ ॥ **गार्हपत्यमभिमन्त्रयते**—सुप्रजसस्त्वा वयम् [1. 1. 10*f*] **इत्येतया** ॥ १० ॥

मम पुत्राः शत्रुहणो अथो मे दुहिता विराट् ।
उताहमस्मि संजया पत्युर्मे श्लोक उत्तमः ॥

**इति च** ॥ ११ ॥ एषा ते बिलं विष्यतु **इति सर्पिर्धानस्य बिलं विष्यति** ॥ १२ ॥ अदितिरस्यच्छिद्रपत्रा **इत्याज्यस्थालीमादाय** ॥ १३ ॥ ॥ ५ ॥

**तस्यां पवित्रान्तर्हितायां प्रभूतमाज्यं निर्वपति**—महीनां पयो ऽस्योषधीनां रसस्तस्य ते ऽक्षीयमाणस्य निर्वपामि देवयज्यायै [TB. 3. 3. 3. 5] **इति** ॥ १ ॥ **दक्षिणाग्नावधिश्रयति**—इदं विष्णुर्वि चक्रमे [1. 2. 13*e*] **इति** ॥ २ ॥ **विलाप्य वा निर्वपति** ॥ ३ ॥ इषे त्वा [1. 1. 1*a*] **इति दक्षिणार्धे गार्हपत्यस्याधिश्रयति** ॥ ४ ॥ ऊर्जे त्वा [l. c.] **इत्यपादाय वेदेनोपयम्यै पत्न्या उपयच्छति** ॥ ५ ॥ **तत् सा निमील्याउच्छ्वसन्त्यवेक्षते**—महीनां पयो ऽस्योषधीनां रसो ऽदब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वाय [1.1. 10*k*] **इति** ॥ ६ ॥ तेजो ऽसि **इत्युत्तरार्धे गार्हपत्यस्याधिश्रयति** ॥ ७ ॥ तेजसे त्वा **इत्यपादाय वेदेनोपहत्याहरति**—तेजो ऽसि तेजो ऽनुप्रेहि [l. c. *l*] **इति** ॥ ८ ॥ **आहवनीये ऽधिश्रयति**—अग्निस्ते तेजो मा वि नैत् [l. c.] **इति** ॥ ९ ॥ **उत्तरेण प्रोक्षणीः स्फ्यस्य वर्त्मन् सादयति**—अग्नेर्जिह्वासि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव [l. c. *mn*] **इति** ॥ १० ॥ **अथैनदध्वर्युश्च यजमानश्च निमील्य वीक्ष्यानुच्छ्वसन्ताववेक्षेते**—आज्यमसि [1. 6. 1*b*] **इति प्रतिपद्य** तस्य ते भक्षीय [l. c.] **इत्यन्तेन** ॥ ११ ॥ **अथैनदुदगग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पुनाति**—शुक्रमसि ॥ ज्योतिरसि ॥ तेजो ऽसि [1. 1. 10*o*] **इत्येतैर्मन्त्रैः** ॥ १२ ॥ **आज्यवतीभ्यां पवित्राभ्यां प्रोक्षणीरुत्पुनाति**—देवो वः सवितोत्पुनातु [l. c. *p*] **इति पच्छो गायत्र्या** ॥ १३ ॥ ॥ ६ ॥

**अनिष्कासिना स्रुवेणान्तर्वेद्याज्यानि गृह्णाति** ॥ १ ॥ **वेदे स्रुचो ऽस्याधाय चतुर्गृहीतं जुह्वाम्**—शुक्रं त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि [l. c. *q*] **इत्येतैस्त्रिभिर्मन्त्रैः** । पञ्चानां त्वा वातानाम् [1. 6. 1*c*] **इति चतुर्थम्** ॥ २ ॥ **एवमे-**

1 Gc °मनुम°
2 Ga °पात्रा, Gc °पवित्रा
3 Ga °स्य
4 Ga वेदेनोपत्या°, Gb वेदेनोपयाम्या°
5 Gb उद्ह°
6 Gc °म°
7 Gc °मु°
8 DGa om.
9 Gab मुं°

वोत्तरैर्मन्त्रैरुपभृति ध्रुवायामिति गृह्णाति ॥ ३ ॥ अष्टगृहीतमुपभृति चतुर्गृहीतं ध्रुवायां पञ्चगृहीतं पशुकामस्य ॥ ४ ॥ तैरेव मन्त्रैर्यजमानो ऽनुमन्त्रयते[1] ॥ ५ ॥ अपि वाध्वर्यवैरेवाध्वर्युर्गृह्णीयात् ॥ ६ ॥ याजमानैर्यजमानो ऽनुमन्त्रयते ॥ ७ ॥ भूयो जुह्वां गृह्णात्यल्पीय उपभृति भूयिष्ठं ध्रुवायाम् ॥ ८ ॥ समंबिलं धार्यमाणो जुह्वां गृह्णाति मध्यदेश उपभृति भूमौ[2] प्रतिष्ठितायां ध्रुवायाम् ॥ ९ ॥ नान्तर्वेदि गृहीतस्य पश्चात् प्रतिहरन्ति[3] ॥ १० ॥ नोत्कर आज्यं किंचन सादयति ॥ ११ ॥ आपो देवीरग्रेपुवः [1. 1. 5b] इति प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्रयते—ब्रह्मन् प्रोक्षिष्यामि इति ॥ १२ ॥ प्रसूतो ब्रह्मणा विषायेध्मं[4] प्रोक्षति—कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा स्वाहा [1. 1. 11a] इति ॥ १३ ॥ वेदिरसि [l. c. b] इति वेदिं बर्हिरसि [l. c. c] इति बर्हिः । एकैकं त्रिस्त्रिः प्रोक्षति ॥ १४ ॥ अन्तर्वेदि पुरोग्रन्थि बर्हिरासाद्य प्रोक्षति—दिवे त्वा [l. c. d] इत्यग्रं अन्तरिक्षाय त्वा [l. c.] इति मध्यं पृथिव्यै त्वा [l. c.] इति मूलम् ॥ १५ ॥ स्रुच्यग्राण्युपपाय्य मूलान्युपपाययति ॥ १६ ॥ ॥ ७ ॥

सहस्रुचा पुरस्तात् प्रत्यञ्चं ग्रन्थिं प्रत्युक्षति—पोषाय त्वा इति ॥ १ ॥ यत् प्रोक्षणीनामुच्छिष्यति[6] तदन्तर्वेदि निनयति—स्वधा पितृभ्यः [l. c. e] इति ॥ २ ॥ दक्षिणायै श्रोणेरुपक्रम्योत्तरस्याः संततां धारां स्रावयति[7] ॥ ३ ॥ पूषा ते ग्रन्थिं विष्यतु इति बर्हिर्विस्रंसयति ॥ ४ ॥ ऊर्ध्वं प्राञ्चमुद्गूढं प्रत्यञ्चमायच्छति[8] ॥ ५ ॥ पुरस्तात् प्रस्तरं गृह्णाति । नानुमार्ष्टि न प्रतिमार्ष्टि नावधूनोति । कर्षन्निवापादत्ते[9]—विष्णो स्तूपो ऽसि [l. c. g] इति ॥ ६ ॥ तस्मिन् पवित्रे अपिसृजति—

अयं प्राणश्चापानश्च यजमानमपिगच्छताम् ।
यज्ञे ह्यभूतां पोतारौ पवित्रे हव्यशोधने ॥ [TB 3. 7. 4. 12]

इति ॥ ७ ॥ ततः संप्रेष्यति—

स्तृणीत बर्हिः परिधत्त वेदिं जामिं मा हिंसीरमुया शयाना ।
दर्भैः स्तृणीत हरितैः सुवर्णैर्निष्का इमे यजमानस्य ब्रध्ने ॥

1 Gac °येत
2 Gb भूमि-
3 Ga° ति, Gb प्रहरन्ति, Gc परिहरन्ति
4 Ga विस्रस्येध्मं
5 Gb om.
6 Gbc °ष्येत
7 D सावित्र्या वपति
8 D °च्छेत्
9 Da °धत्ते, Db °धाते, Gb °पाद्दे for °पादत्ते
10 D अभिसृ°

इति ॥ ८ ॥ ब्रह्मणे प्रस्तरं प्रयच्छति[1]—प्राणापानाभ्यां त्वा सतनुं करोमि इति ॥ ९ ॥ ब्रह्मा यजमानाय—यजमाने प्राणापानौ दधामि इति ॥ १० ॥ मयि प्राणापानौ इति यजमानः प्रत्याह ॥ ११ ॥ शुल्वं स्तृणाति—ऊर्णाम्रदसं त्वा स्तृणामि [1. 1. 11h] इति ॥ १२ ॥ आ दक्षिणायै श्रोणेः[2] उपयम्योत्तरस्मादंसात् संततं सर्वस्यां वेद्यां बर्हिः स्तृणाति बहुलमनतिदृश्नम्—ऊर्णाम्रदसं त्वा स्तृणामि [l. c.] इति त्रिधातु पञ्चधातु वा प्रागपवर्गं प्रत्यगपवर्गं वा ॥ १३ ॥ अग्रैर्मूलान्याच्छादयति ॥ १४ ॥ ॥ ८ ॥

धातौधातौ मन्त्रं जपति ॥ १ ॥ अत्रैके ऽनूयाजार्थं उल्मुके निरूहन्ति ॥ २ ॥ प्रस्तरं धारयमाणो ऽपरेणाहवनीयँ सँस्पृष्टान् परिधीन् परिदधात्युदगग्रं मध्यमम्—गन्धर्वो ऽसि विश्वावसुः [l. c. i] इति इन्द्रस्य बाहुरसि [l. c. k] इति दक्षिणं मित्रावरुणौ त्वा [l. c. l] इत्युत्तरम् ॥ ३ ॥ अभ्यग्रमाहवनीयं दक्षिणमवागग्रमुत्तरम् ॥ ४ ॥ एवमनुपूर्वाण्येवैष्वत ऊर्ध्वं कर्माणि क्रियन्ते ॥ ५ ॥ सूर्यस्त्वा पुरस्तात् पातु [l. c. m] इत्याहवनीयमभिमन्त्र्य मध्ये ऽग्नेरूर्ध्वे आघारसमिधावादधाति ॥ ६ ॥ वीतिहोत्रं त्वा कवे [l. c. n] इति दक्षिणाम् ॥ ७ ॥ तूष्णीमुत्तराम् ॥ ८ ॥ बर्हिषः समावनन्तर्गर्भौ[5] विधृती कृत्वा मध्ये वेदेरुदीचीनाग्रे निदधाति—विशो यन्त्रे स्थः [l. c. o] इति ॥ ९ ॥ विधृत्योः प्रस्तरँ सादयति—वसूनां रुद्राणामादित्यानां सदसि सीद [l. c. p] इति ॥ १० ॥ प्रस्तरे जुह्वम्—जुहूरसि घृताची [l. c. q] इति ॥ ११ ॥ समं मूलैर्दण्डं करोति ॥ १२ ॥ उत्तरेण जुह्वमुपभृतं प्रतिकृष्टतरामधस्ताद् विधृत्योः उपभृदसि [l. c.] इति ॥ १३ ॥ उत्तरेणोपभृतं ध्रुवां प्रतिकृष्टतरामुपरिष्टाद् विधृत्योः ध्रुवासि [l. c.] इति ॥ १४ ॥ असँस्पृष्टाः सादयति ॥ १५ ॥ दक्षिणेन जुह्वँ स्रुवँ सादयति । उत्तरेण वा ध्रुवाम्—ऋषभो ऽसि शाक्वरो घृताचीनां सूनुः प्रियेण नाम्ना प्रिये सदसि सीद [TB 3. 7. 6. 10] इति ॥ १६ ॥ ॥ ९ ॥

अथैनौ अभिमन्त्रयते—एता असदन् [1. 1. 11r] इत्यनुवाकशेषेण ॥ १ ॥ विष्णुनि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानि इत्याज्यान्यभिमन्त्रयते ॥ २ ॥ सस्रुवामाज्यस्थालीं वेदं पात्रीं चादायापरेण गार्हपत्यमुपविश्य इदमहं सेनाया अभीत्वर्यै

1 Gb om.
2 D °णया
3 Gb उपकम्योत्त°
4 G °भवाग्र°
5 Ga adds दर्भौ
6 DGac अग्र°
7 D °नम्, Gb °नाम्

मुखमपोहामि [TB 3. 7. 5. 1,2] इति वेदेन पुरोडाशात् साङ्गारं भस्मापोह्याभिमन्त्रयते—सूर्यं ज्योतिर्विभाहि महत इन्द्रियाय बलाय इति ॥ ३ ॥ पात्र्यामुपस्तृणाति—

स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि ।

तस्मिन् सीदामृते[1] प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः ॥ [1. c. 2, 3]

इति ॥ ४ ॥ आज्येनाभिघारयति—

आप्यायतां घृतयोनिरग्निर्हव्यानुमन्यताम् ।

खमङ्क्ष्व त्वचमङ्क्ष्व सुरूपं त्वा वसुविदं

पशूनां तेजसाग्नये जुष्टमभिघारयामि ॥ [1. c. 2]

इति दक्षिणम् । तूष्णीमुत्तरम् ॥ ५ ॥ सांनाय्यमभिघारयति—

यस्त आत्मा पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे ।

आत्मन्वान् सोम घृतवान् हि भूत्वा देवान् गच्छ सुवर्विन्दे[2] यजमानाय मह्यम् ॥ [1. c. 3] इति ॥ ६ ॥ पात्र्यामुद्वासयति—

आर्द्रः प्रथस्नुर्भुवनस्य गोपाः ।

शृत उत्स्नाति जनिता मतीनाम् ॥ [1. c.]

इति ॥ ७ ॥ न पर्यावर्तयति न भिनत्ति ॥ ८ ॥ ॥ १० ॥

इरा भूतिः पृथिव्यै रसो मोत्क्रमीत् [1. c.] इति कपालानि प्रत्यनक्ति ॥ १ ॥ अथैनावपरिवर्गमग्निकौ[3]पमनक्ति—देवस्त्वा सविता मध्वानक्तु [1. 3. 5d] इति ॥ २ ॥ उपरिष्टादभ्यज्याधस्तादुपानक्ति ॥ ३ ॥ स्वक्रमकूर्मपृषन्तं[4] कृत्वा सांनाय्ये चालंकृत्यान्तर्वेदि चतुर्होत्रा पौर्णमास्याँ हवीँष्यासादयेत् । पञ्चहोत्रामावास्यायाम् ॥ ४ ॥ भूर्भुवः सुवः इति प्रथमायां पौर्णमास्याम् ॥ ५ ॥ संवत्सरे पर्यागत एताभिरेवासादयेत् ॥ ६ ॥ प्रथम एव संवत्सर इत्याश्मरथ्यः । संवत्सरेसंवत्सर इत्यालेखनः ॥ ७ ॥ अपरेण स्रुचः पुरोडाशावासादयति ॥ ८ ॥ मध्ये वेदेः सांनाय्यकुम्भ्यौ संधाय दक्षिणस्यां वेदिश्रोण्याँ शृतमासादयत्युत्तरस्यां दधि ॥ ९ ॥ अपि वा पूर्वँ[5] शृतमपरं दधीत्येकेषाम् ॥ १० ॥ अग्रेण ध्रुवां वेदं सादयति—

अयं वेदः पृथिवीमन्वविन्दद् गुहा सतीं गहने गह्वरेषु ।

स विन्दतु यजमानाय लोकमच्छिद्रं यज्ञं भूरिकर्मा करोतु ॥ [TB 3. 7. 6. 13] इति ॥ ११ ॥ वेद्यन्तान् परिस्तीर्य होतृषदनं कल्पयति ॥ १२ ॥ जघनेन

1 D °तं

2 TaitBr. सुवर्विद

3 DGac °निका°

4 DGb स्वक्तकूर्मपृष्टन्तं, Gc स्वक्तं कूर्मपृषदन्तं; Ga missing.

5 D:°श°

वेदिमुदगग्रैर्दर्भैः सँस्तीर्णां भवति ॥ १३ ॥ ॥ ११ ॥

ततः संप्रेष्यति—अग्नये समिध्यमानायानुब्रूहि इति ॥ १ ॥ आसीन इध्मं प्रणवेप्रणवे समिधमादधाति ॥ २ ॥ यत्राभिजानाति समिद्धो अग्न आहुत [TB 3. 5. 2. 3] इति तदेकामनूयाजसमिधमवशिष्य सर्वमिध्मशेषमभ्याधाय वेदेनाहवनीयं त्रिरुपवाजयति ॥ ३ ॥ स्रुवेण ध्रुवाया आज्यमादाय वेदेनोपयम्योत्तरं परिधिसंधिमन्ववहृत्य दक्षिणाप्राञ्चमासीनः संततमृजुमाघारमाघारयति ॥ ४ ॥ प्रजापतिं मनसा ध्यायन् स्रुवेणाज्यस्थाल्या आज्यमादाय ध्रुवामाप्याययति—आ प्यायतां ध्रुवा घृतेन [1.6.5a] इत्येतया ॥ ५ ॥ तत्रैषोऽत्यन्तप्रदेशो यत्र क्व च ध्रुवाया आज्यमादत्त एवमेवैनमाप्याययति। ध्रुवाया एवानादिष्टाज्यार्थाः क्रियन्ते ॥ ६ ॥ ततः संप्रेष्यति—अग्नीत् परिधीँश्चाग्निं च त्रिस्त्रिः संमृड्ढि इति ॥ ७ ॥ स्फ्यैरिध्मसंनहनैराग्नीध्रः परिधीँश्चाग्निं च त्रिस्त्रिः संमार्ष्टि ॥ ८ ॥ तूष्णीं परिधीन् ॥ ९ ॥ अग्ने वाजजिद् वाजं त्वा सरिष्यन्तं वाजं जेष्यन्तं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्याय इत्यग्निं संमार्ष्टि ॥ १० ॥ अग्रेण जुहूं ध्रुवां चोत्तानौ पाणी प्रतिष्ठाप्य ॥ ११ ॥ ॥ १२ ॥

आहवनीयायाञ्जलिं करोति—भुवनमसि वि प्रथस्व ॥ अग्ने यष्टरिदं नमः [1. 1. 12ab] इति ॥ १ ॥ जुहूमादत्ते—जुह्वेहि [l. c. c] इति । उपभृतम् उपभृदेहि [l. c. d] इति ॥ २ ॥ उपभृति जुहूमत्यादधाति—सुयमे मे अद्य घृताची भूयास्तँ स्वावृतौ सूपावृतौ इति ॥ ३ ॥ तत्रैषोऽत्यन्तप्रदेशो यत्र क्वचोपभृति जुहूमत्यादधाति मुखत एवाध्यूहति मुखत उपावहरति ॥ ४ ॥ न च सँशिञ्जयति नाभिदेशे च स्रुचौ धारयते ॥ ५ ॥ समं प्राणैरित्येकेषाम् ॥ ६ ॥ अग्रेण ध्रुवामनवक्रिमन् प्रस्तरमत्याक्रामति—अग्नाविष्णू मा वामव क्रमिषम् [l. c. e] इति ॥ ७ ॥ दक्षिणतोऽवतिष्ठते—विष्णो स्थानमसि [l. c. h] इति ॥ ८ ॥ अन्तर्वेदि दक्षिणः पादो भवति। अवघ्र इवै सव्यः ॥ ९ ॥ दक्षिणं परिधिसंधिमन्ववहृत्योर्ध्वस्तिष्ठन्नन्वारब्धे यजमाने प्राञ्चमुदञ्चं संततमृजुमाघारमाघारयति—समारभ्योर्ध्वो ऽध्वरः [l. c. k] इति ॥ १० ॥ न्यञ्चमाघारयेद् वृष्टिकामस्योर्ध्वं स्वर्गकामस्य ॥ ११ ॥ एतं भूयिष्ठमाहुतीनां जुहोति ॥ १२ ॥ हुँत्वा हुँ प्राणिति ॥ १३ ॥ हिँ वृद्धाः [l. c. n] इति स्रुचमुद्गृह्णाति ॥ १४ ॥ असँस्पर्शयन् स्रुचौ प्रत्याक्रामति— ॥ १५ ॥ ॥ १३ ॥

1 DGe त्वंतः
2 D सँसि°
3 D अवघ्रः (omitting इव), Ga अविक्लुवन्
4–4 Gbc हुत्वानु-; others as above.
5 Thus all the mss. हिँ not in TaitS.

पाहि माग्ने दुश्चरितादा मा सुचरिते भज [1. 1. 12o] इति ॥ १ ॥ एते एवाक्रमणप्रत्याक्रमणे मन्त्रवती भवतः ॥ २ ॥ तत्रैषो ऽत्यन्तप्रदेशो या उत्तरतः सत्या आहुतीर्जुहोत्युत्तरं परिधिसंधिमन्ववहृत्य ता जुहोति । या दक्षिणतो दक्षिणं परिधिसंधिमन्ववहृत्य ताः ॥ ३ ॥ दक्षिणेनैव दक्षिणाक्रामति सव्येनोदङ् । अपि वा सव्येन दक्षिणा दक्षिणेनोदङ् ॥ ४ ॥ प्रत्याक्रम्य जुह्वा ध्रुवां समनक्ति—मखस्य शिरो ऽसि सं ज्योतिषा ज्योतिरङ्क्ताम् [l. c. *p*] इति[2] ॥ ५ ॥ उर्वीतें रायः इति स्रुवेण ध्रुवाया आज्यमादाय सुवीराय स्वाहा इति जुहूं प्रत्यभिघारयति ॥ ६ ॥ यज्ञेन यज्ञः संततः इति जुह्वा ध्रुवाम् ॥ ७ ॥ निधाय स्रुचौ वेदेरव्यन्तं[3] तृणमादायोत्तरत उत्करे प्राञ्चौ प्रवरायावतिष्ठेते—

क इदमध्वर्युर्भविष्यति स इदमध्वर्युर्भविष्यति ।
यज्ञो यज्ञस्य विष्णो स्थाने तिष्ठामि ।
वागार्त्विज्यं करोतु मन आर्त्विज्यं करोतु ।
वाचं प्रपद्ये । भूर्भुवः सुवः ॥

इति पूर्वो ऽध्वर्युः ।

क इदमग्नीद् भविष्यति स इदमग्नीद् भविष्यति ।
यज्ञो यज्ञस्य विष्णो स्थाने तिष्ठामि ।
वागार्त्विज्यं करोतु मन आर्त्विज्यं करोतु ।
वाचं प्रपद्ये । भूर्भुवः सुवः ॥

इति ॥ ८ ॥ ॥ १५ ॥

अपर आग्नीध्रः ॥ १ ॥ स्फ्यं चेध्मसंनहनानि चान्वारभेते ॥ २ ॥ ब्रह्माणमामन्त्रयते—ब्रह्मन् प्रवरायाश्रावयिष्यामि इति ॥ ३ ॥ [4]ततो ब्रह्मणा प्रसूतो[4] ऽध्वर्युराश्रावयति—आ श्रावय [1. 6. 11. 1] इति ओ श्रावय इति वा ॥ ४ ॥ अस्तु श्रौषट् [l. c.] इत्याग्नीध्रः प्रत्याश्रावयति ॥ ५ ॥ तत्रैषो ऽत्यन्तप्रदेशो यत्र क्वचाध्वर्युराश्रावयेन्नित्यमेवाग्नीध्रो ऽपरेणोत्करं दक्षिणामुखस्तिष्ठन् स्फ्यं सेध्मसंनहनमूर्ध्वं धारयमाणः प्रत्याश्रावयति ॥ ६ ॥ आग्नीध्रागारे तु सोमे ॥ ७ ॥ आश्राव्य प्रवरं प्रवृणीते—अग्निर्देवो होता देवान् यक्षद् विद्वाँश्चिकित्वान् मनुष्वद्भरतवद्-

1 D दक्षिणं क्रा°, Gbc दक्षिणात्याक्रा°
2 Gbc add त्रिः
3 D °रव्यंतं, Gac °रव्यन्तरं, Gb °रव्यन्तः
4-4 Ga प्रसूतो ब्रह्मणा, Gb प्रसूतो
5 Ga om. अध्वर्युः ; Gb ब्रह्म

दोवद्दोवद् इति यथार्षेयो यजमानः ॥ ८ ॥ त्रीनार्षेयान् मन्त्रकृत इत ऊर्ध्वान् वृणीते ॥ ९ ॥ अपि वा मनुवद् इत्येव प्रवृणीते ॥ १० ॥ पुरोहितस्यार्षेयान् राज्ञः प्रवृणीते ॥ ११ ॥ ब्रह्मण्वदा च वक्षद् ब्राह्मणा अस्य यज्ञस्य प्रावितारः इत्युक्त्वा असौ इति होतुरुपांशु नाम गृह्णाति ॥ १२ ॥ मानुषः इत्युच्चैः ॥ १३ ॥ वेद्यां तृणमपिसृज्य ॥ १४ ॥ ॥ १५ ॥

अनपव्याहरन्तः प्रचरन्तीति विज्ञायते ॥ १ ॥ यत्राभिजानाति घृतवतीमध्वर्यो स्रुचमास्यस्व [2. 5. 9. 6] इति तज्जुहूपभृतावादायात्याक्रम्याश्राव्याह— समिधो यज इति ॥ २ ॥ वषट्कृते जुहोति ॥ ३ ॥ आश्राव्याश्राव्य यजयज इत्येवोत्तरेभ्यः संप्रेष्यति ॥ ४ ॥ अपरेणाघारसंभेदं प्राचः प्रयाजानभिक्रामन् जुहोति ॥ ५ ॥ समानत्र वा ॥ ६ ॥ अपि वा समिधः पुरस्ताद् यजति तनूनपातं दक्षिणत इडः पश्चाद् बर्हिरुत्तरतः स्वाहाकारं मध्ये ॥ ७ ॥ यत्र समिधस्तत्र सर्वा आहुतीर्जुहुयात् ॥ ८ ॥ चतुर्थे होष्यञ्जौपभृतादर्धं जुह्वामानयते ॥ ९ ॥ पञ्च प्रयाजानिष्ट्वा प्रत्याक्रम्य यज्जुह्वामाज्यं परिशिष्टं तेन हवींष्यभिघारयति— ध्रुवामग्रे ऽथाग्नेयं पुरोडाशमथोत्तरमथ शृतमथ दध्युपभृतमन्ततः ॥ १० ॥ अथायतने स्रुचौ सादयित्वा पुनरादत्ते ॥ ११ ॥ एवमादत्ते भवत आ स्विष्टकृतः ॥ १२ ॥ आज्यभागाभ्यां प्रचरति ॥ १३ ॥ अग्नये ऽनुब्रूहि इति संप्रेष्यति ॥ १४ ॥ जुह्वां चतुर्गृहीतमाज्यं गृहीत्वा पञ्चगृहीतं वात्याक्रम्याश्राव्याह—अग्निं यज इति ॥ १५ ॥ वषट्कृत उत्तरार्धपूर्वार्धे जुहोति ॥ १६ ॥ नैतामुत्तरेणान्यामाहुतिं जुहोति प्रत्याक्रम्य ॥ १७ ॥ ॥ १६ ॥

सोमायानुब्रूहि इति संप्रेष्यति ॥ १ ॥ यथागृहीतमाज्यं गृहीत्वात्याक्रम्याश्राव्याह—सोमं यज इति ॥ २ ॥ वषट्कृते दक्षिणार्धपूर्वार्धे प्रबाहुक् पूर्वया जुहोति ॥ ३ ॥ नैतां दक्षिणेनान्यामाहुतिं जुहोति प्रत्याक्रम्य ॥ ४ ॥ तत्रैषो ऽत्यन्तप्रदेशः स्रुवेणैवाज्यदोहयोरित्यवद्यति हस्तेन पुरोडाशस्य ॥ ५ ॥ जामदग्नीनामेव पञ्चावत्तं चतुरवत्तमितरेषाम् ॥ ६ ॥ अप्यजामदग्न्यो जामदग्न्यमामन्त्र्य पञ्चावत्तं कुर्वीत ॥ ७ ॥ ततः संप्रेष्यति—अग्नये ऽनुब्रूहि इति ॥ ८ ॥ जुह्वामु-

1 D °भरतवद्दावत्, Ga °भरतवद्देवादेवत्, Gb °भरतवदोवदतोवत्
2 DGa om. त्रीन्
3 Gb मधुम°
4 Gb प्रयाजाननभि च क्रा°
5 Gb सामद्धतमस्तत्र
6 Gb जुह्वां समा°
7 Gbc तत आ°
8-8 D उत्तरार्धे
9 DGa om.
10 Gb om. इति

पस्तीर्याग्नेयस्य पुरोडाशस्याङ्गुष्ठेन मांससँहिताभ्यामङ्गुलीभ्यां मध्यादवदाय पूर्वार्धादवद्यति पश्चार्धात् तृतीयं यदि पञ्चावदानः—मा भेर्मा संविक्था मा त्वा हिँसिषं मा ते तेजो ऽपक्रमीत्। भरतमुद्धरेमनुषिञ्च। अवदानानि ते प्रत्यवदास्यामि। नमस्ते अस्तु मा मा हिँसीः [TB 3. 7. 5. 5] इति ॥ ९ ॥ अङ्गुष्ठपर्वमात्राण्यवदानान्यसंभिन्दन्नवद्यति ॥ १० ॥ अवदानान्यभिघार्य हविः प्रत्यभिघारयति—

यदवदानानि ते ऽवद्यन् विलोमाकार्षमात्मनः।

आज्येन प्रत्यनज्म्येनत् तत् त आप्यायतां पुनः ॥ [l. c. 5,6]

इति ॥ ११ ॥ आक्रम्याश्राव्याह—अग्निं यज इति ॥ १२ ॥ वषट्कृते मध्ये जुहोति ॥ १३ ॥ अपिदधदिवाप्रक्षिणन्नाज्यं हुत्वा पुरोडाशं जुहोति तत आज्यम् ॥ १४ ॥ ॥ १७ ॥

पूर्वांपूर्वां सँहितामाहुतिं जुहोत्या स्विष्टकृतः ॥ १ ॥ अपि वा स्रुच्यमाघारमभिजुहुयात् ॥ २ ॥ तत उपाँशुयाजाय संप्रेष्यति—विष्णवे इत्युपाँशु अनुब्रूहि इत्युच्चैः ॥ ३ ॥ यथागृहीतमाज्यं गृहीत्वात्याक्रम्याश्राव्याह—विष्णुम् इत्युपाँशु यज इत्युच्चैः ॥ ४ ॥ वषट्कृते जुहोति ॥ ५ ॥ अग्नीषोमीयमेक उपाँशुयाजं समामनन्ति प्राजापत्यमेके ॥ ६ ॥ स एष पौर्णमास्यामेव भवति ॥ ७ ॥ यथाग्नेयेनैवमुत्तमेन पुरोडाशेन प्रचरति—अग्नीषोमाभ्याम् इति पौर्णमास्यां इन्द्राग्निभ्याम् इत्यमावास्यायाम् ॥ ८ ॥ इत्यसंनयतः ॥ ९ ॥ अथ यदि संनयेत् इन्द्रायानुब्रूहि इति संप्रेष्यति[1] ॥ १० ॥ महेन्द्राय इति वा यदि[2] महेन्द्रयाजी भवति ॥ ११ ॥ जुह्वामुपस्तीर्य द्विः शृतस्यावद्यति द्विर्दध्नश्चतुरवदानस्य त्रिः[4] पञ्चावदानस्य ॥ १२ ॥ अभिघार्यात्याक्रम्याश्राव्याह—इन्द्रं यज इति ॥ १३ ॥ महेन्द्रम् इति वा ॥ १४ ॥ वषट्कृते जुहोति ॥ १५ ॥ प्रत्याक्रम्य स्रुवेण पार्वणौ होमौ जुहोति—

ऋषभं वाजिनं वयं पूर्णमासं यजामहे।

स नो दोहतां सुवीर्यँ रायस्पोषँ सहस्रिणम्।

प्राणाय सुराधसे पूर्णमासाय स्वाहा ॥ [l. c. 13]

इति पौर्णमास्याम्।

अमावास्या सुभगा सुशेवा धेनुरिव भूय आप्यायमाना।

सा नो दोहतां सुवीर्यँ रायस्पोषँ सहस्रिणम्।

अपानाय सुराधसे ऽमावास्यायै स्वाहा ॥ [l. c.]

1 Da ऊर्वलोमा°, Gab कारिषमा°　　3 Gb om.

2 Ga गृहीत्वाक°　　4 Gb त्रिस्त्रिः

इत्यमावास्यायाम् ॥ १६ ॥ ॥ १८ ॥

अत्र नारिष्ठान् होमान् जुहोति—

दश ते तनुवो यज्ञ यज्ञियास्ताः प्रीणातु यजमानो घृतेन ।
नारिष्ठयोः प्रशिषमीडमानो देवानां दैव्ये ऽपि यजमानो ऽमृतो ऽभूत् ॥ स्वाहा ॥
यं वां देवा अकल्पयन्नूर्जो भागं शतक्रतू ।
एतद्वां तेन प्रीणानि तेन तृप्यतमंहहौ ॥ स्वाहा ॥
अहं देवानां सुकृतामस्मि लोके ममेदमिष्टं न मिथुर्भवाति ।
अहं नारिष्ठावनुयजामि विद्वान् यदाभ्यामिन्द्रो अदधाद् भागधेयम् ॥ स्वाहा ॥
अदारसृद् भवत देव सोमास्मिन् यज्ञे मरुतो मृडता नः ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजना द्वेष्या या ॥ स्वाहा ॥

[TB 3.7.5. 11-13] इति ॥ १ ॥ ततः संप्रेष्यति—अग्नये स्विष्टकृते ऽनुब्रूहि इति ॥ २ ॥ जुह्वामुपस्तीर्य सर्वेषां हविषामुत्तरार्धात् सकृत्सकृच्चतुरवदानस्य[1] द्विः पञ्चावदानस्य ॥ ३ ॥ स्यवीयांस्येतानि दैवतेभ्यो भवन्ति ॥ ४ ॥ द्विरभिघार्य न हविः प्रत्यभिघारयति ॥ ५ ॥ अत्याक्रम्याश्राव्याह—अग्निं स्विष्टकृतं यज इति ॥ ६ ॥ वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोति ॥ ७ ॥ प्रत्याक्रम्यायतने स्रुचौ सादयति ॥ ८ ॥ अत्रैके प्राशित्रं समामनन्ति । उपरिष्टादेके[2] ॥ ९ ॥ ॥ १९ ॥

[3]इति दर्शपूर्णमासे द्वितीयः प्रश्नः[3] ॥

---

1 Gb adds अवद्यति
2 Gc repeats उपरिष्टादेके
3-3 D इति द्वितीयः, Ga ॥२॥, Gc द्वितीयः प्रश्नः समाप्तः

इडापात्रमुपस्तीर्याग्नेयस्य पुरोडाशस्य दक्षिणार्धात् पूर्वमिडावदानमवद्यति—

मनुना दृष्टां घृतपदीं मित्रावरुणसमीरिताम् ।
दक्षिणार्धादसंभिन्दन्नवद्याम्येकतोमुखाम् ॥ [TB 3. 7. 5. 6]

इति ॥ १ ॥ पृष्ठं संभिद्य पूर्वार्धाद् यजमानभागमवद्यत्यणुमिव दीर्घम् ॥ २ ॥ संभेदाद् द्वितीयमिडावदानमवद्यति ॥ ३ ॥ एवं सर्वेषां हविषामिडां समवद्यति ॥ ४ ॥ स्थवीयांस्येतानि सौविष्टकृतेभ्यो भवन्ति ॥ ५ ॥ अभिघार्यान्तरा हवींषि स्रुचश्च हृत्वा होत्र इडामादधाति ॥ ६ ॥ स्वयं वा होतेडामादत्ते ॥ ७ ॥ अग्रेण होतारमध्वर्युर्दक्षिणातिक्रामति ॥ ८ ॥ अनुत्सृजन्निव होतेडयाध्वर्युं परिगृह्णाति ॥ ९ ॥ पश्चात् प्राङुपविश्य स्रुवेण होतुरङ्गुलिपर्वणी अनक्ति ॥ १० ॥ पूर्वमक्त्वापरमनक्ति ॥ ११ ॥ यथेतं प्रतिपरेत्य पुरस्तात् प्रत्यङ्ङासीन इडाया इडामादधाति ॥ १२ ॥ हस्त्यां होत्रे सकृदुपस्तृणाति द्विरादधाति सकृदभिघारयति ॥ १३ ॥ स्वयं वा होतोत्तरमिडावदानमादत्ते ॥ १४ ॥ लेपादुपस्तृणाति ॥ १५ ॥ लेपादभिघारयति ॥ १६ ॥ उपहूयमानामिडामन्वारभेते अध्वर्युर्यजमानश्च ॥ १७ ॥ यत्राभिजानाति दैव्या अध्वर्यव उपहूता उपहूता मनुष्याः [2. 6. 7. 4] इति ॥ १८ ॥ ॥ १ ॥

तदध्वर्युरेतं मन्त्रं जपति—उपहूतः पशुमानसानि [TB 3. 3. 8. 4] इति ॥ १ ॥ यत्राभिजानाति उपहूतो ऽयं यजमानः [2. 6. 7. 5] इति तद् यजमान एतमेव मन्त्रं जपति ॥ २ ॥ उपहूतायामिडायामवान्तरेडां होता प्राश्नाति—वाचस्पतये त्वा हुतं प्राश्नामि सदसस्पतये त्वा हुतं प्राश्नामि [2. 6. 8. 1] इति ॥ ३ ॥ उपहूतामिडां यजमानपञ्चमा ऋत्विजः प्राश्नन्ति—

1 Gbc °पात्र उ°
2 D °दक्षिणाक°
3 Da °डाया अ°, Db °डायां अ°, Ga °डाया°
4 D परिमगृ°, Ga परिप्रगृ°, Gb परिप्रतिगृ°
5 D °स्रु°
6 D °र्युवः

इडे भागं जुषस्व नो जिन्व गा जिन्वार्वतः ।

तस्यास्ते भक्षिवाणः स्याम सर्वात्मानः सर्वगणाः ॥ [TB 3. 7. 5. 7]

इति ॥ ४ ॥ प्राश्य तूष्णीमासीता मार्जनात् ॥ ५ ॥ अन्तर्वेदि पवित्रवति मार्जयन्ते—मनो ज्योतिर्जुषताम् [1. 5. 3*g*] इति ॥ ६ ॥ आग्नेयं पुरोडाशं प्राञ्चं विरुज्य प्राशित्रहरणमादाय प्राशित्रमवद्यति—

अज्यायो यवमात्रादाव्याधात् कृत्यतामिदम् ।

मा रूरुपाम यज्ञस्य शुद्धं स्विष्टमिदं हविः ॥ [TB 3. 7. 5. 6]

इति ॥ ७ ॥ एवमुत्तरेषाम् ॥ ८ ॥ अविरुज्याङ्गुष्ठेनोपमध्यमया चाङ्गुल्या यवमात्रं पिप्पलमात्रं वादाय ॥ ९ ॥ ॥ २ ॥

आग्नेयं पुरोडाशं बर्हिषदं कृत्वा यजमानो ऽभिमृशति । तद् याजमाने व्याख्यास्यामः ॥ १ ॥ अथैनं चतुर्धा कृत्वा व्यादिशेत्[1]—इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीधः [TB 3. 3. 8. 8] इति ॥ २ ॥ इदं यजमानस्य इत्यध्वर्युर्यजमानभागम् ॥ ३ ॥ स्थवीयांस्येतानीडावदानेभ्यो भवन्ति ॥ ४ ॥ व्यादिश्याग्नीधे ऽग्रे[2] षडवत्तमादधाति ॥ ५ ॥ उपस्तीर्यावदायाभिघार्य पुनरेवोपस्तीर्यावदायाभिघारयति । षडवत्तं संपादयति ॥ ६ ॥ प्राश्नात्याग्नीध्रः—

उपहूतो द्यौः पितोप मां द्यौः पिता ह्वयताम् ।

अग्निराग्नीध्रादायुषे वर्चसे जीवात्वै पुण्याय ॥ [TB 3. 7. 6. 15]

इति ॥ ७ ॥ वेदेन ब्रह्मयजमानभागौ परिहरति ॥ ८ ॥ अन्येन होत्रे ऽन्येनाध्वर्यवे ॥ ९ ॥ पृथिव्यै भागो ऽसि इति होता प्राश्नाति अन्तरिक्षस्य भागो ऽसि इत्यध्वर्युः दिवो भागो ऽसि इति संस्थिते ब्रह्मा ॥ १० ॥ अन्वाहार्यपचने महान्तमोदनं पक्त्वाभिघार्यानभिघार्य वोद्वास्यान्तर्वेद्यन्वाहार्यमासन्नं यजमानो ऽभिमृशति । तद् याजमाने व्याख्यास्यामः ॥ ११ ॥ ॥ ३ ॥

दक्षिणास्त्रा उपहर्तवै इति संप्रेष्यति ॥ १ ॥ य ऋत्विजामुत्तरतः स्युस्तान् ब्रूयात्—दक्षिणत एत इति ॥ २ ॥ तेभ्यो दक्षिणत आसीनेभ्यो ऽन्वाहार्यं ददाति—ब्राह्मणा अयं व ओदनः इति ॥ ३ ॥ उत्तरतः परीत इति पुनराह ॥ ४ ॥ हविःशेषानुद्वास्योल्मुके अपिसृज्य संप्रेष्यति—ब्रह्मन् प्रस्थास्यामः ॥ समिधमाधायाग्नीत् परिधींश्चाग्निं

1 Gbc ॰दिशति
2 D om. ऽग्रे
3 G आधा॰ for अवदा॰
4 Gb ॰स्तीर्याभिधा॰, Gc ॰स्तीर्याधा॰ ; Ga om. अवदायाभि
5 D न ब्रह्मयजमानभागौ परिप्रा॰
6 Gb adds दक्षिणां

च सकृत्सकृत् संमृड्ढि इति ॥ ५ ॥ प्रसूतो ब्रह्मणाग्नीध्रो ऽनूयाजसमिधमादधाति—

एषा ते ऽग्ने समित् तया वर्धस्व चाप्यायस्व ।
वर्धतां च ते यज्ञपतिरा च प्यायतां[1] स्वाहा ॥

इति ॥ ६ ॥ अस्फ्यैरिध्मसंनहनैराग्नीध्रः परिधीं[2]श्चाग्निं च सकृत्सकृत् संमार्ष्टि । तूष्णीं परिधीन् ॥ ७ ॥ अग्ने वाजजिद् वाजं त्वा ससृवांसं वाजं जिगिवांसं वाजिनं वाजजितं वाजजित्यायै संमार्ज्म्यग्निमन्नादमन्नाद्याय [TB 3. 7. 6. 17,18] इत्यग्निं[3] संमार्ष्टि ॥ ८ ॥ अथैतानि संमार्जनान्यद्भिः संस्पृश्याहवनीये प्रहरति—

यो भूतानामधिपती रुद्रस्तन्तिचरो वृषा ।
पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव ॥ स्वाहा ॥ [TB 3. 3. 2. 5]

इति ॥ ९ ॥ उत्कर उदस्यतीत्येकेषाम् ॥ १० ॥ ॥ ४ ॥

जुहूपभृतावादायोपभृतं जुह्वां समानीयात्याक्रम्याश्राव्याह—देवान् यज इति ॥ १ ॥ वषट्कृते जुहोति ॥ २ ॥ आश्राव्याश्राव्य यजयज इत्येवोत्तराभ्यां संप्रेष्यति ॥ ३ ॥ अग्रेणाघारसंभेदं प्रतीचो ऽनूयाजान् यजति ॥ ४ ॥ प्राञ्चमुत्तममनुसंस्थापयति ॥ ५ ॥ उत्तमेनेतरावनुसंभिनत्ति ॥ ६ ॥ प्रत्याक्रम्यायतने स्रुचौ सादयित्वा वाजवतीभ्यां व्यूहति ॥ ७ ॥ वाजस्य मा प्रसवेन [1. 1. 13*a*] इति दक्षिणेनोत्तानेन सप्रस्तरां जुहूमुद्गृह्णाति । अथा सपत्नाँ इन्द्रो मे निग्राभेणाधराँ अकः इति सव्येन नीचोपभृतं नियच्छति ॥ ८ ॥ उद्ग्राभं च [l. c. *b*] इति जुहूमुद्गृह्णाति । निग्राभं च [l. c.] इत्युपभृतं नियच्छति ॥ ९ ॥ ब्रह्म देवा अवीवृधन् [l. c.] इति प्राचीं जुहूं प्रोहति ॥ १० ॥

अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् [l. c.]

इति प्रतीचीमुपभृतं बहिर्वेदि निरस्यति ॥ ११ ॥ अद्भिरभ्युक्ष्योपभृतमभ्युदाहृत्य जुह्वा संस्रावेण परिधीननक्ति—वसुभ्यस्त्वा [l. c. *c*] इति मध्यमं रुद्रेभ्यस्त्वा [l. c.] इति दक्षिणं आदित्येभ्यस्त्वा [l. c.] इत्युत्तरम् ॥ १२ ॥ न प्रस्तरे जुहूं सादयति ॥ १३ ॥ विधृतीभ्यां प्रस्तरं समुद्धित्य बर्हिषि विधृती अपिसृज्य स्रुक्षु प्रस्तरमनक्ति—अक्तं रिहाणाः [l. c. *d*] इति जुह्वामग्रं वियन्तु वयः [l. c.] इत्युपभृति मध्यं[4] प्रजां योनिं मा निर्मृक्षम्[5] [l. c. *e*] इति ध्रुवायां मूलम् ॥ १४ ॥ एवमेव द्वितीयमनक्ति । एवं तृतीयम् ॥ १५ ॥ आयुषे त्वा इत्यक्तस्य तृणमपयत्य[6]

1 Gb adds वर्धिषीमहि च वयमा मा च प्यासिषीमहि
2 D सकृत् only once.
3 D तृपा
4 Gb मध्यमं
5 Gb adds आप्यायन्तामोषधयः
6 Gb °यम्य

जुह्वां प्रस्तरं प्रतिष्ठाप्याग्नाव्यासीनः संप्रेष्यति—इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि [TB 3. 3. 8. 11] इति ॥ १६ ॥ अनूच्यमाने सूक्तवाके ॥ १७ ॥ ॥ ५ ॥

सह शाखया प्रस्तरमुपरीव प्राञ्चमाहवनीये प्रहरति—रोहितेन त्वाग्निर्देवतां गमयतु [1. 6. 4p] इत्येतैर्मन्त्रैः । मरुतां पृषतय स्थ दिवं गच्छ ततो नो वृष्टिमेरय [1. 1. 13gh] इति च ॥ १ ॥ न प्रतिशृणाति नात्यग्रं प्रहरेत् ॥ २ ॥ न पुरस्तात् प्रत्यस्येन् ॥ ३ ॥ जिह्मामिव हस्तं कृत्वा न्यञ्चमन्ततो नियच्छति ॥ ४ ॥ यत्राभिजानाति आशास्ते ऽयं यजमानो ऽसौ [2. 6. 9. 7] इति तत् प्रस्तरमपिसृज्याह अग्नीद् गमय इति ॥ ५ ॥ त्रिरञ्जलिनाग्नीध्रः प्रस्तरमूर्ध्वमुद्यौति ॥ ६ ॥ न विष्वञ्चं वियुयात् ॥ ७ ॥ ततो ऽध्वर्युमाह—अनुप्रहर संवदस्व इति ॥ ८ ॥ पुरस्तादपात्तं तृणमध्वर्युरनुप्रहरति—स्वगा तनुभ्यः इति ॥ ९ ॥ एतदेतत् इति त्रिरङ्गुल्यान्ववदिशति ॥ १० ॥ अहीनः प्राणः इति प्राणायतनानि संमृशति ॥ ११ ॥ आयुष्पा अग्ने ऽस्यायुर्मे पाहि [1. 1. 13i] इति मुखं विमृष्टे ॥ १२ ॥ धासि [l. c. l] इतीमामभिमृश्य अगानग्नीत् [2. 6. 5. 6] इति [अध्वर्युर्] आह । अगन् [l. c.] इत्याग्नीध्रः । श्रावय इत्यध्वर्युः । श्रौषट् इत्याग्नीध्रः ॥ १३ ॥ मध्यमं परिधिमन्वारभ्य संप्रेष्यति—स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूहि [TB 3. 3. 8. 11] इति ॥ १४ ॥ अनूच्यमाने शंयुवाके परिधीन् प्रहरति—यं परिधिं पर्यधत्थाः [1. 1. 13m] इति मध्यमं यज्ञस्य पाथ उप समितम् [l. c. n] इतीतरौ ॥ १५ ॥ अथाङ्गमुत्तरार्ध्यमङ्गारेषूपोहति ॥ १६ ॥ जुह्वामुपभृतो मुखमवधाय सँस्रावेण परिधीनभिजुहोति—सँस्रावभागा स्थेषा बृहन्तः [l. c. o] इति ॥ १७ ॥ अत्रर्त्विजो हविःशेषान् भक्षयन्ति ॥ १८ ॥ ॥ ६ ॥

सस्रुवे जुहूपभृतावध्वर्युरादत्ते वेदं होता स्फ्यं चाज्यस्थालीमुदकमण्डलुं चाग्नीध्रः ॥ १ ॥ पत्नीः सं[या]जयिष्यन्तः प्रत्यञ्चः प्रतिपरियन्ति ॥ २ ॥ दक्षिणेन गार्हपत्यमध्वर्युः प्रतिपद्यत उत्तरेणेतरौ ॥ ३ ॥ कस्तम्भ्यां स्रुचौ सादयति—अग्नेर्वामपन्नगृहस्य सदसि सादयामि [l. c. p] इति ॥ ४ ॥ धुरोः प्रोहति—धुरि धुर्यौ पातम् [l. c. r] इति ॥ ५ ॥ यदि पात्र्या निर्वपेत् स्फ्ये विमुञ्चेत् ॥ ६ ॥ अपरेण गार्हपत्यमूर्ध्वज्ञव आसीना ध्यानेनोपांशु वा पत्नीः संयाजयन्ति ॥ ७ ॥ वेदमुपभृतं कृत्वा सोमायानुब्रूहि इति संप्रेष्यति ॥ ८ ॥ यथा-

1 Ga वृष्टिमावह
2 Gab विमु°
3 Ga °मृश्याथा Gc °मृश्याथा
4 DGb om.

गृहीतमाज्यं गृहीत्वाश्राव्याह—सोमं यज इति ॥ ६ ॥ वषट्कृते दक्षिणार्धे जुहोति ॥ १० ॥ यथागृहीतेनैव पत्नीः संयाजयन्ति ॥ ११ ॥ त्वष्ट्रे ऽनुब्रूहि इति संप्रेष्यति ॥ १२ ॥ आश्राव्याह—त्वष्टारं यज इति ॥ १३ ॥ वषट्कृत उत्तरार्धे जुहोति ॥ १४ ॥ उत्तरतः सोमं यजति दक्षिणतस्त्वष्टारमित्येकेषाम् ॥ १५ ॥ अत्र राकां पुत्रकामो यजेत सिनीवालीं पशुकामः कुहूं पुष्टिकामः ॥ १६ ॥ राकाया अनुब्रूहि इति संप्रेष्यति ॥ १७ ॥ आश्राव्याह—राकां यज इति ॥ १८ ॥ वषट्कृते जुहोति ॥ १९ ॥ सिनीवाल्या अनुब्रूहि इति संप्रेष्यति ॥ २० ॥ आश्राव्याह—सिनीवालीं यज इति ॥ २१ ॥ वषट्कृते जुहोति ॥ २२ ॥ ॥ ७ ॥

कुह्वा अनुब्रूहि इति संप्रेष्यति ॥ १ ॥ आश्राव्याह—कुहूं यज इति ॥ २ ॥ वषट्कृते जुहोति ॥ ३ ॥ परिश्रिते देवानां पत्नीर्यजति । अपरिश्रिते वा ॥ ४ ॥ देवानां पत्नीभ्यो ऽनुब्रूहि इति संप्रेष्यति ॥ ५ ॥ आश्राव्याह—देवानां पत्नीर्यज इति ॥ ६ ॥ वषट्कृते जुहोति ॥ ७ ॥ अग्नये गृहपतये ऽनुब्रूहि इति संप्रेष्यति ॥ ८ ॥ आश्राव्याह—अग्निं गृहपतिं यज इति ॥ ९ ॥ वषट्कृते जुहोति ॥ १० ॥ पत्नीमन्वारम्भयित्वा स्रुवेण गार्हपत्ये जुहोति—

सं पत्नी पत्या सुकृतेन गच्छतां यज्ञस्य युक्तौ धुर्यावभूताम् ।
संजानानौ विजहतामरातीर्दिवि ज्योतिरजरमारभेताम् ॥ स्वाहा ॥ [TB3.7.5,11]

इति ॥ ११ ॥ स्रुवेण होतुरङ्गुलिपर्वणी अनक्ति ॥ १२ ॥ अपरमक्त्वा पूर्वमनक्ति ॥ १३ ॥ चतुर आज्यबिन्दून् होत्र इडामवद्यति[1] षडग्नीधे ॥ १४ ॥ उपहूयमानामिडामन्वारभेते अध्वर्युः पत्नी च ॥ १५ ॥ उपहूतामिडां प्राश्नाति होता प्राश्नात्याग्नीध्रः—

उपहूता पृथिवी मातोप मां माता पृथिवी ह्वयताम् ॥
अग्निराग्नीध्रादायुषे वर्चसे जीवात्वै पुण्याय ॥ [TB 3. 7. 6. 15]

इति ॥ १६ ॥ प्राश्य मार्जयेते ॥ १७ ॥ इडान्तं भवति ॥ १८ ॥ ॥ ८ ॥

शंयुवन्तं वा ॥ १ ॥ यदि शंयुवन्तं कुर्याद् वेदात् तृणमपादाय जुह्वामग्रमनज्यात् स्रुवे मध्यमाज्यस्थाल्यां मूलम् ॥ २ ॥ तस्य स एव कल्पो यः प्रस्तरस्य ॥ ३ ॥ इध्मप्रव्रश्चनान्यन्वाहार्यपचने ऽभ्याधाय पिष्टलेपफलीकरणहोमौ जुहोति ॥ ४ ॥ चतुर्गृहीत आज्ये फलीकरणानोप्य जुहोति—अग्ने ऽदब्धायो ऽशीततनो [1. 1. 13 8] इति प्रतिपद्य स्वाहाकारान्तेन ॥ ५ ॥ आज्येनैव पिष्टलेपं जुहोति—

1 Ga इडामादायाति, Gbc इडामादधाति

उलूखले मुसले यच्च शूर्पे आशिश्रेष दृषदि यत् कपाले ।

अवप्रुषो विप्रुषः संयजामि विश्वे देवा हविरिदं जुषन्ताम् ।

यज्ञे या विप्रुषः सन्ति बह्वीरग्नौ ताः सर्वाः स्विष्टाः सुहुता जुहोमि ॥ स्वाहा ॥

[TB 3. 7. 6. 21] इति ॥ ६ ॥ **वेदं होता पत्न्या उपस्थे त्रिरस्यति—** वेदो ऽसि ॥ वित्तिरसि ॥ विदेय [1. 6. 4 v] **इत्येतैर्मन्त्रैः ॥ ७ ॥ अस्तमस्तं पत्नी प्रतिनिरस्यति—** निर्द्विषन्तं निररातिं नुद इति ॥ ८ ॥ **स्वयं वा पत्न्यास्यते ॥ ९ ॥ पुमाँसं ह जातुका भवतीति विज्ञायते ॥ १० ॥ अत्रैके पत्न्या विमोचनं समामनन्ति ॥ ११ ॥ वेदं होताहवनीयात् स्तृणन्नेति—** घृतवन्तं कुलायिनम् [l. c. y] **इत्यनुवाकशेषेण ॥ १२ ॥ अत्रैके पार्वणौ होमौ समामनन्ति ॥ १३ ॥ स्रुवेण सर्वप्रायश्चित्तानि जुहोतीति विज्ञायते ॥ १४ ॥ ॥ ९ ॥**

**प्रत्याहुती[1] गृहीत्वा वा[2] ॥ १ ॥**

ब्रह्म प्रतिष्ठा मनसो ब्रह्म वाचो ब्रह्म यज्ञानां हविषामाज्यस्य ।

अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् ।

स्वाहाकृताहुतिरेतु देवान् ॥ स्वाहा ॥

आश्रावितमत्याश्रावितं वषट्कृतमत्यनूक्तं च यज्ञे ।

अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् ।

स्वाहाकृताहुतिरेतु देवान् ॥ स्वाहा ॥

यद् वो देवा अतिपादयानि वाचाचित् प्रयतं देवहेडनम् ।

अरायो अस्माँ अभिदुच्छुनायते ऽन्यत्रास्मन्मरुतस्तन्निधेतन ॥ स्वाहा ॥

ततं म आऽपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।

अयं समुद्र उत विश्वभेषजः स्वाहाकृतस्य समु तृप्णुतर्भुवः ॥ स्वाहा ॥

उद् वयं तमसस्परि ॥ उदु त्यम् ॥ चित्रम् ॥ इमं मे वरुण ॥ तत् त्वा यामि ॥ त्वं नो अग्ने ॥ स त्वं नो अग्ने ॥ त्वमग्ने अयासि ॥ प्रजापते ॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।

शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ॥ स्वाहा ॥

इष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा । भेषजं दुरिष्ट्यै स्वाहा निष्कृत्यै स्वाहा । दौरार्ध्यै स्वाहा दैवीभ्यस्तनूभ्यः स्वाहा ॥ ऋद्ध्यै स्वाहा समृद्ध्यै स्वाहा [TB 3. 7. 11. 1-4] ॥ २ ॥
॥ १० ॥

1 Ga °ति, Gb °तिर्  2 Gao om. वा

या सरस्वती विशोभगीना तस्यै ते[1] स्वाहा ॥ या सरस्वती वेशभगीना तस्यै ते स्वाहा ॥
इन्द्रोपानस्य वेशान् सुमनसः सुजातान्[2] कुरु स्वाहा ॥
यदकर्म यन्नाकर्म यदत्यगाम यन्नात्यगाम यदत्यरीरिचाम यन्नात्यरीरिचाम[3] तत् त्वं विष्णो यज्ञे[4] यज्ञं प्रतिष्ठापय स्वाहा ॥
यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतये । विद्विषो विमृधो जहि ॥ स्वाहा ॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥ स्वाहा ॥
आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः ।
यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥ स्वाहा ॥
अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु ।
अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथम् ॥ स्वाहा ॥
पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः ।
अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथम् ॥ स्वाहा ॥
यत् पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः ।
अग्निष्टद्धोता क्रतुविद् विजानन् यजिष्ठो देवाँ ऋतुशो यजाति ॥ स्वाहा ॥ [TB 3. 7. 11. 4,5]

यदस्य कर्मणो ऽत्यरीरिचं यद् वा न्यूनमिहाकरम् ।
अग्निष्टत् स्विष्टकृद् विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे ॥

अग्नये स्विष्टकृते सुहुतहुत आहुतीनां कामानां समर्धयित्रे स्वाहा **इति प्राजापत्यामित्युत्तमां[6] हुत्वा ॥ १ ॥ ॥ ११ ॥**

**अन्तर्वेद्यूर्ध्वस्तिष्ठन् ध्रुवया समिष्टयजुर्जुहोति**—देवा गातुविदः [1. 1. 13*u*] **इति प्रथमामाहुतिं हुत्वा बर्हिरनुप्रहरति ॥ १ ॥** वाचि स्वाहा [l. c. *v*] **इति द्वितीयां** वाते धाः [l. c.] स्वाहा **इति तृतीयाम् ॥ २ ॥ होतृषदनाद् वेदिमभिस्तृणाति**

अभिस्तृणीहि परिधेहि वेदिं जामिं मा हिंसीरमुया शयाना ।
होतृषदना हरिताः सुवर्णा निष्का इमे यजमानस्य ब्रध्ने ॥ [TB 3. 7. 5. 13]

**इति ॥ ३ ॥ अन्तर्वेदि प्रणीता आसादयति**—को वो ऽयोक्षीत् स वो विमुञ्चतु

1 Gc om. ते
2 Gc स°
3 DGac om.
4 DGac यज्ञं
5 Gab अथ
6 Gb प्रजापते for प्राजापत्याम्

इति ॥ ४ ॥ ततः पत्नीं विमुञ्चति—इमं वि ष्यामि वरुणस्य पाशम् [1. 1. 10 *g*] इत्यादाय योक्त्रं पत्नी सहाप उपगृह्णीते ॥ ५ ॥ अञ्जलावस्यै पूर्णपात्रमानयति ॥ ६ ॥ आनीयमाने जपति—समायुषा सं प्रजया [l. c. *h*] इत्येताम् ॥ ७ ॥ मुखं विमृज्योत्तिष्ठति—पुष्टिमती पशुमती प्रजावती गृहमेधिनी भूयासम् इति ॥ ८ ॥ तत उपवेषमुत्करे पुरस्तात् प्रत्यञ्चं स्थविमत उपगूहति—

यं देवा मनुष्येषूपवेषमधारयन् ।
ये अस्मदपचेतसस्तानस्मभ्यमिहा कुरु ॥
उपवेषोपविड्ढि नः प्रजां पुष्टिमथो धनम् ।
द्विपदो नश्चतुष्पदो ध्रुवाननपगान् कुरु ॥ [TB 3. 3. 11. 1, 2]

इति ॥ ९ ॥ योपवेषे शुक् सामुमृच्छतु यं द्विष्मः [l. c. 2] इति यं द्वेष्टि तस्य नाम गृह्णाति ॥ १० ॥ ॥ १२ ॥

अथास्मै नामगृह्य प्रहरति—

निरमुं नुद ओकसः सपत्नो यः पृतन्यति ।
निर्बाध्येन हविषेन्द्र एणं पराशरीत् ॥
इहि तिस्रः परावत इहि पञ्चजनाँ अति ।
इहि तिस्रो ऽति रोचना यावत् सूर्यो असद् दिवि ॥
परमां त्वा परावतमिन्द्रो नयतु वृत्रहा ।
यतो न पुनरायसि शश्वतीभ्यः समाभ्यः ॥ [l. c. 3, 4]

इति ॥ १ ॥ इतो ऽसावचविध्मासुम् [l. c. 4] इति ब्रूयाद् यं द्विष्यात् ॥ २ ॥ संस्थिते कपालानि विमुञ्चति—यानि घर्मे कपालानि [1. 1. 7 *k*] इति ॥ ३ ॥ एतयैव यजमानो ऽभिमन्त्रयेत ॥ ४ ॥ संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति ॥ ५ ॥ तत्र यौयाकामी प्रक्रमे । प्रक्रमात् तु नियम्यते ॥ ६ ॥ सप्तदश सामिधेनीको यथाश्रद्धदक्षिणः ॥ ७ ॥ शार्धवत्यौ संयाज्ये ॥ ८ ॥ अपि वैनं समानतन्त्रं पौर्णमास्यां निर्वपेत् ॥ ९ ॥ तमेतन्नित्यवदेके समामनन्ति काम्यवदेके ॥ १० ॥ तं यदा निर्वपेन्न तत ऊर्ध्वं विरमेत् ॥ ११ ॥ एवं विहिताभ्यां दर्शपूर्णमासाभ्यां यावज्जीवं यजते । त्रिंशतं वा वर्षाणि त्रिंशतं वा वर्षाणि ॥ १२ ॥ ॥ १३ ॥[4]

1 DGo °मनथा° for °मथा°
2 D तुम°
3 Gac य°
4 D adds the colophon : तृतीयः ॥ प्रथमः प्रश्नः समाप्तः ॥

**श्वो भूते यजमानो ब्रह्माणं वृणीते**—भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहे [TB 3. 7. 6. 1] **इति** ॥ १ ॥ **वृतो जपति**—अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि ॥ देव सवितरेतं त्वा वृणते बृहस्पतिं दैव्यं ब्रह्माणम् ॥ तदहं मनसे प्रब्रवीमि मनो गायत्रियै गायत्री त्रिष्टुभे त्रिष्टुब् जगत्यै जगत्यनुष्टुभे ऽनुष्टुप् पङ्क्त्यै पङ्क्तिः प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो विश्वे देवा बृहस्पतये बृहस्पतिर्ब्रह्मणे ॥ ब्रह्म भूर्भुवः सुवः ॥ बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणां बृहस्पते यज्ञं गोपाय [l. c. 1-3] **इत्युक्त्वापरेणाहवनीयमतिक्रम्य दक्षिणतो ब्रह्मसदनात् तृणं निरस्यति**—निरस्तः परावसुः **इति** ॥ २ ॥ **अप उपस्पृश्य ब्रह्मसदन आहवनीयमभिमुख उपविशति**—इदमहमर्वाग्वसोः सदने सीदामि ॥ प्रसूतो देवेन सवित्रा बृहस्पतेः सदने सीदामि ॥ तदग्नये प्रब्रवीमि तद् वायवे तत् सूर्याय तत् पृथिव्यै **इति** ॥ ३ ॥ ॥ १४ ॥[1]

**तत्रैषो ऽत्यन्तप्रदेशो वाग्यत एव मन्त्रवत्सु कर्मसु भवति याथाकामी तूष्णींकेषु** ॥ १ ॥ **प्रणीतासु प्रणीयमानासु वाचं यच्छति** ॥ २ ॥ **आ हविष्कृतः परुषिपरुषि वाचं यच्छतीति विज्ञायते** ॥ ३ ॥ **अथैकेषां प्रातरनुवाक उपाकृते सामिधेनीषु प्रयाजानूयाजेषु स्तुतशस्त्रेष्विति वाचमेव यच्छेदिति** ॥ ४ ॥ **अथैकेषां यदृचा यदि यजुषा यदि साम्ना क्रियते वाचमेव यच्छेदिति** ॥ ५ ॥ **अथैकेषामन्यो ऽन्यस्मै वा ऋत्विजो यज्ञसंप्रदायं चरन्ति । यावद् वा ऋचार्त्विज्यं क्रियते होतृष्वेव तावद्यज्ञो भवति । यावद्यजुषाध्वर्युष्वेव तावद् यावत् साम्नोद्गातृष्वेव तावत् । अथ यत्र क्व च यज्ञस्य विहितं ब्रह्मण्येव तावद् यज्ञो भवति । तस्मादेतस्मिन्नन्तर्धौ ब्रह्मा वाचंयमः स्यात्** ॥ ६ ॥ **स यदि प्रमत्तो व्याहरेदेता एव व्याहृतीरभिव्याहरेत्**—भूर्भुवः सुवः **इति वैष्णवीं वार्चम्** ॥ ७ ॥ **यज्ञो वै विष्णुर्यज्ञेनैव यज्ञं संतनोतीति विज्ञायते** ॥ ८ ॥ ॥ १५ ॥[2]

**यत्रैनमामन्त्रयते** ब्रह्मन्नपः प्रणेष्यामि **इति तत् प्रसौति**—हिं प्रणय यज्ञम् ॥

देवता वर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु ।
सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ॥

ओं प्रणय **इति** ॥ १ ॥ **यत्रैनमामन्त्रयते** ब्रह्मन् प्रोक्षिष्यामि **इति तत् प्रसौति**—हिं प्रोक्ष यज्ञम् ॥

देवता वर्धय त्वं [नाकस्य पृष्ठे यजमानो अस्तु ।
सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं] यजमानं च धेहि ॥

1 D ॥ १ ॥ 2 D ॥ २ ॥

**ओं** प्रोक्ष **इति** ॥ २ ॥ **यत्रैनमामन्त्रयते** ब्रह्मन्नुत्तरं परिग्राहं परिग्रहीष्यामि **इति तत् प्रसौति—**

हिं बृहस्पते परिगृहाण वेदिं स्वगा वो देवाः सदनानि सन्तु ।
तस्यां बर्हिः प्रथतां साध्वन्तरहिंस्रा नः पृथिवी देव्यस्तु ॥
देवता वर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु ।
समर्थीयां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ॥

**ओं** परिगृहाण **इति** ॥ ३ ॥ **यत्रैनमामन्त्रयते** ब्रह्मन् प्रोक्षिष्यामि[1] **इति तत् प्रसौति—** हिं प्रोक्षै यज्ञम् **इत्येतया** ॥ ४ ॥ ॥ १६ ॥[2]

**यत्रैनमामन्त्रयते** ब्रह्मन् सामिधेनीरनुवक्ष्यामि **इति तत् प्रसौति**—हिं प्रजापतेऽनुब्रूहि यज्ञम् ॥

देवता वर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु ।
समर्थीयां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ॥

ओमनुब्रूहि **इति** ॥ १ ॥ **यत्रैनमामन्त्रयते** ब्रह्मन् प्रवरायाश्रावयिष्यामि **इति तत् प्रसौति**—हिं वाचस्पते वाचमाश्रावयैतामाश्रावय यज्ञं देवेषु मां मनुष्येषु ॥

देवता वर्धय त्वं नाकस्य पृष्ठे यजमानो अस्तु ।
समर्थीयां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ॥

ओमाश्रावय **इति** ॥ २ ॥ **यत्रास्मै प्राशित्रं परिहरति तत् प्रतीक्षते**—सूर्यस्य त्वा चक्षुषा प्रति पश्यामि [2. 6. 8. 5] **इति** ॥ ३ ॥ ऋतस्य पथा पर्येहि **इत्याह्रियमाणमभिमन्त्रयते** ॥ ४ ॥ **अप उपस्पृश्य प्रतिगृह्णाति**—देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामि [1. c. 6] **इति** ॥ ५ ॥ **व्यूह्य तृणानि पुरस्ताद् दण्डं भूमौ प्रतिष्ठापयति**—पृथिव्यास्त्वा नाभौ सादयामि **इति** ॥ ६ ॥ **अवेक्षते**—सुपर्णस्य त्वा गरुत्मतश्चक्षुषावपश्यामि **इति** ॥ ७ ॥ **अथैनदङ्गुष्ठेनोपमध्यमया चाङ्गुल्यादायासंश्लेष्यावगिरति**—अग्नेस्त्वास्येन प्राश्नामि ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणा [2. 6. 8. 6, 7] ॥ इन्द्रस्य त्वा जठरे सादयामि **इति** ॥ ८ ॥ **अप आचम्य पुनरेवाप आचामति**—या अप्स्वन्तर्देवतास्ता इदं शमयन्तु ॥ स्वाहाकृतं जठरमिन्द्रस्य गच्छ स्वाहा **इति** ॥ ९ ॥ ॥ १७ ॥[5]

**नाभिदेशमभिमृशति**—पर्शना मे मा संपृक्थाः ॥ ऊर्ध्वं मे नाभेः सीद ॥ इन्द्रस्य त्वा

1 D प्रोक्ष्यामि
2 Thus all the mss.
3 D ॥ ३ ॥
4 Gao add आश्रावय
5 D ॥ ४ ॥

जठरे सादयामि इति ॥ १ ॥ प्राणायतनानि संमृशति—वाङ् म आसन् नसोः प्राणः [5. 5. 9g] इत्येतैर्मन्त्रैर्यथारूपम् ॥ २ ॥ अद्भिः पात्रं प्रक्षाल्य पूरयित्वा प्राङ् निनयति ॥ ३ ॥ दिशो जिन्व इत्यपरं पूरयित्वाभ्यात्मं निनयति—मां जिन्व इति ॥ ४ ॥ यत्रास्मै ब्रह्मभागं परिहरति तत्र पुरा सँस्थायाः प्राश्नीयात् ॥ ५ ॥ यत् किंच यज्ञे मृन्मयं भिद्येत तदभिमृशेत्—

भूमिर्भूमिमगान्माता मातरमप्यगात् ।
भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् ॥

इति ॥ ६ ॥ अन्तर्वेद्यन्वाहार्यमासन्नमभिमृशति—ब्रह्मन् ब्रह्मासि ब्रह्मणे त्वाहुताय मा मा हिँसीरहुतो मह्यं शिवो भव इति ॥ ७ ॥ यत्रैनमामन्त्रयते ब्रह्मन् प्रस्थास्यामः इति तत् प्रसौति—हिं देव सवितरेतत्ते प्राह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा [3. 2. 7 ab] ॥ स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि [2. 6. 9. 3] ॥ ओं प्रतिष्ठ इति ॥ ८ ॥ सो ऽत्रैवास्त आ यज्ञस्य सँस्थानात् ॥ ९ ॥ सँस्थिते यज्ञे यथान्वेतमुपनिष्क्रम्याहवनीये समिधमादधाति—नमः कृताय कर्मणे ऽकृतस्य कर्मणे नमः स्वाहा इति ॥ १० ॥ आधायोपतिष्ठते—

अयाड् यज्ञं जातवेदा अदब्धो अन्तरः पूर्वो अस्मिन् निषद्य ।
सन्वन् सनिँ सुविमुचा विमुच धेह्यस्मासु द्रविणं जातवेदो यच्च भद्रम् ॥

प्र णो···[3]भिवस्यो अस्मान् सं नः सृज सुमत्या वाजवत्या इति ॥ ११ ॥ एवं विहितमेवास्येष्टिपशुबन्धेषु ब्रह्मत्वं भवति ब्रह्मत्वं भवति ॥ १२ ॥ ॥ १८ ॥[4]

[5]इति दर्शपूर्णमासे तृतीयः प्रश्नः ॥[5]

---

1 Gab मृण्म*
2 The mss. वास्त
3 D वर्न्वांस्य*, Ga वन्वाद्य*, Gb वद्म-स्य*, Gc धैर्न्वांस्य*
4 D ॥ ५ ॥
5-5 D द्वितीयः प्रश्नः ॥, Ga ॥ ३ ॥

# DIAGRAMS OF VEDIC FIRE ALTARS

## Ubhayataḥ-Praüga and Praüga-Citis

by

RAGHU VIRA

The diagrams are based on three manuscripts, viz., Panjab University Library, Lahore, Nos. 2051, 4453, 5846. Explanations of the diagrams will follow in the next number of the Journal.

*(a) Ubhayataḥ-Praüga-Citis*





DIAG. 1



DIAG. 2



DIAG. 3



DIAG. 4

(b) *Praüga-Citis*



DIAG. 5



DIAG. 6



DIAG. 7

# ROOTS AND VERB-FORMS FROM THE UNPUBLISHED PARTS OF THE JAIMINĪYA BRĀHMAṆA

by

HANNS OERTEL

The following list is culled from those parts of the Jaiminīya Brāhmaṇa which are not contained in W. Caland's Das Jaiminīya Brāhmaṇa in Auswahl (Verhandelingen der K. Akademie van Wetenschapen te Amsterdam, Afdeeling Letterkunde, Deel I Nieuur Reeks, Deel xix, No. 4, Amsterdam 1919) or in my papers published in the Journal of the American Oriental Society xv, 234; xviii, 15; xix, 97; xxiii, 325; xxvi, 176 and 306; xxviii, 81, in Actes du onzième Congrès International des Orientalistes, Paris 1897, vol. I (1899) p. 225 and in the Transactions of the Connecticut Academy of Arts and Sciences, vol. xv (1909) p. 155.

Although the text of the following extracts is often corrupt and sometimes unintelligible I have thought it best to print at least as much of it as is necessary to give the verb-forms their proper setting.

√ad: Imperf. 3 pl. ādan — 3. 148 prajāpatiḥ prajā asṛjata, tā anaśanā-anaśanā asṛjata, tā aśanāyantīr anyānyām (so the ms.; cf. Wackernagel III § 241b, p. 491-2) ādan (the ms. adan), sa prajāpatir aikṣata: katham nu ma imāḥ prajā nāśanāyeyur (the ms. nāśanāyur) iti, sa etat (sc. iṣovṛdhīyam)

samāpaśyat, tenainā iṣovṛdhīya ity evābhyamṛśat, tā asyeṣā (the ms. asyaiṣā) samaktā avardhanta, tad eveṣovṛdhīyasyeṣovṛdhīyatvam, iṣā haivāsya samaktā bhāryā vardhante ya evaṃ veda. Cf. PB. 24. 11. 2 prajāpatiḥ prajā asṛjata, tā avidhṛtā asaṃjānānā anyonyām (so !) ādan. For the iṣovṛdhīya-sāman cf. PB. 13.9.8; its nidhana is iṣo vṛdhe (Caland's note on PB. 13.9.9)—2. 229 tā asya (sc. prajāpateḥ) prajās sṛṣṭā varuṇasya yavam ādaṅs, tā varuṇo varuṇapāśenābadhnāt (the ms. °pāśenābṛṅāht, for the emendation cf. GB. 2.1.21 tā [sc. prajāḥ] varuṇo varuṇapāśaiḥ pratyabadhnāt). Barley is Varuṇa's share; cf. K. 10. 4 (128, 10) etad vai varuṇasya bhāgadheyaṃ yad yavāḥ.

Infinitive attum — 3. 341 = 342 (bis) tam attum evādhriyanta.

√an: Present 1 s. abhiprāṇimi; 3 s. prāṇiti; anūdaniti; apāniti; Participle (gen. s.) udanataḥ — 1. 50 yadā vai tūṣṇīm āste prāṇam eva vāg apyeti, yadā svapiti prāṇam eva cakṣur apyeti, tad yad evaṃvid vadati haviryajñair asya tad iṣṭaṃ bhavati, yat prāṇity agniṣṭomenāsya tad iṣṭaṃ bhavati, yad vīkṣata uttarair asya tad yajñakratubhir iṣṭaṃ bhavati, tad yad evaṃvid vadati yat prāṇiti yad vīkṣata etair hāsya tat sarvair yajñakratubhir iṣṭaṃ bhavati. — 2. 245 tad āhur : arvāṅ trirātraḥ parāṅ iti, parāṅ iti brūyāt, parāṅ hi vadati parāṅ prāṇiti parāṅ paśyati, parāṅ chṛṇoty, atho ha brūyād: arvāṅ ca parāṅ ca vadaty arvāṅ ca parāṅ ca prāṇity arvāṅ ca parāṅ ca paśyaty arvāṅ ca parāṅ ca śṛṇoti; cf. PB. 20. 16. 6 parā3ṅ arvā3ṅ ity āhuḥ, parāṅ iti brūyāt, parāṅ hi vadati parāṅ paśyati parāṅ prāṇiti.— 1. 249 agnir vā asya lokasya vajro vāyur antarikṣasyādityo divas, tad idam adhyātmaṃ, yo 'gnir vāg eva sā, yo vāyuḥ prāṇa eva sa, ya ādityaś cakṣur eva tat, tasmād yad ahaṃ dviṣantam abhivadāmi yad abhiprāṇimi yad abhivīkṣe vajram evāhaṃ tasmai taṃ praharāmi. — 1. 254 ekaṃ sāma, tasmād etenaikam eva prāṇena karoti yad eva prāṇān udanato 'nūdaniti,..., dve sāmanī, tasmād dvayaṃ prāṇena karoti prāṇyāpāniti. — 1.1 tad yāvad vai manthati na tarhi prāṇity, araṇyor

evāsya tarhi prāṇā bhavanti. For holding one's breath while performing a work requiring strong exertion cf. ChUp. 1. 3. 5; KB. 23.5 (105, 18 Lindner).—1. 20 yāvad dhy eva prāṇena prāṇiti tāvad agnihotraṃ juhoti.—1. 327 athābhyaniti, prāṇo vai śāntir, agnir vai bṛhadrathantare, te prāṇena śamayati.—Whitney, Roots, p. 2 lists a 3s. Middle "anate JB." This must refer to 2. 56 prāṇa eva prāyaṇīyo 'tirātraḥ, prāṇo hīdaṃ sarvaṃ prāṇeta tad yat prāṇeta tasmāt prāṇo, vāg evārambhaṇīyam ahar, vācā hi sarvas saṃvatsaras sarve yajñakratava ārabdhās, tasmād ārambhaṇīye 'han sarvāṇi rūpāṇi kriyante, sarvāṇi hi rūpāṇi vāci,..., trivṛt prāyaṇīyam ahar yat prāṇā (so the mss.) idaṃ sarvaṃ prāṇeta, tad yat prāṇeta tasmād apy etat prāyaṇīyam ahar, imā eva grīvāḥ pañcadaśam ahar, ojo vai vīryaṃ grīvā, ojo vīryaṃ pañcadaśas (i.e. pañcadaśastomaḥ). tasmāt paśavo grīvābhir bhāraṃ vahanti. The passage is undoubtedly corrupt, the apparent 3s. Middle Optative prāṇeta, though four times repeated cannot be correct. Doubtingly I venture to suggest that the original may have intended a connection of prāṇa with the √nī+pra, cf. Kena Up. (=JUB. 4. 18) 9; Praśna Up. 4. 3; ŚB. 7. 5. 1. 21; AB. 5. 31. 3, something like an equation: prāṇa=praṇetṛ (tad yat praṇetā tasmāt prāṇaḥ ?).

Imperfect 3 pl. udānan 3. 345 (see below under √aś 'eat') and samānan 2. 79 (see below under √tam).

Infinitive prāṇitum, apānitum 1. 279 (s. below under Gerund).

Gerund prāṇya, apānya—s. above under Present 1. 254, and 1. 279 tasmāt prāṇyāpānituṃ śaknoti,..., tasmād apānya prāṇituṃ śaknoti.

√aś 'eat': Gerund aśitvā—3. 345 tābhyo (sc. prajābhyaḥ) 'varṣat, tata odano 'jāyata, tam aśitvodānan, sa udano 'bhavat, tad udanasyodanatvam, udano ha vai nāmaiṣa, tam odana iti parokṣam ācakṣate=347=349 which, however, omit udano ha vai...ācakṣate.

√aś 'attain': Present 1 pl. Optative aśnuvīmahi—3. 236

tad v evācakṣate 'ṅgirasyānāṃ sāmety, aṅgirasyā ha vai nāma ṛṣīṇāṃ putrā āsus, te 'kāmayanta: svargaṃ lokam aśnuvīmahīti, ta etat sāmāpaśyaṅs, tenāstuvata, tato vai te svargaṃ lokam āśnuvata, tad etat svargyaṃ sāmā, 'śnute svargaṃ lokaṃ ya evaṃ veda, yad v aṅgirasyā apaśyaṅs tasmād aṅgirasyānāṃ sāmety ākhyāyate.

Perfect 3 s. (with Present function) ānaśe, 2. 86; 187; 283. Root Aorist 3 s. āṣṭa—2. 309 tenā (sc. aṣṭarātreṇa) 'yajata, tato vai so 'smāl lokād amuṃ lokam āṣṭa, yad asmāl lokād amuṃ lokam āṣṭa tad aṣṭarātrāṇām aṣṭarātratvam. For the connection of the numeral aṣṭau with the √aś 'attain' cf. AB. 1. 12. 3; PB. 22. 11. 6; Nir. 3. 10 (Wackernagel III § 184 a, note, p. 357).

√aśanāy: Present 3 s. aśanāyati—1.252 na ha vā aśanāyati na pipāsati nāsya kā canāvṛttir bhavati ya evaṃ veda.—2. 382 nāśanāyati na pipāsati, nārtim archati.—3pl. Optat. aśanāyeyuḥ 3. 148 (s. above under √ad); and 3. 256 atha dairghaśravasam (sc. sāma), annaṃ vai dairghaśravasam annādyasyaivāvaruddhyai, dīrghatamā vai māmateyas saniṃ prayann abravīd dīrghaśravasaṃ kanīyāṅsaṃ bhrātaram: eteṣāṃ no bhāryāṇām adhyakṣas syā (the ms. bhāryāṇām maddhyakṣa sthā; emended after Caland, Auswahl, p. 308, last line from bottom), so 'kāmayata dīrghaśravā (the ms. dīrghaśravasā): avānnādyaṃ rundhīya, neme (the ms. mai; Caland, Auswahl, p. 309,1 mā, but that is impossible on account of the following Optative) bhāryā aśanāyeyur iti, sa etat sāmāpaśyat, tenāgnim astaud: yo viśvā dayate vasu hotā mandro janānāṃ madhor na pātrā prathamāny asmai pra stomā yantv agnaya (SV. 1. 44 = RV. 8. 103. 6; add the references to JB. in Bloomfield's Concordance) iti, so 'smā agnis stutas sarvam evedaṃ madhumayam annādyam akarot. Cf. Caland's translation PB. 15. 3. 25; note 3.

Participle nom. pl. fem. aśanāyantīḥ 3.148 (s. above under √ad).

Imperfect 3 s. áśanāyat 3. 312 (s. below under √tṛp); 3 pl. āśanāyan 1. 116 (s. below under √ pi [pī]).

√ah : Perfect 3 dual āhatuḥ—1. 41 taṃ prāṇāpānāv āhatuḥ.

√āp : Present Subjunct. 1 s. āpnavāni—1. 235 etad dha vai paramaṃ vācaḥ krāntaṃ yad daśety, etāvad dha paramaṃ vāk cakrame : tad yat paramaṃ vācaḥ krāntaṃ tat sarvam āpnavānīti (var. lect. āpnuvānīti for which cf. Whitney § 701; Oertel, Sitzungsberichte d. bayer. AK. d. Wiss. 1934, Heft 6, p. 55, § 17).

Imperative 2 s. āpnuhi—1. 41 (septies) śraddhā te mā vigāt, sarvaiḥ kāmais tṛpya, svargaṃ lokam āpnuhi.

A-Aorist 1 pl. āpāma—2. 375 ta etad u ha vā eke sattriṇo 'har upetyottasthur : āpāma saṃvatsaram iti.—vyāpāma 3. 78 devā vai svargakāmās tapo 'tapyanta, ta etat sāmāpaśyaṅs, tenāstuvata, tad enān bṛhad eva bhūtvā svargaṃ lokam avahat, tenābruvan svargaṃ lokaṃ gatvā : bṛhad vāva na idaṃ kam abhūd yena svargaṃ lokaṃ vyāpāmeti, tad eva bṛhatkasya bṛhatkatvam.—samāpāma 1. 3 te (sc. devāḥ) 'bruvan : devaśarīrair vā idam amṛtaśarīrais samāpāma, na vā idaṃ manuṣyās samāpsyanty, etemaṃ yajñaṃ saṃbharāmeti.—3 s. vyāpat 3. 2 sa evaiṣa prajāpatis saṃvatsaro 'bhavat, sa idaṃ sarvaṃ (?, the mss. sarvaṃstadvā and sarvaṃstavethavā) vyāpyātiṣṭhat, sa aikṣata : kayā svadhayā kenānnādyena kayorjedam ayaṃ vyāpad iti.

Future 3 pl. samāpsyanti 1. 3 (s. above under A-Aorist samāpāma).

√ās : Future 1 s. āsiṣye—2. 26 na ha brūyāt : sattram āsiṣya iti, śramiṣyāmīty eva vaktavyam.—1 dual Subjunctive āsiṣyāvahai 2. 330 (s. below under √bhū), perhaps false reading for āsiṣyāvahe (Whitney § 938, but AB. 3. 50. 1 notsyāvahai and JB. 3. 367 praty . . . ātapsyāni, s. below under √tap.)

√i : Future 3 pl. eṣyanti—2. 328 mṛtyur ekaviṅśam evābhipratyādravad : idam evāta eṣyantīti,..., mṛtyus trayastriṅ-

śam abhiparyetyātiṣṭhad: idam ata eṣyantiti,..., mṛtyus trayastriṅśam evābhipratyādravad: idam evāta eṣyantīti. But 2. 390 (JAOS. XVIII, 47) Conditional 3 s. ayiṣyat—yan ma etam uttaram ardharcaṃ putraḥ prāpsyan na caivainam agnau prāsiṣyan sarvam u cāyur ayiṣyat. For ayiṣyat cf. nom. sg. masc. and acc. sg. fem. of the Future Participle ayiṣyan and ayiṣyantīm LŚS. 4. 2. 10. And cf. anayiṣyat (?) 1. 139 below under √nī Conditional.

Infinitive in -toḥ, etoḥ—2. 288 = 3. 33 īśvaraḥ purāyuṣo 'muṃ lokam etoḥ, cf. AB. 8. 7. 8 īśvaro ha tu purāyuṣaḥ praitoḥ.

Gerund in -am, anuparyāyam—3. 115 anuparyāyam eva puriṣeṇa stotavyam; cf. ṢB. 2. 9. 2 sarveṣv (sc. agniṣu) evānuparyāyaṃ juhuyāt, and paryāyam AB. 4. 5. 3; PB. 9. 1. 3.

√i+pari: Present Participle Middle palyayamānaḥ—2. 333 = 337 māsyaṃ vā etat sattraṃ, tena yarddhis saivarddhir, māso ha khalu vai punaḥ-punaḥ palyayamānas saṃvatsaram āpnoti; cf. 1. 286 upapalyāyata (Caland, Auswahl, p. 112, 23) and palyāyamānaḥ JUB. 3. 29. 3; 31. 3.

√il: Causative Present Participle nom. pl. fem. anilayantīḥ—3. 309 gāyatramukho vai prathamas tryahas, tasmād ayam agnir asmiṅ loka ūrdhvo dīdāya, gāyatramadhyo dvitīyas tryahas, tasmād ayaṃ vāyur asminn antarikṣe tiryaṅ pavate, gāyatrottamas tṛtīyas tryahas, tasmād asāv arvāṅ āditye divas tapaty. etā vai deveṣavaḥ praṇihitā aniśitā anilayantīr eṣu lokeṣu sarvaṃ pāpmānam apasedhayantīs tiṣṭhanty agniḥ pṛthivyāṃ vāyur antarikṣa ādityo divy, etā asya sarvaṃ pāpmānam apaghnatyo yanti ya evaṃ veda. For the beginning cf. 3. 6 gāyatramukho vai prathamas tryahas, tasmād ayam agnir ūrdhvo dīdāya, gāyatramadhyo dvitīyas tryahas, tasmād ayaṃ vāyus tiryaṅ pavate, gāyatrottamas tṛtīyas tryahas, tasmād asāv arvāṅ ādityas tapati, also PB. 10. 5. 2 and AB. 4. 25. 10. For the rest s. below under √ dī 'shine' 3. 6 = 3. 309.

√iṣ 'seek': Perfect 3 s. iyeṣa—1. 246 yathā śailana iyeṣa; the surrounding text is hopelessly corrupt. The Śailana men-

tioned is Sucitta Śailana as appears from the preceding chapter 1. —245 etāsu (sc. virāṭsu) ha sucittaś śailano janakaṃ vaidehaṃ samūde. iyeṣa also at ŚB. 6. 2. 2. 20.

√īkṣ: Periphrast. Perfect 3 s. īkṣāṃ cakre —2. 308 sa (sc. jamadagniḥ) hekṣāṃ cakre.

√īr: Present 3 pl. prerate —3. 301 gaurīvitir vā etaṃ śaktyas trayastriṅśaṃ stomam apaśyad ubhayeṣāṃ paśūnām avaruddhyai ye ca grāmyā ye cāraṇyās, tato vai sa ubhayān paśūn avārundhata, tad yat trayastriṅśaṃ stomaṃ nāntaryanti tasmāt trayastriṅśaḥ (so the ms.) parāñca āraṇyāḥ paśavaḥ prerate. I do not understand the last clause; remotely similar perhaps ŚB. 13. 5. 4. 17 ṣaṭ-ṣaṭ ṣaḍḍhā sahasrāṇi yajñe kokapitus tava । udīrate trayastriṅśāḥ.

√ubj: Gerund nyubjya —1. 353 yadi dhruvaḥ (i. e. the dhruvagraha) pravarteta saṃlikhya (var. lect. sallikhya) nyubjya yac chuddhaṃ tenābhyutpūrayed, yady āgrayaṇo grahaḥ pravartetetarebhyo 'bhyutpūrayed, ātmā vā āgrayaṇo grahaḥ prāṇā itare, prāṇebhyo vā ātmā saṃbhavati.

√uṣ 'burn': Present 3 dual udoṣataḥ —1. 328 sa yathā gharmaṃ taptaṃ śaphābhyāṃ parigṛhya hared evam evaitad bṛhadrathantare vāmadevyābhyāṃ parigṛhya harati, te enaṃ nodoṣatas, sa sarvam āyur eti ya evaṃ vidvān bṛhadrathantare gāyati. The śaphau serve the same purpose as the iṇḍvau in lifting a hot kettle from the fire.

√ūh 'remove': Future 1 s. vyūhiṣyāmi —3. 1 prajāpatir vāvedam agra āsīt, so 'kāmayata: bahu syāṃ, prajāyeya, bhūmānaṃ gacheyam iti, sa tapo 'tapyata, sa ātmann ṛtviyam apaśyat, tatas trīn ṛtūn asṛjatemān eva lokān, yad ṛtviyād asṛjata tad ṛtūnām ṛtutvaṃ, yad ṛtviyād ajanayat tasmād ṛtvija ity ākhyāyante, sa yat prathamam atapyata tato grīṣmam asṛjata, tasmāt sa baliṣṭhaṃ tapati, yad dvitīyam atapyata tato varṣā asṛjata, tasmāt tā ubhayaṃ kurvanty ā ca tapanti varṣanti ca, yat tṛtīyam atapyata tato hemantam asṛjata, tasmāt sa śītatama iva, trīn sato 'bhyatapyata, (the mss. erroneously

insert here from below: tān dvedhā vyauhat, te dvādaśa māsā abhavan), sa grīṣmād eva vasantaṃ niramimīta varṣābhyaś śaradaṃ hemantāc chiśiraṃ, tasmād eta ṛtūnām upaśleṣā iva, nirmitā hi ṣaṭ (here follows in the mss. a lacuna, immediately after the lacuna: py eta), tān dvedhā vyauhat, te dvādaśa māsā abhavan, dvādaśa sato 'bhyatapyata, tān dvedhā vyauhat, te caturviṅśatir ardhamāsā abhavaṅś, caturviṅśatiṃ sato 'bhyatapyata, sa aikṣata: yadi dvedhā vyūhiṣyāmi (var. lect. vyūhayiṣyāmi) na vibhaviṣyanti, hanta, nirmimā (the mss. nirmitā and nirmma) iti, tebhyas sapta ca śatāni viṅśatiṃ cāhorātrāṇi niramimīta, sa idaṃ sarvaṃ vyakarot...The clause tasmād eta ṛtūnām upaśleṣā iva...is not clear to me. For the 1 s. Present Subjunctive nirmimai cf. ŚB. 1. 1. 2. 7 (=Kāṇva 2. 1. 2. 9)=ŚB. 1. 3. 1. 21 yajñād yajñaṃ nirmimā iti; GB. 1. 1. 1 hanta mad eva manmātraṃ dvitīyaṃ devaṃ nirmimā iti.

Gerund always -ūhya, vyūhya—1. 1 tāṅs tredhā vyūhya devān kṛtvā teṣu juhvad āste.—pratyūhya 1. 28 yathā suvarṇaḥ pravṛktas tapyamānas suvarṇatvam abhiniṣpadyata evam eva dviṣatsu bhrātṛvyeṣu malaṃ pāpmānaṃ pratyūhya svargaṃ lokam abhipraiti.—1. 37 tad vai tad agnihotraṃ dvādaśāhaṃ prajāpatir hutvā devebhyaś ca ṛṣibhyaś ca pratyūhya svargam eva lokam abhyuccakrāma, ..., tad (sc. devāś ca ṛṣayaś ca) dvādaśāhaṃ hutvā pūrvebhyo manuṣyebhyaḥ pratyūhya svargaṃ v eva lokam abhyuccakramuḥ.—nirūhya 1. 39 aṅgārān nirūhya tathādhiśrayati; cf. TB. 2. 1. 3. 1 udīco 'ṅgārān nirūhyādhiśrayati.

√ṛj (arj): Causative Present 3 pl. prārjayanti and 3 s. Optative prārjayet—1. 38 svayam ahatavāsā yajamāno 'gnihotraṃ juhuyād ajasreṣv agniṣv apravasan trayodaśīṃ rātriṃ somena vā paśunā veṣṭvotsṛjeta, yathā sāvasaṃ kṛtvā prārjayet tādṛk tat; cf. the almost identical quotation from the Śāṭyāyanabrāhmaṇa at ĀpŚS. 5. 23. 3.—3. 306 sa yathā nyokasaṃ gāṃ saṃyujya prārjayed evam evaitad vācaṃ ca yajamānaṃ ca saṃyujya prārjayanti; is the ms. reading nyokasam correct

or should vyokasam be read ? Cf. ŚB. 9. 3. 2. 6 yathā vyokasau saṃyuñjyāt and PB. 14. 3. 8 yathā (sc. vyokasau) samānīya saṃyuñjyāt (Bibl. Ind. text and commentary saṃyujyāt).

*āskanda* Lüders Würfelsp. p. 38

*āstāva* C–H

*āstuta* PB IV. 3. 12 "chant" (?)

*āharaṇaprīti* BŚS V. 15, Baudh. p. 59 "*āharaṇād eva prītir yasya*"

*āhartṛ* BŚS XXI. 7

*āhalaku* Khila

*āhāna* (?) VŚS I. 2. 1. 2, 6. 1. 7 "bent" (?)

*āhārya* BŚS XXV. 27 "*dvitīyāhāra-nimittām*"; JB p. 228 n. 59 (sens ?)

*āhāva* Rajavade Words in Rgv. I (index); C–H

*āhita* BŚS XXIV. 31 "*ādhigṛhītā* (sic) *gauḥ, garbhiṇīty anye*"

*āhīnikī* ŚŚS IX. 19. 1

*āhuta* BŚS XXIV. 4 a kind of *pāka-yajña*

*āhutiṣāh* BŚS IV. 3, X. 52 "*jvala-yitvā*"

*āhutisahasra* KhGS IV. 3. 15 "a thousand oblations"

*āhutī* HirGS I. 3. 7 : pour *-i*

*āhutisahi* Kauś. p. XLVII "strong in sacrifice"

*āhutyupakrama* KhGS 1. 5. 6 "beginning with an (evening) oblation"

*āhomāt* KhGS I. 1. 23 "until the oblation has been performed"

*āhvar–* VādhS II p. 167, IV p. 212 caus. (sens ?)

*āhval–* ŚBK p. 57

I

*i–* VādhS VI p. 132 (**iyate*); MB I p. 30, II p. 71 (*edhi*); JUB p. 259 (*aitat*); ŚŚS XVI. 22. 21 (*ayantinām*), XV. 27 (*itām*); ŚBK p. 44 (*ayama, ayate*, et cf. Oertel ZII V p. 106); Baudh. p. 42 (*āyaḥ* impft.); Meyer ZII VIII p. 39 (*iyate*), p. 41 (*īmahi*); Oertel ZII V p. 119 (*praśnam i–* suivi d'acc.)

*iṅkh–* ŚBK p. 52 (*iṅkhayant*) = *aṅkhayant* M

*iṅg–* ŚBK p. 52 (*paliṅgya, vipaliṅgayate, vipalyaiṅgayanta*) = *aṅg–* M

*iṅgiḍa* Zauberr. p. 159 n. 5 prob. = *iṅguḍa*

*iḍ–* v. *il–*

*iḍapātra* PiS p. XIX one of the sacrificial utensils

*iḍasūna* Todteng., Schwab Thieropfer p. 49, Caland Altind. Ahnencult p. 29, BŚS IV. 1 etc. "hachoir (de boucherie)"

*iḍā* VaiSS II. 1 "ground"

*iḍādadha* BŚS XVII 52 a *kāmya darśapūrṇamāsa*

*iḍādhāna* BŚS IV. 8 "*iḍāpātram*"

*iḍāpātrī* Todteng.

*iḍopahavana* PiS p. XI one of the sacrificial utensils; cf. Todteng.; BŚS I. 18 adj. = *iḍāpātra*

*iḍopahūta* BŚS XII. 16

*iṇḍva* BŚS XVII. 31, 32 "*ghaṭādhārakaṃ tṛṇair maṇḍalākāram*"

*it* (*nyet*) MP p. XXVII et cf. *id*

*itara* ŚBK p. 42 (nt. *itaram*); PB V. 1. 4, 7. 6 (emploi analogue au grec *ἄllos*)
*iti* JŚS p. XXVII, ŚBK p. 80, Oertel, AB transl. Keith p. 81 et 94, TS transl. Keith p. CLVIII, AĀ ed. Keith p. 59, GobhGS I p. XVIII: emploi, place, etc.; VādhS IV p. 175 (*iti ceti ca* "ça et là")
*itihāsapurāṇa* Oertel (msc.)
*itu* Khila "réunion, entrevue"
*itthaṃgotra* BŚS VI. 5
*itthaṃpadī* JB "ayant de tels pieds"
*itthāt* VādhS IV p. 179 (répété) "par ici...par là"; ŚBK p. 84 (*itthāc cetthāc ca*, = *itaś cetaś ca* M)
*ityanta* (?) MGS I. 8. 9
*id* ŚBK p. 78 (emploi); Over JB p. 24 (*id vai*)
*idadvasu* Oertel KZ LVIII p. 290
*idānīntana* BŚS XXVI. 24
*idānīm* ŚBK p. 32 (accent)
*idhmābarhis* ŚBK p. 49: *idhmaṃ barhiḥ* M
*indu* Charpentier Brahman p. 39
*indrakukṣi* ŚŚS XIII. 29. 23, 25
*indrakratu* ŚŚS XII. 9. 17
*indraghoṣavant* BŚS IV. 2, XXIV. 36
*indraṇata* JB p. 137 n. 4 "courbé à la racine (dit d'un jonc)" (?), cf. *indre*°
*indraturīya* BŚS XII. 4, XXVI. 3
*indravajra* BŚS XVIII. 36, 48, Baudh. p. 63 name of an Ekāha
*indrasenā* Venkatasubbiah Vedic Studies I p. 61
*indrastut* BŚS XVIII. 14 name of an Ekāha
*indrastoma* BŚS XVI. 35
*indrasparśa* BŚS XXVI. 31
*indrāṇasa* BŚS XV. 14 etc., Baudh. p. 63 "voiture du roi" (?)
*indrābhihāra* BŚS XXIV. 9
*indrāvataḥ* (RV) Fukushima J. Taisho Univ. VI–VII (1930) p. 131
*indrāviṣṇuḥ* (!) ŚŚS XIV. 37. 1
*indriyeṣya* PB XXI. 1. 5 prob. "coveted by Indra", cf. *indreṣya*
*indreṇata* PB p. 88. 404 "(a reed) that is bent of itself"; var. *indra*°, q. v.
*indreṣya* JB "désiré par Indra", cf. *indriyeṣya*
*iyatpriya* JB "si cher à"
*iraṇa* MGS II. 1. 10 etc.; var. de *iriṇa*
*irammadantiḥ* (*āpaḥ*) ĀpŚS I. 16. 8 prob. = **mad(a)*
*iriṇa* ĀpŚS V. 25. 9
*il–* Lüders Fests. Wackernagel p. 299 (*iḷay–*, *ilay–*); ŚBK p. 51 (*iḷayati*, = *ilayati* M)
*iva* AĀ ed. Keith p. 164, AB transl. Keith p. 89, Oertel, GobhGS I p. XIX (au sens de *eva*)
*iṣ–* (TS *iṣe*, cité Kṣīrataraṅg. ed. Liebich p. 148)
*iṣu* BŚS XVIII. 36 name of an Ekāha; ṢB III. 2. 1, 9. 23 nom d'une *viṣṭuti*
*iṣujita* BŚS XV. 37 (?)
*iṣūdhanūs* ŚBK p. 49 (accents)
*iṣṭakā* Przyluski Ind. Hist. Qu. VII p. 815
*iṣṭakāvat* BŚS XXII. 8 adv.
*iṣṭakokta* BŚS XXII. 2 "*iṣṭakāsu śabditam*"
*iṣṭarga* BŚS XIV. 4, XXVI. 7 (sens ?)
*iṣṭi* Bhandarkar Ann. Bhand. IX

p. 260
*iṣṭipatha* BŚS XXIII. 1
*iṣyāḥ* (nom. pl. msc. ?) Oertel

Ī

*īkṣakāvekṣaṇa* KhGS I. 3. 27 "looking at the lookers-on"
*īḷ-* v. *il-*
*ītyā* Baudh. p. 18 (sens ?)
*īdhryañc* JB (ex conj.) (répété) "de ce côté-ci...de ce côté-là"; cf. Over JB p. 22
*īpsatā* JŚS p. XXX "fait de vouloir avoir"
*īrma* BŚS VI. 12, XXI. 9
*īledyāvīya* ŚŚS V. 9. 24, VI. 6. 12
*īś-* AĀ ed. Keith p. 56, AB transl. Keith p. 75 (3me sing. *īśe*)
*īśānānī* ŚŚS IV. 19. 5
*īśvara* PB p. XXVIII (finale *-ā* là où l'on attend un msc.); ŚBK p. 74 (particularités d'emploi); Oertel (msc. genderless; *īśvara* + *yad*-clause)
*īṣā* ĀpŚS XIX. 20. 15 = *gadhā* (?); BŚS XXX. 1 name of a measure
*īṣya* JB p. 233 n. 1 = *īrṣ(y)a*

U

*u* BŚS tome III fasc. VI (additions) p. 117, JŚS p. XXVII, ŚBK p. 35 et 79, AB transl. Keith p. 90, GobhGS I p. XX, JUB p. 259, Ārṣ. p. XXI (emploi, sandhi); notamment *u ha* VādhS I p. 9, *uv eva* VādhS II p. 153 et 187, IV p. 212, VI p. 131, 167 et 240, BŚS loc. cit.; *u* explétif dans *teno* JUB p. 259
*uktasampraiṣa* BŚS XXV. 18
*uktha* ĀpŚS XII. 27. 19 = *śastra*; PB p. 46 = *ukthya*
*ukthaṃvāc* : à supprimer chez pw., cf. Caland ZDMG LVIII p. 505
*ukthāvī* (*ukthāyuvam* acc.) ŚBK p. 51; Oertel ZII VIII p. 285
*ukthya* JB p. 108 n. 7 = *uktha*
*ukthyagraha* C-H
*ukthyavigraha* BŚS XXI. 19, XXV. 23
*ukthyastotriya* ŚŚS XI. 2. 13
*ukṣavaśa* Oertel "boeuf sans pouvoir procréateur"
*ukṣavehat* BŚS XVIII. 40; Oertel "either an ox or a cow who is wont to miscarry" (?)
*ukhacchid* Venkatasubbiah Ind. Ant. LVIII p. 163
*ukhā* Todteng.
*ukhyāsandī* BŚS X. 12
*ugra* ĀpŚS XX. 4. 2 "fils d'un kṣatriya et d'une śūdrā" (?); BŚS XV. 5 etc.
*uccarti* (ex conj.) MŚS p. 76 v. *ucyarti*
*uccaśaḥ* GB p. 38 (mot corrompu, à supprimer du pw.)
*uccāra* BŚS II. 20 dans *prāñuccāra*
*uccāvacam* ṢB II. 2. 12 "*aṃśabhedena niruktām aniruktām*"
*uccairvājin* HirGS I. 10. 6 "which brings high gain"
*uccairvādin* MP II. 8. 2
*uccaiśrāvin* MP II. 14. 1
*uccaiḥśrāvyakarṇaka* HirGS II. 3. 7 (nom propre)
*uccaiḥ* PuS "avec une élévation de la voix"
*ucchaṃsana* (?) MŚS p. 159

याजमानं व्याख्यास्यामः ॥ १ ॥ पर्वणि यजमानः केशश्मश्रु वापयते ॥ २ ॥ अग्निहोत्रं हुत्वा

देवा गातुविदो गातुं यज्ञाय विन्दत ।

मनसस्पतिना देवेन वाताद् यज्ञः प्रयुज्यताम् ॥ [ TB 3. 7. 4. 1 ]

इत्यध्वर्युर्जपित्वा प्रातरग्नीनन्वादधाति ॥ ३ ॥ ममाग्ने वर्चो विहवेष्वस्तु [ 4. 7. 14 *a* ] इति पूर्वमग्निं गृह्णाति ॥ ४ ॥ तूष्णीमितरौ[4] ॥ ५ ॥ द्वितीयया गार्हपत्यं तृतीययान्वाहार्यपचनम् ॥ ६ ॥ तिसृभिस्तिसृभिर्वैकैकम् ॥ ७ ॥ उत्तमां तु जपेदाहवनीये वादध्यात् ॥ ८ ॥ व्याहृतिभिरग्न्यन्वाधानमेके समामनन्ति ॥ ९ ॥ याजमानमेके ॥ १० ॥ अग्न्यन्वाधीर्याजमानानि[7] यजमान उपतिष्ठते—

अग्निं गृह्णामि सुरथं यो[8] मयोभूर्य उद्यन्तमारोहति सूर्यमह्ने ।

आदित्यं ज्योतिषां ज्योतिरुत्तमं श्वो यज्ञाय रमतां देवताभ्यः ॥

वसून् रुद्रानादित्यानिन्द्रेण सह देवताः ।

ताः पूर्वः परिगृह्णामि स्व आयतने मनीषया ॥

इमामूर्जं पञ्चदशीं ये प्रविष्टास्तान् देवान् परिगृह्णामि पूर्वः ।

अग्निर्हव्यवाडिह तानावहतु पौर्णमासं हविरिदमेषां मयि ॥

आमावास्यं[8] हविरिदमेषां मयि ॥ [ TB 3. 7. 4. 3, 4 ]

इति यथालिङ्गमाहवनीयम् ॥ ११ ॥ ॥ १ ॥

अन्तराग्नी पशवो देवसंसदमागमन् ।

तान् पूर्वः परिगृह्णामि स्व आयतने मनीषया ॥ [ l. c. 4, 5 ]

1 D begins with ॐ
Ga य॰

2 Gbc ॰श्रू

3 Ga ॰ग्निम॰

4 Gbc ॰मपरौ

5 D om, वा

6 Gc om, तु

7 Thus D; Ga अग्न्यन्वाधीयमानान्, Gb अग्नान्वाधीयमानान्, Gc अन्वाधीयमानात्

8–8 Gc om,

इत्यन्तराग्नी तिष्ठन् जपति ॥ १ ॥

इह प्रजा विश्वरूपा रमन्तामग्निं गृहपतिमभिसंवसानाः ।
ताः पूर्वः परिगृह्णामि स्व आयतने मनीषया ॥
इह पशवो विश्वरूपा रमन्तामग्निं गृहपतिमभिसंवसानाः ।
तान् पूर्वः परिगृह्णामि स्व आयतने मनीषया ॥ [ TB 3. 7. 4. 4, 5 ]

इति गार्हपत्यम् ॥ २ ॥

अयं पितॄणामग्निरवाड्ढव्यो पितृभ्य आ ।
तं पूर्वः परिगृह्णाम्यविषं नः पितुं करत् ॥ [ l. c. 5 ]

इत्यन्वाहार्यपचनम् ॥ ३ ॥

अजस्रं त्वां सभापाला विजयभागं समिन्धताम् ।
अग्ने दीदाय मे सभ्य विजित्यै शरदः शतम् ॥ [ l. c. 5, 6 ]

इति सभ्यम् ॥ ४ ॥

अन्नमावसथीयमभिहराणि[1] शरदः शतम् ।
आवसथे श्रियं मन्त्रमहिर्बुध्नियो[2] नियच्छतु ॥ [ l. c. 6 ]

इत्यावसथीयम् ॥ ५ ॥

इदमहमग्निज्येष्ठेभ्यो वसुभ्यो यज्ञं प्रब्रवीमि ॥
इदमहमिन्द्रज्येष्ठेभ्यो रुद्रेभ्यो यज्ञं प्रब्रवीमि ॥
इदमहं वरुणज्येष्ठेभ्य आदित्येभ्यो यज्ञं प्रब्रवीमि ॥ [ l. c. 6, 7 ]

इति च सर्वान् ॥ ६ ॥ ॥ २ ॥

य एवैषो[3] ऽग्निहोत्राय प्रणीतस्तं गृह्णीयादित्याश्मरथ्यः अन्यं प्रणयेत्या-लेखनः ॥ १ ॥ अशनमग्न्यन्वाधानं व्रतोपायनमित्येवमनुपूर्वाण्येके समामनन्ति । अग्न्यन्वाधानमशनं व्रतोपायनमित्येके । व्रतोपायनमशनमग्न्यन्वाधानमित्येके ॥ २ ॥ पुरा बर्हिष आहर्तोर्जायापती सर्पिर्मिश्रमश्नीयातां यदन्यन्माषेभ्यो मांसाच्च ॥ ३ ॥ पुरा वत्सानामपाकर्तोरित्यपरम् ॥ ४ ॥ ततो यजमानः केशश्मश्रु[9] वापयते ॥ ५ ॥ अपरेणाहवनीयमतिक्रम्य दक्षिणत उदगावृत्त उपविश्याप आचा-

1 Gb °हुन्यानि
2 DaGab °मि
3 Gab °ध्न्यो
4 Gac om.
5 Gc °षाम्
6 Gb °मग्न्या°
7 Ga व्रतोपनयनम्
8 DGc अन्वा°
9 Gb °श्रू

मति—पयस्वतीरोषधयः [ 1. 5. 10 *g* ] इत्येतया ॥ ६ ॥ तत आदित्यमुपतिष्ठते—सम्राडसि व्रतपा असि व्रतपतिरसि व्रतमारभे । तत्ते प्रब्रवीमि तच्छकेयं तेन शकेयं तेन राध्यासम् इति ॥ ७ ॥ यदि निम्रुक्ते सूर्ये व्रतमुपेयादाहवनीयमेवैतेन मन्त्रेणोपतिष्ठते[2] ॥ ८ ॥ बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति विज्ञायते ॥ ९ ॥ ॥ ३ ॥

दक्षिणतस्तिष्ठन्नाहवनीयमभिमन्त्रयते—अग्ने व्रतपते व्रतं चरिष्यामि [ l. c. *h* ] इति । स एष[4] ब्राह्मणस्यैव स्यादेतरयोर्वर्णयोः[5] ॥ १ ॥ वायो व्रतपते [ TB 3. 7. 4. 7 ] इति वायुमुपतिष्ठते । आदित्य व्रतपते [ l. c. ] इत्यादित्यम् । व्रतानां व्रतपते [ l. c. 8 ] इत्याहवनीयम् ॥ २ ॥ अन्ततो देवता उपतिष्ठते—देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु । त्रिरेकादशा इह मावत । इदं शकेयं यदिदं करोमि । आत्मा करोत्वात्मने । इदं करिष्ये भेषजमिदं मे विश्वभेषजा अश्विना[6] प्रावतं युवम् [ TB 3. 7. 5. 1 ] इति ॥ ३ ॥ व्रतमुपयन् समुद्रं मनसा ध्यायति ॥ ४ ॥ स एतद् व्रतं चरति—न मांसमश्नाति न स्त्रियमुपैति नोपर्यास्ते जुगुप्सते[9] ऽनृताद् अनाश्वानेतां रात्रिमुपवसत्यपो वाश्नात्यारण्यं[11] वा । काममारण्यस्याश्नीयात् ॥ ५ ॥ आ मार्गादा मधुन आ प्राशातिकादित्येकेषाम् ॥ ६ ॥ आरण्यायोपवसन्नपो वाश्नीयान्न वा किंचन ॥ ७ ॥ अमावास्यां रात्रिं जागर्ति ॥ ८ ॥ अपि वा यथा शक्नुयात् तथा कुर्यात् ॥ ९ ॥ उपरि त्वेव न शयीत ॥ १० ॥ काममुपरि शयीत ॥ ११ ॥ व्रतचारी त्वेव स्यात् ॥ १२ ॥ ॥ ४ ॥

आहवनीयागारे गार्हपत्यागारे वा संविशति ॥ १ ॥ श्वो भूते ऽपरेणाहवनीयमतिक्रम्यापरेण ब्रह्मसदनं यजमान आहवनीयमभिमुख उपविशति ॥ २ ॥ सो ऽत्रैवासीनः कर्माणि क्रियमाणान्यभिमन्त्रयते ॥ ३ ॥ अग्नीन् परिस्तीर्यमाणानभिमन्त्रयते[13]—

उभावग्नी उपस्तृणते देवता उपवसन्तु मे ।
अहं ग्राम्यानुपवसामि मह्यं गोपतये[14] पशून् ॥ [ TB 3. 7. 4. 18 ]

1 Gbc om. प्र
2 D मंत्रयते प्रे व्रतपते
3 DGa वत्सर॰
4 DGb एव
5 Ga om. वर्णयोः
6–6 Gc om.
7 D ॰मुपनयन, Ga ॰मुपनयन्
8 Db स्त्रीषु॰
9 D जुगुप्सेता–
10 D om. वा
11 Gc ॰रण्यकं
12 Ga ॰मुखम्
13–13 DbGab om.
14 Gb गोपाये

इति ॥ ४ ॥ **प्रणीताः प्रणीयमाना अभिमन्त्रयते**—भूश्च कश्च वाक् चर्क् चै गौश्च वट् च खं च धूर्थं नूर्थं पूर्थं ॥

एकाक्षराः पूर्दशमा विराजो या इदं विश्वं भुवनं व्यानशुः ।
ता नो देवीस्तरसा संविदानाः स्वस्ति यज्ञं नयत प्रजानतीः ॥

ब्रह्मपूता स्थ ॥ को वो युनक्ति स वो युनक्तु विश्वेभ्यः कामेभ्यो देवयज्यायै ॥

याः पुरस्तात् प्रस्रवन्त्युपरिष्टात् सर्वतश्च याः ।
ताभी रश्मिपवित्राभिः श्रद्धां यज्ञमारभे ॥ [ TB 3. 7. 4. 1 ]

इति ॥ ५ ॥  ॥ ५ ॥

**हविर्निरुप्यमाणमभिमन्त्रयेत**—अग्निं होतारमिह तं हुवे [ 1. 5. 10 *i* ] इति ॥ १ ॥ **तदुदित्वा वाचं यच्छत्या हविष्कृतः** ॥ २ ॥ **सर्वं विहारमभिमन्त्रयते**—कस्त्वा युनक्ति स त्वा युनक्तु [ l. c. *k* ] इति ॥ ३ ॥ **वेदिं संमृज्यमानामभिमन्त्रयते**—

चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका भुवनस्य मध्ये ।
मर्मृज्यमाना महते सौभगाय मह्यं धुक्ष्व यजमानाय कामान् ॥ [TB 3.7.6.

4 ] इति ॥ ४ ॥ **स्तम्बयजुर्ह्रियमाणमभिमन्त्रयेत**—

यो मा हृदा मनसा यश्च वाचा यो ब्रह्मणा कर्मणा द्वेष्टि देवाः ।
यः श्रुतेन हृदयेनेष्णता च तस्येन्द्र वज्रेण शिरश्छिनद्मि ॥ [ l. c. 4, 5 ]

इति ॥ ५ ॥ **उत्करमभिगृह्यमाणमभिमन्त्रयते**—

इदं तस्मै हर्म्यं करोमि यो वो देवाश्चरति ब्रह्मचर्यम् ।
मेधावी दिक्षु मनसा तपस्व्यन्तर्दूतश्चरति मानुषीषु ॥ [ l. c. 3, 4 ]

इति ॥ ६ ॥ **परिग्राहं पूर्वं चोत्तरं चाभिमन्त्रयते**—यज्ञस्य त्वा प्रमयाभिमयौ प्रतिमयोन्मया परिगृह्णामि ॥

बृहस्पते परि गृहाण वेदिं स्वगा वो देवाः सदनानि सन्तु ।
तस्यां बर्हिः प्रथतां साध्वन्तरहिंस्रा णः पृथिवी देव्यस्तु ॥

1 Ga °येत
2 G om. ऋद् च
3 DaGb वषट्, Ga वलंरा्
4 Gab धूंश्च, Gc धूं च
5 Ga रूश्च, Gb om., Gc नूं च
6 Ga पुंश्च, Gb पूंस्त्व, Gc पूं च
7 D विश्व-
8 Ga °लभ
9 Gbc °यते
10–10 Gc om.
11 D om. अभिमया
12–12 D om.

इति ॥ ७ ॥ ॥ ६ ॥

त्वचमुद्धन्यमानामभिमन्त्रयते—

यदुद्घ्नन्तो[2] जिहिंसिमं[3] पृथिवीमोषधीरपः ।
अध्वर्यव स्फकृत स्फ्येनान्तरिक्षं मोरु पातु तस्मात् ॥
यदुद्घ्नन्तो[4] जिहिंसिम क्रूरमस्या वेदिं चकृमा मनसा देवयन्तः ।
मा तेन हेड उपगाम भूम्याः शिवो[5] नो विश्वैर्भुवनेभिरस्तु ॥

इति ॥ १ ॥ कृतामनुमन्त्रयते—

भूमिर्भूत्वा महिमानं पुपोष ततो देवी वर्धयते पयांसि ।
यज्ञिया यज्ञं वि च यन्ति शं चौषधीराप इह शक्करीश्च ॥ [TB 3. 7. 6. 4]

इति ॥ २ ॥ प्रोक्षणीरासाद्यमाना अनुमन्त्रयते—

ईडेन्यक्रतूरहमपो देवीरुपब्रुवे[9] ।
दिवा नक्तं च सश्रुषीरपस्वरीः ॥

इति ॥ ३ ॥ बर्हिरुपसाद्यमानमभिमन्त्रयते—

अशिश्रेम बर्हिरन्तः पृथिव्यां संरोहयन्त ओषधीर्विवृक्णाः ।
यासां मूलमुदवधी स्फ्येन शिवा नस्ताः सुहवा भवन्तु ॥

इति ॥ ४ ॥ आज्यं प्रोक्षणीश्चोत्पूयमाना अभिमन्त्रयते—

अद्भिराज्यमाज्येनापः सम्यक् पुनीत सवितुः पवित्रैः ।
ता देवीः शक्करीः शाक्करेणेमं यज्ञमवत संविदानाः ॥

इति ॥ ५ ॥ व्याख्यातमाज्यावेक्षणमाज्यग्रहा इति ॥ ६ ॥ ॥ ७ ॥

अन्तर्वेदि बर्हिरासाद्यमानमभिमन्त्रयते—

सुमनसो यजमानाय सन्त्वोषधीराप इह शक्करीश्च ।
वृष्टिद्यावा पर्जन्य एना विरोहयतु हिरण्यवर्णाः शतवल्शा अदब्धाः ॥

1 Gb °मनु°
2 DGbc यदुदंतो, Ga यदुत्थंतो
3 Gab जिहिंसीः
4 DGc यदुदतो, Ga यदुत्थंते, Gb उदंते
5 Thus all the mss.
Āp. शिवो = शिवा+उ
6 Gb कृतां वेदिम°
7 Gab अभि°
8 Gab °नु°
9 Gac °रुपभुवे
10 DbGc °धा°
11 Ga °लुशा, Gb °न्नुशा, Gc °वल्वा

इति ॥ १ ॥ बर्हि स्तीर्यमाणमभिमन्त्रयते—

ऊर्णाम्रदु प्रथमानं स्योनं देवेभ्यो जुष्टं सदनाय बर्हिः ।
सुवर्गे लोके यजमानं हि धेहि मां नाकस्य पृष्ठे परमे व्योमन् ॥ [TB3.7.6.5]

इति ॥ २ ॥ वेदिं[1] सँस्तीर्यमाणामभिमन्त्रयते—

चतुःशिखण्डा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
सा स्तीर्यमाणा महते सौभगाय सा मे धुक्ष्व यजमानाय कामान् ॥ [l.c.5,6]

शिवा च मे शग्मा चैधि । स्योना च मे सुषदा चैधि । ऊर्जस्वती च मे पयस्वती चैधि ॥ इषमूर्जं मे पिन्वस्व । ब्रह्म तेजो मे पिन्वस्व । क्षत्रमोजो मे पिन्वस्व । विशं पुष्टिं मे पिन्वस्व । आयुरन्नाद्यं मे पिन्वस्व । प्रजां पशून् मे पिन्वस्व [ 1. c. 6 ] स्वर्गं लोकं मे पिन्वस्व इति ॥ ३ ॥ ॥ ८ ॥

परिधीन् परिधीयमानानभिमन्त्रयते—ध्रुवो ऽसि ध्रुवो ऽहं सजातेषु भूयासम् [ 1. 6. 2*a* ] इत्येतैः प्रतिमन्त्रम् ।

अस्मिन् यज्ञ उप भूय इन्नु मे ऽविक्षोभाय परिधीन् दधामि ।
धर्ता धरुणो धरीयानग्निर्द्वेषांसि निरितो नुदातै ॥ [ TB 3. 7. 6. 7 ]

इति च सर्वान् ॥ १ ॥ आहवनीयमभिमन्त्रयते—

युनज्मि त्वा ब्रह्मणा [3]दैव्येन हव्यायास्मै वोढवे जातवेदः ।
इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग् जीवेम बलिहृतो वयं ते ॥
यन्मे अग्ने अस्य यज्ञस्य रिष्याद् यद्वा स्कन्दादाज्यस्योत विष्णो ।
तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि[5] निर्ऋत्या उपस्थे ॥ [ 1. 6. 2*de* ]
तेजिष्ठा ते तपना या च रोचना प्रत्योषन्तीस्तन्वो[4] यास्ते अग्ने ।
ताभिर्वर्मीणयभितो व्ययस्व मा त्वा दभन् यज्ञहनः पिशाचाः ॥

इति[7] ॥ २ ॥ विधृती निधीयमाने[8] अभिमन्त्रयते—

विच्छिनद्मि विधृतीभ्यां सपत्नान् जातान् भ्रातृव्यान् ये च जनिष्यमाणाः ।
विशो यन्त्राभ्यां विधमाम्येनानहं स्वानामुत्तमो ऽसानि देवाः ॥
विशो यन्त्रे नुदमाने अरातिं विश्वं पाप्मानममतिं[10] दुर्मरायुम् ।

1 Gb अन्यस्मिन्
2 Gb ध्रुव
3–3 Gc om.
4 Db प्रत्योषीस्तन्वो, Gc प्रत्यूष्यन्तस्तरो
5 DGb स्ववस्व; Gc is corrupt.
6 G दहन्
7 Gb adds च
8 Ga नीयमाने
9 Gc विधमान्येना॰
10 Gc ॰ममराति

सीदन्ती देवी सुकृतस्य लोके [1]प्रजा अस्मभ्यं[2] द्रविणं च धत्तम्[1] ॥

धृती स्थो विधृती स्वधृती प्राणान् मयि धारयतं प्रजां मयि धारयतं पशून् मयि धारयतम् [TB 3. 7. 6. 7, 8] इति ॥ ३ ॥ **प्रस्तरं साद्यमानमभिमन्त्रयते—**

अयं प्रस्तर उभयस्य धर्ता[4] धर्ता प्रयाजानामुतानूयाजानाम् ।
स दाधार समिधो विश्वरूपास्तस्मिन् स्रुचो[3] अध्यासादयामि ॥ [l. c. 8]

इति ॥ ४ ॥ ॥ ६ ॥

**स्रुचः साद्यमाना अभिमन्त्रयते—**

आरोह पथो जुहु देवयानान् यत्रर्षयः प्रथमजा ये पुराणाः ।
हिरण्यपक्षाजिरा संभृताङ्गा वहासि मा सुकृतां यत्र लोकाः ॥ [l.c. 8, 9]
जुहूरसि घृताची गायत्रीयाग्नी कविभिर्जुषाणा ।
अन्व्यथमाना यज्ञमनुयच्छस्व सुनीती[5] यज्ञं नयास्युप देवानाग्नेयेन शर्मणा दैव्येन ॥

**इति जुहूम् ॥ १ ॥**

अवाहं बाध उपभृता सपत्नान् जातान् भ्रातृव्यान् ये च जनिष्यमाणाः ।
दोहं[6] यज्ञं सुदुघामिव धेनुमहमुत्तरो भूयासमधरे मत्सपत्नाः ॥ [ l. c. 9 ]
सुमृदस्युपभृद् घृताची त्रैष्टुभेन छन्दसा विश्ववेदः ।
अन्व्यथमाना यज्ञमनुयच्छस्व सुनीती[7] यज्ञं नयास्युप देवानैन्द्रेण शर्मणा दैव्येन ॥

**इत्युपभृतम् ॥ २ ॥**

यो मा वाचा मनसा[8] दुर्मरायुर्हृदारातीयादभिदासदग्ने ।
इदमस्य चित्तमधरं ध्रुवाया अहमुत्तरो भूयासमधरे मत्सपत्नाः ॥ [l.c.9,10]
ध्रुवासि धरणी धनस्य पूर्णा जागतेन छन्दसा विश्ववेदः ।
अन्व्यथमाना यज्ञमनुयच्छस्व सुनीती[9] यज्ञं नयास्युप देवान् वैश्वदेवेन शर्मणा दैव्येन ॥

**इति ध्रुवाम् ॥ ३ ॥ ॥ १० ॥**

स्योनो मे सीद सुषदः पृथिव्यां प्रथयि प्रजया पशुभिः सुवर्गे लोके ।
दिवि सीद पृथिव्यामन्तरिक्षे ऽहमुत्तरो भूयासमधरे मत्सपत्नाः ॥ [l. c. 10, 11]

1–1 Gb and TB om.
2 Ga प्रजामस्मभ्यं, other mss. प्रजास्मभ्यं
3–3 Gc om.
4 Ga प्रयाजानु°
5 DbGb °ति, Ga °ते
6 Thus all the mss.
7 DbGa °ति
8 Gc °दा
9 DbGb °ति

अयं स्रुवो अभिजिहर्ति होमान्[1] शताक्षरश्छन्दसानुष्टुभेन ।
सर्वा यज्ञस्य समनक्ति विष्ठा बार्हस्पत्येन शर्मणा दैव्येन ॥

इति स्रुवम् ॥ १ ॥

इयं स्थाली घृतस्य पूर्णाच्छिन्नपयाः शतधार उत्सः ।
मारुतेन शर्मणा दैव्येन ॥ [ TB 3. 7. 6. 11 ]

इत्याज्यस्थालीम् ॥ २ ॥ पुरोडाशावञ्यमानावभिमन्त्रयते—

तृप्तिरसि गायत्रं छन्दस्तर्पय मा तेजसा ब्रह्मवर्चसेन ॥
तृप्तिरसि त्रैष्टुभं छन्दस्तर्पय मौजसा वीर्येण ॥
तृप्तिरसि जागतं छन्दस्तर्पय मा प्रजया पशुभिः ॥

इति ॥ ३ ॥ अन्तर्वेदि हवींष्यासन्नान्यभिमृशति—

यज्ञो ऽसि सर्वतः[3] श्रितः सर्वतो मां भूतं भविष्यच्छ्रयताम् ।
शतं मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीः[4] ॥[ l. c. 11 ]

इत्याग्नेयं पुरोडाशम् ।

प्रजापतिरसि सर्वतः श्रितः सर्वतो मां भूतं भविष्यच्छ्रयताम् ।
शतं मे सन्त्वाशिषः सहस्रं मे सन्तु सूनृता इरावतीः पशुमतीः ॥ [l.c.11,12]

इत्यग्नीषोमीयम् ।

यो नः कनीय[5] इह कामयाता अस्मिन् यज्ञे यजमानाय मह्यम् ।
अप तमिन्द्राग्नी भुवनान्नुदेतामहं प्रजां वीरवतीं विदेय ॥ [ l.c. 14 ]

इत्यैन्द्राग्नम् ॥ ४ ॥ ॥ ११ ॥

इदमिन्द्रियममृतं वीर्यमनेनेन्द्राय पशवो ऽचिकित्सन् ।
[6]तेन देवा अवतोप मामिहेषमूर्जं यशः सह ओजः सनेयं
शृतं मयि[6] श्रयताम् ॥ [ l. c. 12 ]

इति शृतम् ॥ १ ॥

यत् पृथिवीमचरत् तत् प्रविष्टं [7]येनासिचद् बलमिन्द्रे प्रजापतिः ।
इदं तच्छुक्रं मधु वाजिनीवद् येनोपरिष्टादधिनोन्महेन्द्रम्[7] ॥
दधि मां धिनोतु ॥ [ l. c. 12, 13 ]

1 Ga सोमान्
2-2 Gc om.
3 Henceforth Gc om. up to पशुमतीः in the next mantra.
4 Ga om. पशुमतीः and the following up to पशुमतीः in the next mantra.
5 Ga सपत्न
6 Gb सुवीर्यम°
7 Ga प्रात्तदोहम्

**इति दधि ॥ २ ॥ सर्वाणि समस्तान्यभिमृशति**—ममाग्ने वर्चो विहवेष्वस्तु [ 4.7. 14*a* ] **इत्येतेनानुवाकेन ।**

अयं यज्ञः समसदद्धविष्मानृचा साम्ना यजुषा देवताभिः ।

[1]तेन लोकान् सूर्यवतो जयेमेन्द्रस्य[2] सख्यममृतत्वमश्याम्[1] ॥ [TB 3. 7. 6. 13, 14] **इति च ॥ ३ ॥ सामिधेनीरनूच्यमाना अभिमन्त्रयते**—अङ्गिरसो मास्य यज्ञस्य प्रातरनुवाकैरवन्तु **इति ॥ ४ ॥ यांयामाशिषं कामयते तामाशास्ते ॥ ५ ॥ यत्राभिजानाति** समिद्धो अग्न आहुत[3] [ 2. 5. 8. 6 ] **इति तदाहवनीयमभिमन्त्रयते**—

समिद्धो अग्निराहुतः स्वाहाकृतः पिपर्तु नः ।

स्वर्गो[4] देवेभ्य इदं नमः ॥

**इति ॥ ६ ॥** उच्छुष्मो अग्ने[5] यजमानायैधि निशुष्मो अभिदासते [ 1. 6. 2*g* ] **इति[6] ॥ ७ ॥ स्रुवाघारमाघार्यमाणमभिमन्त्रयते**[7]—मनो ऽसि प्राजापत्यम् [ l. c. *i* ] **इति ॥ ८ ॥** वागस्यैन्द्री सपत्नक्षयणी [ l. c. *k* ] **इति स्रुच्यम् ॥ ९ ॥ ॥ १२ ॥**

**प्रवरयोः प्रव्रियमाणयोर्जपति**—देवाः पितरः पितरो देवा यो ऽहमस्मि स सन् यजे यस्यास्मि न तमन्तरेमि । स्वं म इष्टं स्वं दत्तं स्वं पूर्तं[8] स्वं श्रान्तं स्वं हुतम् । तस्य मे ऽग्निरुपद्रष्टा वायुरुपश्रोतादित्यो ऽनुख्याता द्यौः पिता पृथिवी माता प्रजापतिर्बन्धुः । य एवास्मि स सन् यजे [ TB 3. 7. 5. 4, 5 ] यस्यास्मि न तमन्तरेमि[8] **इति ॥ १ ॥ प्रयाजानामिष्टमिष्टमनुमन्त्रयते**—वसन्तमृतूनां प्रीणामि [ 1. 6. 2*l* ] **इत्येतैः प्रतिमन्त्रम् ॥ २ ॥**

एको ममैका तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।

द्वौ मम द्वे तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।

त्रयो मम तिस्रस्तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।

चत्वारो मम चतस्रस्तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।

पञ्च मम न तस्य किंचन यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

**इति च ॥ ३ ॥ आज्यभागाविष्टावनुमन्त्रयते**—अग्निना यज्ञश्चक्षुष्मांस्तस्याहं देवयज्यया चक्षुष्मान् भूयासम् **इत्याग्नेयम् ॥ ४ ॥ ॥ १३ ॥**

1-1 Gc om,

2 DGa मेन्द्रस्य for जयेमेन्द्रस्य

3 D अग्नि आहुतः, Gac अग्न आहुतः

4 D स्वगाव

5 Gb अग्नये

6 Gb adds च

7 Gc स्रुवेणाघा°

8-8 Not in TB.

सोमेन यज्ञश्चक्षुष्मांस्तस्याहं देवयज्यया चक्षुष्मान् भूयासम् **इति सौम्यम्** ॥ १ ॥ **समस्तानुमन्त्रणमेके समामनन्ति**—अग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयासम् [1. 6. 2 *q*] **इति** ॥ २ ॥ **आग्नेयस्य पुरोडाशस्य हविराहुतिमनुमन्त्रयते**—अग्नेरहं देवयज्ययान्नादो भूयासम् [l. c. *r*] **इति** ॥ ३ ॥ दब्धिरस्यदब्धो भूयासममुं दभेयम् [l. c. *s*] **इत्युपांशुयाजस्य । यं द्वेष्टि तस्य नाम गृह्णाति** ॥ ४ ॥ अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम् [l. c. *t*] **इत्यग्नीषोमीयस्य** ॥ ५ ॥ इन्द्राग्नियोरहं देवयज्ययेन्द्रियाव्यन्नादो भूयासम् [l. c. *u*] **इत्यैन्द्राग्नस्य** ॥ ६ ॥ इन्द्रस्याहं देवयज्ययेन्द्रियावी भूयासम् [l. c. *v*] **इति सांनाय्ययोः** ॥ ७ ॥ महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयम् [l. c. *w*] **इति यदि महेन्द्रयाजी भवति** ॥ ८ ॥ अग्नेः स्विष्टकृतोऽहं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयम् [l. c. *x*] **इति स्विष्टकृतः** ॥ ९ ॥ अग्निर्मा दुरिष्टात् पातु [1. 6. 3*a*] **इति च**[1] ॥ १० ॥ इन्द्रस्य वैमृधस्याहं देवयज्ययासपत्नो भूयासम् **इतीन्द्रवैमृधस्य**[3] ॥ ११ ॥ ॥ १५ ॥

**इडामाह्रियमाणामभिमन्त्रयते**—सुरूपवर्षवर्ण एहि [l. c. *c*] **इति प्रतिपद्य** उपहूत उपहवं ते ऽशीय [l. c. *g*] **इत्यन्तेन** ॥ १ ॥ **उपांशूपहवे सप्त देवगवीर्जपति**—भूयस्येहि श्रेयस्येहि वसीयस्येहि चित्त एहि दधिष एहीड एहि सूनृत एहि **इति** ॥ २ ॥ **उच्चैरुपहवे सप्त मनुष्यगवीः**—चिदसि मनासि वस्वी रन्ती रमतिः सूनुः सूनरा [ **इति** । ] देवाँदेवैरभि[4] मा निवर्तध्वम् । स्योना स्योनेन घृतेन मा समुक्षत ।

न म इदमुपदम्भिषगृषिर्ब्रह्मा यद् ददे समुद्रादुदजनिव स्रुचा ।
वागग्रे[5] विप्रस्य तिष्ठति शृङ्गेभिर्दशभिर्दिशन्[6] ॥

**इति च** ॥ ३ ॥ **यर्हि होतेडामुपह्वयेत तर्हि यजमानो होतारमीक्षमाणो वायुं मनसा ध्यायेत्**—वायुरिडाया वत्सः सा मे वायुना वत्सेन श्रद्धां तपः स्वर्गंलोकं[7] दुक्ष्व **इति** ॥ ४ ॥ **उपहूयमानायां जपति**[8]— सा मे सत्याशीः [l. c. *h*] **इति प्रतिपद्य**[9] जुष्टिं[10] ते गमेयम् [l. c. *n*] **इत्यन्तेन** ॥ ५ ॥ **उपहूतामनुमन्त्रयते**—इडाया अहं

1 Gb °सु, Gc °ज्यास्म
2 Gc om. च and the following sūtra,
3 Gb om. इन्द्र
4 Gb देवाँदेवैर°
5 D ववग्रे, Ga वगाग्रे, Gc वगग्रे
6 ! DaGbc °दंशन्, Ga °शृंगेभिर्दशसन्
7 Gab स्वर्गं
8 Thus Gbc. In D —यां जपति is lost in lacuna, Ga इत्युपहूयमानाय जेमानं महिमानं गमेयमिति यदि महेन्द्रयाजी भवति अग्ने स्विष्टकृतोहं देवयज्यया…जपति
9 Gb adds जुष्टो नोसि
10 Ga जुषं, Gc जुष्टं

देवयज्यया पुष्टिमान् पशुमान् भूयासम् इति ॥ ६ ॥ भक्षायाह्रियमाणामभिमन्त्रयते—

इडा धेनुः सहवत्सा न आगादूर्जं दुहाना पयसा प्रपीना ।
सा नो अन्नेन हविषोत गोभिरिडाभ्यस्माँ आगात् ॥

इति ॥ ७ ॥ ॥ १५ ॥

व्याख्याता मार्जनी ॥ १ ॥ बर्हिषदं पुरोडाशमभिमृशति—अग्र पिन्वस्व । ददतो मे मा क्षायि कुर्वतो[3] मे मोप दसत् । दिशां क्लृप्तिरसि । दिशो मे कल्पन्तां कल्पन्तां मे दिशो दैवीश्च मानुषीश्च । अहोरात्रे मे कल्पेताम् । अर्धमासा मे कल्पन्ताम् । मासा मे कल्पन्ताम् । ऋतवो मे कल्पन्ताम् । संवत्सरो मे कल्पताम् । क्लृप्तिरसि कल्पतां मे ॥

आशानां त्वाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् ॥

भजतां भागी भागं माभागो भक्त निरभागं भजामः । अपस्पिन्वौषधीर्जिन्व । द्विपात् पाहि चतुष्पादव । दिवो वृष्टिमेरय ॥

ब्राह्मणानामिदं हविः सोम्यानां सोमपीथिनाम् ।
निर्भक्तो ऽब्राह्मणो नेहाब्राह्मणस्यास्ति ॥ [ TB 3. 7. 5. 7–10 ]

इति ॥ २ ॥ अन्तर्वेद्यन्वाहार्यमासन्नमभिमृशति—

इयं स्थाल्यमृतस्य पूर्णा सहस्रधार उत्सो अक्षीयमाणः ।
स दाधार पृथिवीमन्तरिक्षं दिवं च तेनौदनेनातितराणि मृत्युम् ॥

इति ॥ ३ ॥ प्रजापतेर्भागो ऽसि [ 1. 6. 3 r ] इति चानुवाकशेषेणैवैकेन वा ब्रह्मा-भिमृशति ॥ ४ ॥ ॥ १६ ॥

अनूयाजसमिधमाधीयमानमभिमन्त्रयते—एषा ते अग्ने समित् तया वर्धस्व चा च प्यायस्व । वर्धतां च ते यज्ञपतिरा च प्यायताम् । वर्धिषीमहि च वयमा च प्यासिषीमहि इति ॥ १ ॥ आहितायामाहवनीयम्—

यं ते अग्न आवृश्चाम्यहं वा क्षिपितश्चरन् ।
प्रजां च तस्य मूलं च नीचैर्देवा निवृश्चत ॥

1 Henceforth D is missing up to the end of the next section.

2 This section is missing in D.

3 Gc हृषतो

4–4 Gc om.

5–5 Ga om.

6 Thus emended; Gb om च; Gc इत्नूचा॰

7 Thus emended; Gb च for वा, Gc ॰शेषेण तेनैव

8 Gc अनु॰

9 Gab om.

10 D ॰षा॰

11 D विवृ॰

अग्ने यो नो ऽभिदासति समानो यश्च निष्ट्यः ।
इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किंचन ॥
यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम् ।
सर्वाँस्तानग्ने संदह यांश्चाहं द्वेष्मि ये च माम् ॥ [TB 3.7.6.16, 17]

**इति ॥ २ ॥ इध्मसंनहनं हुतमनुमन्त्रयते—**

वेदिर्बर्हिः शृतं हविरिध्मः परिधयः स्रुचः ।
आज्यं यज्ञ ऋचो यजुर्याज्याश्च वषट्काराः ।
सं मे संनतयो नमन्तामिध्मसंनहने हुते ॥ [1. c. 18]

**इति ॥ ३ ॥ अनूयाजानामिष्टमिष्टमनुमन्त्रयते—**बर्हिषो ऽहं देवयज्यया प्रजावान् भूयासम् [1. 6. 4*a*] **इत्येतैः प्रतिमन्त्रम् ॥ ४ ॥ स्रुचौ व्यूह्यमाने वाजवतीभ्यामभिमन्त्रयते**—वाजस्य मा प्रसवेन [1. c. *m*] **इति द्वाभ्याम् ॥ ५ ॥ परिधीनञ्ज्यमानानभिमन्त्रयते—**वसून् देवान् यज्ञेनापिप्रेम् । रुद्रान् देवान् यज्ञेनापिप्रेम् । आदित्यान् देवान् यज्ञेनापिप्रेम् **इति ॥ ६ ॥ ॥ १७ ॥**

**प्रस्तरमञ्ज्यमानमभिमन्त्रयते—**

समक्तां बर्हिर्हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः ।
समिन्द्रेण विश्वेभिर्देवेभिरक्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥ [TB3.7.5.10]

**इति ॥ १ ॥ यत्राभिजानाति** अग्निरिदं हविरजुषत [2. 6. 9. 6] **इति तां निगदांनिगदां देवतामनुमन्त्रयते**—अग्नेरहमुज्जितिमनूज्जेषम् [1. 6. 4 *d*] **इत्येतैर्मन्त्रैर्यथादेवतम् ॥ २ ॥ यर्हि होता यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयात्**—एमा अग्मन्नाशिषो दोहकामाः [1. c. *o*] **इति ॥ ३ ॥ पुरस्तादपात्तं तृणमनुप्रह्रियमाणमनुमन्त्रयते—**

दिवः खीलो ऽवततः पृथिव्या अध्युत्थितः ।
तेना सहस्रकाण्डेन द्विषन्तं शोचयामसि ।
द्विषन्मे बहु शोचत्वोषधे मो अहं शुचम् ॥ [TB 3.7.6.19]

**इति ॥ ४ ॥ परिधिषु ह्रियमाणेष्वाहवनीयमभिमन्त्रयते**—वि ते मुञ्चामि रशना वि रश्मीन् [1. 6. 4 *g*] **इति ॥ ५ ॥ शंयुवाकमभिमन्त्रयते**—विष्णोः शंयोरहं

1–1 Gc om.
2 Gbc ॰ष्ट॰
3 Gb ॰ध्मं
4 Da व्यूहय॰, DbGb व्यूह॰
5 Gb ॰मनु॰
6 Gab ॰ना॰
7 Gab ॰मा॰
8 DGa ॰स॰

देवयज्यया यज्ञेन प्रतिष्ठां गमेयम् [1.6.4 *r*] **इति ॥६॥ सँस्त्रावभागानिष्टाननुमन्त्रयते**—इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिराशीर्वानथर्वभिः । अङ्गिरसो मास्य यज्ञस्य प्रातरनुवाकैरहौर्षुः । तस्य मेष्टस्य वीतस्य द्रविणेहागमः । वसुर्यज्ञो वसुमान् यज्ञस्तस्य मा यज्ञस्य वसोर्वसुमतो वस्वागच्छत्वदो मे आगम्यात् **इति यत् कामयते तस्य नाम गृह्णाति ॥७॥ ॥१८॥**

**अन्तर्वेदि वेदं निधायाभिमृशति**—वेदो ऽसि वित्तिरसि विदेय [l. c. *v*] **इत्येतैर्मन्त्रैः ॥१॥** विदेय इत्यतो ऽनन्तरं **यद्यद् भ्रातृव्यस्याभिध्यायेत् तस्य नाम गृह्णीयात् ॥२॥ पत्नीसंयाजानामिष्टमिष्टमनुमन्त्रयते**—सोमस्याहं देवयज्यया [l. c. *s*] **इति प्रथमम्** । त्वष्टुरहं देवयज्यया [l. c. *t*] **इति द्वितीयम् ॥३॥** राकाया अहं देवयज्यया प्रजावान् भूयासम् **इति राकाम्** । सिनीवाल्या अहं देवयज्यया पशुमान् भूयासम् **इति सिनीवालीम्** । कुह्वा अहं देवयज्यया पुष्टिमान् पशुमान् भूयासम् **इति कुहूम्** । **एता एव त्रिस्त्रिः पत्न्यनुमन्त्रयते मन्त्रांश्च संनमयति ॥४॥ उत्तमौ पत्नीसंयाजाविष्टावनुमन्त्रयते**—देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासम् [l. c. *u*] **इति ॥५॥ आज्येडामनुमन्त्रयते**—

इडास्मानु वस्तां घृतेन यस्याः पदे पुनते[11] देवयन्तः ।
वैश्वानरी शक्वरी वावृधानोप यज्ञमस्थित वैश्वदेवी ॥

**इति ॥६॥** या सरस्वती विशोभगीना तस्यास्ते भक्तिवानो भूयास्म **इति फलीकरणहोमे हुते मुखं विमृष्टे ॥७॥ हुते समिष्टयजुषि यजमानभागं प्राश्नाति**—सं यज्ञपतिराशिषा [1.3.8 *g*] **इति ॥८॥ यदि यजमानः प्रवसेत्** प्रजापतेर्विभान्नाम लोकस्तस्मिँस्त्वा दधामि सह यजमानेन [1.6.5 *b*] **इति ॥९॥ ध्रुवायां यजमानभागमवधाय समिष्टयजुषा सह जुहुयात् ॥१०॥ ॥१९॥**

**पुरा पूर्णपात्राज्जपति**—यज्ञ शं च म उप चै यज्ञ शिवो मे संतिष्ठस्व स्विष्टो मे संतिष्ठस्वारिष्टो मे संतिष्ठस्व ॥ यज्ञ नमस्ते यज्ञ नमो नमश्च ते यज्ञ । शिवेन मे संतिष्ठस्व स्योनेन

1–1 D om.
2 Gb om.
3 Only the rejected ms. ( D. A. V. College, Lahore, No. 5980 ) has this reading; Ga °रवौषुः, Gb °रहोष्टः, Gc °रभौषुः
4 Gb adds आगच्छत्वदो म
5–5 From TS 1. 7. 4. 6.
6 Ga भ्रातृव्यान°
7 D om.
8 Gab तिस्रः
9 DGa °नमति
10 Ga हु
11 DGa पदेन पुनते, Gb यस्यामपते पुनते, Gc पदे पुनर्दे
12 All the mss. except Ga यशो°
13 Ga om., Gb adds मे
14–14 Gc om.

मे संतिष्ठस्वे सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्द्धिमनु संतिष्ठस्व। उप ते यज्ञ नम उप ते नम उप ते नमः[4] [ TB 3. 7. 6. 19, 20 ] **इति ॥ १ ॥ अन्तर्वेदि प्रणीता आसन्ना अभिमृशति**—को वो ऽयोक्षीत् स वो विमुञ्चतु **इति ॥ २ ॥ अथास्पपरिष्टात् संततामुदधारां स्रावयति**—सदसि सन्मे भूयाः [ 1. 6. 5 *c* ] **इति ॥ ३ ॥ अथैनां प्रतिदिशं व्युत्सिञ्चति**—प्राच्यां दिशि देवा ऋत्विजो मार्जयन्ताम् [ l. c. *d* ] **इत्येतैर्मन्त्रैर्यथारूपम् ॥ ४ ॥ अवशिष्टा अन्तर्वेदि निनयति**—

समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत ।
अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥

**इति ॥ ५ ॥ मुखं विमृष्टे**—

यदप्सु ते सरस्वति गोष्वश्वेषु यन्मधु ।
तेन मे वाजिनीवति मुखमङ्धि सरस्वति ॥ [ TB 2. 5. 8. 6 ]

**इति ॥ ६ ॥ दक्षिणे वेद्यन्ते दक्षिणेन पदा प्राङ् विष्णुक्रमान् क्रामति**—विष्णोः क्रमो ऽसि [ 1. 6. 5 *e* ] **इत्येतैस्त्रिभिर्मन्त्रैः । तिष्ठंश्चतुर्थं जपति ॥ ७ ॥ तत आदित्यमुपतिष्ठते**—अगन्म सुवः सुवरगन्म [ 1. 6. 6 *a* ] **इति प्रतिपद्य** सं ज्योतिषाभूवम् [ l. c. *e* ] **इत्यन्तेन ॥ ८ ॥ ॥ २० ॥**

उद्यन्नद्य मित्रमहः सपत्नान् मे अनीनशः ।
दिवैनान् विद्युता जहि निम्रोचन्नधरान् कृधि ॥
उद्यन्नद्य वि नो भजं पिता पुत्रेभ्यो यथा ।
दीर्घायुत्वस्य हेशिषे तस्य नो देहि सूर्य ॥
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥
शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ॥
उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषन्तं मम रन्धयन् मो अहं द्विषतो रधम् ॥

1 Gc om. स्योनेन मे संतिष्ठस्व
2 Gc सुस्ट°
3 Gb यज्ञस्य ऋद्धिमनु
4–4 Gbc om.
5 DGa सुदक°, Gc °सुदग°
6 Gb यप्सु°
7 DGa °र्यथादेवरूपम्
8 Ga प्राङ्
9 Thus Gb, others °सु°
10 After भज Gc om. the mantras,
11 Gb सुरद°

यो नः शपादशपतो यश्च नः शपतः शपात् ।
उषाश्च तस्मै निमुक् च सर्वं पापं समूहताम् ॥ [ TB 3. 7. 6. 21-23 ]

इति च ॥ १ ॥ प्रदक्षिणमावर्तते—ऐन्द्रीमावृतमन्वावर्ते [ 1. 6. 6 *f* ] पुण्या भवन्तु या लक्ष्मीः पराभवन्तु याः पापीः इति ॥ २ ॥ यद्यभिचरेद् इदमहममुष्यामुष्यायणस्य क्षुधा प्राणान् निवेष्ट्यामि इति दक्षिणस्य पदः पार्ष्ण्या निवेष्टयेत् ॥ ३ ॥ अन्वाहार्यपचनमभिमन्त्रयते—

अग्ने वह्ने स्वदितं नस्तनये पितुं पच ।
शं तोकाय तनुवे स्योनः ॥

इति ॥ ४ ॥ तेजो ऽसि [ 1. 1. 10 *l* ] इत्यभिपर्यावृत्याहवनीयमभिमन्त्रयते—समहं प्रजया सं मया प्रजा [ 1. 6. 6 *g* ] इति ॥ ५ ॥ समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासम् [ l. c. *i* ] इत्युपसमिध्य वसुमान् यज्ञो वसीयान् भूयासम् [ l. c. *k* ] इत्युपस्थाय गार्हपत्यमभिमन्त्रयते—अग्न आयूंषि पवसे [ l. c. *l* ] इति प्रतिपद्य शतं हिमाः [ l. c. *n* ] इत्यन्तेन ॥ ६ ॥ पुत्रस्य नाम गृह्णाति—तामाशिषमा शासे तन्तवे ज्योतिष्मतीम् [ l. c. ] इत्यजातपुत्रः । तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीम् [ l. c. ] इति जातपुत्रः ॥ ७ ॥ यदि बहुपुत्रः स्यात् सर्वेषां नामानि गृह्णीयात्—ज्योतिषे तन्तवे त्वा इति ॥ ८ ॥ ॥ २१ ॥

अन्तर्वेद्यासीनो ऽतिमोक्षान्[3] जपति—ये देवा यज्ञहनः [ 3. 5. 4 *a* ] इत्येतान् ॥ १ ॥ सर्वं विहारमभिमन्त्रयते—कस्त्वा युनक्ति स त्वा वि मुञ्चतु [ 1. 6. 6 *o* ] इति ॥ २ ॥ अत्रैके यजमानभागस्य प्राशनं समामनन्ति ॥ ३ ॥ सांनाय्ययोरपि ब्राह्मणो यजमानः प्राश्नीयात्—

इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये ।
आत्मसनि प्रजासनि पशुंसन्यभयसनि लोकसनि वृष्टिसनि[5] ॥
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ।
रायस्पोषमिषमूर्जमस्मासु दीधरत् ॥ [ TB 2. 6. 3. 5 ]

इति शृतस्य । दधिक्राव्णो[6] अकारिषम् [ 1. 5. 11 *l* ] इति दध्नः ॥ ४ ॥ ततो व्रतं विसृजते ॥ ५ ॥ दक्षिणतस्तिष्ठन्नाहवनीयमभिमन्त्रयते—अग्ने व्रतपते व्रतमचारिषम् [ 1. 6. 6 *p* ] इति ॥ ६ ॥ स एष ब्राह्मणस्यैव स्यान्नेतरयोर्वर्णयोः ॥ ७ ॥ वायो व्रतपते इति वायुमुपतिष्ठते । आदित्य व्रतपते इत्यादित्यम् । व्रतानां व्रतपते इत्याहव-

1 D प्रपद्य
2 DaGc तीं॰
3 Gab ॰मोचं
4–4 Gc om. (retaining प of पशुं)
5 Gb and TB om. वृष्टिसनि
6 Ga ॰वण्णो, Gb ॰विण्णो

नीयम् ॥ ८ ॥ यज्ञस्य पुनरालम्भं जपति—यज्ञो बभूव स आ बभूव [ 1. 6. 6g ] इति ॥ ९ ॥ प्राक्रुत्क्रम्य ब्रूयात्—गोमाँ अग्ने [ l. c. r ] इत्येताम् ॥ १० ॥ यथान्वेतमुपनिष्क्रामन्नाह—ब्राह्मणाँस्तर्पयितवै[1] इति ॥ ११ ॥ तत् खल्विदं याजमानं न प्रवसतो विद्यत इत्याश्मरथ्यः । अथालेखनः—एवंविहितमेवास्य प्रवसतो याजमानं भवति । एतावच्चाना ॥ १२ ॥ यानि सँस्पृश्य कर्माण्यध्वर्युस्तानि कुर्यात् ॥ १३ ॥ याजमानंकाले[3] तां दिशमभिमुखो मन्त्रान् जपेत् । प्राङ्मुखस्त्वेव विष्णुक्रमान् गोमतीमिति ब्रूयात् ॥ १४ ॥ ॥ २२ ॥

इति[4] याजमानश्चतुर्थः[4] प्रश्नः ॥

---

1 Thus only D; others are corrupt.
2 Thus D; Gac यजमानं, Gb याजमानम॰
3 ।
4–4 Thus Gb; D प्रथमः, Gac om.

# ĀPIŚALI-ŚIKṢĀ

edited by

RAGHU VIRA

In the year 1931 I had announced in the Journal of the Royal Asiatic Society, part III, the "Discovery of the Lost Phonetic Sūtras of Pāṇini", which was hailed in every quarter with great enthusiasm. All the evidence then available had given my hypotheses the weight of certainty, a certainty which nothing but a fresh discovery could upset. And just after three years I am glad to announce that such a discovery has been made. It leads us further back than even Pāṇini, our first stop.

It was the mistake of the Adyar Library cataloguer that brought me to it. One of the mss. (XXXX. C.10) was entered in the Catalogue as Śākhālakṣaṇam. The Vedic Śākhās forming a part of my forthcoming work "A History of Vedic Literature" the ms. attracted my attention. On examination, however, I found to my great surprise that it contains the Śikṣā[1], which I had strongly pleaded to have been as old as to be the work of the great Pāṇini himself, and that it has a colophon which attributes its authorship to Āpiśali and not to Pāṇini.

1 Besides Āpiśali the ms. contains three more Śikṣās: (1) Pāṇinīya, (2) Śaunakīya, (3) Svaralakṣaṇa.

The ms. is beautifully written in Grantha script on palmleaves, each measuring 6″ × 1″. In the following pages the ms. is designated A.

Some weeks later Prof. Siddheśvara Varmā of Jammu very kindly put at my disposal his Devanāgarī transcript of the Madras ms. 864. It begins:

श्रीः ॥ आपिशलिशिक्षा ॥

अथ शिक्षां प्रवक्ष्यामि मतामापिशलेर्मुनेः ।
गुरुलघ्वादिविज्ञानं नास्यारम्भप्रयोजकम् ।
उक्तं तत् सर्वमङ्गेषु शिक्षाव्याकरणेषु यत् ॥ [१]
विकल्पभाजां शाखाणामपि दृष्टानुवर्तिनाम् ।
तत्तच्छाखाविशेषेषु व्यवस्थार्थमिदं स्मृतम् ॥ [२]
संहिता तत्पदाध्यायः क्रमाध्याय इति त्रिधा ।
प्रसिद्धो ऽस्य समाम्नायो विषयो वक्ष्यते ततः ॥ [३]
व्यवस्थितेषु कार्येषु तद्वत् त्रिष्विह केषुचित् ।
कार्यान्तराणां तन्मूलाद् व्यवस्था सुगमा भवेत् ॥ [४]
तस्मात् तत्तत्समाम्नाये प्रातिशाख्याविरोधतः ।
कार्यं सर्वं व्यवस्थाप्यं शिक्षाव्याकरणोदितम् ॥ [५]
स्वराः स्पर्शास्तथान्तस्था ऊष्माणश्चाथ दर्शिताः ।
विसर्गानुस्वारळाश्चानुनासिक्याः पञ्च चोदिताः ॥ [६]
ह्रस्वदीर्घप्लुतावर्णोवर्णोवर्णा ऋ ॠ ऌ च ।
एदैदोदौदिति ज्ञेयाः षोडशेहादितः स्वराः ॥ [७]
कखौ गघौ ङचछजा झञौ टठडढा णतौ[1] ।
थदौ धनौ पफबभा मः स्पर्शाः पञ्चविंशतिः ॥ [८]
यरौ लवौ चतस्रो ऽन्तस्थाश्च ᳵकशषसᳶपहाः ।
षड्रूष्माणो विसर्गो ऽनुस्वारो ळो नास्यपञ्चकम् ॥ [९]
अन्यत्राविद्यमानस्तु यो वर्णः श्रूयते ऽधिकः ।
आगम्यमानतुल्यत्वात् स आगम इति स्मृतः ॥ [१०]
प्रकृतिस्थस्य शब्दस्य स्थाने यस्यापरो भवेत् ।
स्वगुणान्तरं नापेतः स विकारीह तत्समः ॥ [११]

1 The ms. °ढडणा तौ

प्रकृतिस्थस्तु यः शब्दः संहितायां न दृश्यते ।
तत्स्थाने च न शब्दो ऽन्यः स लोपी नश्वरोपमः ॥ [ १२ ]
स्वादिसिद्धः परो ह्रस्वादसंयोगपरस्तु यः ।
अनुस्वारो द्विमात्रो ऽसावन्यः सर्वो ऽपि मात्रिकः ॥ [ १३ ]
ह्रस्वात् परो वसनस्थः पदाध्याये ऽनुनासिकः ।
द्विमात्रिको मात्रिकस्त्वन्यः संहितायां तथाखिलः ॥ [ १४ ]
स्वरितग्राह्यनुस्वारो द्विमात्रो मात्रिकात् परः ।
दीर्घादध्यर्धमात्रः स्याद् वैरूप्ये मात्रिकं परम् ॥ [ १५ ]
द्विमात्र उत्तमो ह्रस्वादध्यर्धो व्यञ्जनान्तरः ।
दीर्घादनन्तरस्तद्वन्मात्रिको व्यञ्जनान्तरः ॥ [ १६ ]
द्विमात्रा यवला ह्रस्वादध्यर्धा व्यञ्जनान्तराः ।
दीर्घपूर्वात् परो रेफो मात्रिका इति निर्णयः ॥ [ १७ ]
स्वरितग्राह्यनुस्वारस्तथा पूर्वाङ्ग उत्तमः ।
तयोर्द्वित्वे परं रूपं पूर्वाङ्गश्चेत् तदेव तु ॥ [ १८ ]
तथा पूर्वाङ्गभूताश्च लयवा रेफपूर्वकाः ।
ह्रस्वादनन्तरास्त्वेते यद्यन्तस्था परास्तथा ॥[1] [ १९ ]

After this verse follows the text of the Āpiśali Śikṣā.

In the following pages the ms. is designated B.

With the help of these two mss. I have been able to complete and immensely improve the fragmentary and corrupt text (hereafter designated C[2]), which I had published in JRAS, July, 1931.

1 Apparently these introductory verses are a very late composition, Cf. Prof Siddheśvara Varmā's remarks: The upper limit of its [ sc. Āpiśali Śikṣā ] date, however, cannot be pushed back very far, as in an introductory verse it describes its object to be 'the fixation of data relating to Vedic texts as prescribed by Śikṣā and grammar, without conflicting with the Prātiśākhyas [ verse 5 ].' The work, though in substance the authorship of 'the sage Āpiśali', possibly underwent further changes in course of time. (Critical Studies in the Phonetic Observations of Indian Grammarians, p. 44).

2 It was first published in V.S. 1936 (= A. D. 1879) at Benares by Svāmī Dayānanda Sarasvatī with a Hindī commentary of his own. He had ascribed it to Pāṇini: वर्णोच्चारणशिक्षा पाणिनिमुनिप्रणीता.

Of all the existing Śikṣās* that of Āpiśali is the most suited for the beginner. While it deals exhaustively with the

* While writing this article I had the following Śikṣās with me :

1 अमोघनन्दिनी शिक्षा Benares ed., 1893.
2 अवसाननिर्णयशि॰ Ben.
3 आरण्यशि॰ (with com.) A ms.
4 कात्यायनशि॰ (with com.) Ben.
5 कालनिर्णयशि॰ (with com.) A ms.
6 केशवशि॰ (sūtras with com.) Ben.
7 „ (in verse), Ben.
8 कौहलिशि॰ A ms.
9 क्रमकारिका Ben.
10 क्रमसंधानम् Ben.
11 गौतमशि॰ Ben.
12 चान्द्रवर्णसूत्राणि Edit. by B. Liebich and also by S. K. Belvalkar, the latter not very accurate.
13 त्रैस्वर्यलक्षणम् A ms.
14 दन्त्योष्ठविधिः Lahore
15 नारदशि॰ (with com.) Ben.
16 पदकारिकारत्नमाला A ms.
17 पाणिनीयशि॰ (a Vedāṅga) Edit. by A. Weber; text and com. Ben.; the Agnipurāṇa version; India Office ms.
18 पाराशरशि॰ Ben.
19 पारिशि॰ (with com.) A ms.
20 प्रातिशाख्यप्रदीपः Ben.
21 प्लुतशि॰ A ms.
22 प्लुतानुशासनम् A ms.
23 भारद्वाजशि॰ Edit. by E. Sieg.
24 मनःस्वारशि॰ Ben.
25 माण्डव्यशि॰ Ben.
26 माण्डूकी शि॰ Ben.; Lahore.
27 माध्यन्दिनी शि॰ Ben.
28 याज्ञवल्क्यशि॰ Ben.
29 लक्ष्मीकान्तशि॰ A ms.
30 लघुमाध्यन्दिनशि॰ Ben.
31 लघ्वमोघनन्दिनी शि॰ Ben.
32 लोमशी शि॰ Ben.
33 वर्णरत्नप्रदीपिका Ben.
34 वासिष्ठी शि॰ A ms. The Ben. ed. is not a Śikṣā. It simply enumerates the Ṛk and Yajus mantras in the White YV.
35 वेदपरिभाषाकारिका (with com.) Ben.
36 वेदलक्षणानुक्रमणिका A ms.
37 व्यासशि॰ Ed. by H. Lüders; also with com., a ms.
38 शमानशि॰ (with com.) A ms.
39 शम्भुशि॰ A ms.
40 शैशिरीयशि॰ A ms.
41 शौनकीयशि॰ (with com.) A ms.
42 षोडशश्लोकी शि॰ Ben.
43 सर्वसंमतशि॰ Edit. by O. Franke; also with com., a ms.
44 सिद्धान्तशि॰ (with com.) A ms.
45 स्वरप्रक्रिया Ben.
46 स्वरभक्तिः A ms.
47 स्वरभक्तिलक्षणम् Ben.
48 स्वरलक्षणम् A ms.
49 स्वराङ्कुशशि॰ Ben.
50 स्वराष्टकशि॰ Ben.
51 ह्रस्वदीर्घप्लुतमात्रालक्षणम् A ms.

mode of production of the sound-material and its final culmination into individual articulate sounds it ignores altogether the complicated modifications which these sounds are liable to undergo in connected speech. It is not associated with any particular branch of the Veda; and as a general phonetic introduction to grammar[1] it has never been superceded. So that while Āpiśali was never very popular with Vedic students, who naturally preferred treatises pertaining to their own Saṃhitā, Pada, Krama and other texts, the students of the Pāṇinean and non-Pāṇinean schools of grammar have used it extensively. I hereunder record the most invaluable evidence, largely from commentators :

(a) Patañjali gives Āpiśali I. 11 with the addition इच्छन्ति; an abridged version (with v. l.)[2] of IV. 2–5; IV. 6, 7 with v. l. तेषां for एषां (p. 61[4]); a paraphrase[5] of VI. 9 (p. 22); VI. 12, 13 (p. 16, 28); VII. 5 and the bāhya-prayatna dvandvas in VIII. 8, 11, 15, 18 with v. l. विवारसंवारौ and अल्पप्राणता महाप्राणता (p. 61).

1 Such a Śikṣā should concern itself only with sthāna, karaṇa, anupradāna and prayatna. Cf. Patañjali : तदाचार्यः सुहृद् भूत्वान्वाचष्टे इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तमस्मिन्नवकाशे ऽनुदात्तमिति । यद्ययमेवं सुहृत् किमन्यान्यप्येवंजातीयकानि नोपदिशति । कानि पुनस्तानि । स्थानकरणानुप्रदानानि । व्याकरणं नामेयमुत्तरा विद्या । सो ऽसौ छन्दःशास्त्रेष्वभिविनीत उपलब्ध्यावगन्तुमुत्सहते । (Kielhorn's ed. vol. I p. 208)

2 Being ignorant of the fact that the passage is from a Śikṣā Kielhorn remarked : The vārttika सर्वमुखस्थानमवर्णमेके may have disappeared before the words ०मेक इच्छन्ति. At any rate Patañjali nowhere else uses the phrase एक इच्छन्ति except when he is explaining a vārttika.

3 सन्ति ह्यास्याद् बाह्याः प्रयत्नाः । विवारसंवारौ । श्वासनादौ । घोषवदघोषता । अल्पप्राणता महाप्राणतेति । तत्र वर्गाणां प्रथमद्वितीया विवृतकण्ठाः श्वासानुप्रदाना अघोषाः । एके ऽल्पप्राणा अपरे महाप्राणाः । तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः । एके ऽल्पप्राणा अपरे महाप्राणाः ।

4 References are to F. Kielhorn's second ed., vol. I, Bombay, 1892.

5 ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते ।

(b) Bhartṛhari, the grammarian-philosopher, commenting on his own work the Vākyapadīya I. 113–116[1] concludes his

1 ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति—

अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥
स मनोभावमापद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥
विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥

(Vākyapadīya, ed, by Chārudeva, I. 113–116). Prior to this Bhartṛhari has another verse (I. 109):

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥

Under verses I, 113–116 Bh. cites different authorities without naming them:

बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्ते। तद्यथा। अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीतः शब्दवहाभ्यः शु[Vṛṣabha reads सु]षिभ्यः सूक्ष्मांशं [v. l. सूक्ष्मांश–, सूक्ष्मं] धूमसन्तानवत् संहन्ति। स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कयाचिदन्तःसंनिवेशिनः शब्दस्याविभक्तं विम्बमुपगृह्णाति। इत्येवमादि सर्वमनुगन्तव्यम्। तद्यथा—नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति। ततः शब्दनिष्पत्तिः। इत्यादि शिक्षाकारमतभेदप्रबन्धो ऽनुगन्तव्यः। **आचार्यः** [sc. Pāṇini] खल्वप्याह—

आत्मा बुद्ध्या समेत्यार्थान् [v.l. समेत्या॰]
मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति
स प्रेरयति मारुतम् ॥

इत्येवमादि। **तथापरः** पठति–वायुः कोष्ठस्थानमनुप्रदानमापद्यते। स कण्ठगतः श्वासतां नादतां वा इत्यादि। **अथापर** आह–मनोभिहतः कायाग्निः प्राणमुदीरयति। स नाभेरुद्यन् मूर्धन्यभिहतो ऽन्येन पुनरुद्यता मरुताभिहन्यमानो ध्वनिः संपद्यते क इति वा ख इति वा। इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमागमदर्शनं दृश्यमानं सर्वं प्रयत्नेन समर्थयितव्यम् ॥

Vṛṣabha (whose date is unknown) comments on the above:

अन्तर्वर्तिनेति बाह्यो ऽपि कायवाक्प्रस्पन्दो लोके प्रयत्नशब्दवाच्य इत्यवच्छिनत्ति। तेजसेत्यान्तरेणोष्मणा। अनुगृहीत इति तेजसा तस्य सारतेव क्रियते। अतस्तेनाननुगृहीतो बाह्यो वायुः सत्यप्योष्ठादिसंयोगे न वर्णानभिव्यनक्ति। अतश्चान्तरस्य शब्दघनस्य प्रकाशस्वभावता। सुषिभ्य इति छिद्रेभ्यः। याः शरीरान्तःस्थिता नाड्यः सूक्ष्मशब्दावयवपूर्णाः ताभिश्च सूक्ष्माः शब्दावयवाः प्राणेन प्रेर्यमाणास्ताल्वादिषु संहन्यन्त इति। धूमसंतानवदिति यथा धूमावयवा वायुना प्रेर्य संहतिमुपनीयन्ते तथा स्थानेषु घनीक्रियन्ते शब्दावयवा इति। कयाचिदिति स्वार्थप्रकाशनादन्येनेयं प्रकाशमात्रेत्याह। अविभक्तमित्यन्तसारूप्याच्च तयोरन्तर्बहिःस्थितयोः शब्दरूपयोर्भेदः। यादृशमन्तस्तादृगेव बहिरिति। **तथेत्यापिशलीयशिक्षादर्शनम्**। वायुरनुप्रदानमापद्यत इति संबन्धः। ···यथा

citations from several sources thus : नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति । ततः शब्दनिष्पत्तिरित्यादि शिक्षाकारमतभेदप्रबन्धो ऽनुगन्तव्यः (cf. Āpiśali VIII. 1). About this passage Vṛṣabha, in his sub-commentary, declares: इत्यापिशलीयशिक्षादर्शनम् ।

(c) Kāśikā (I. 1. 9) cites Āpiśali VI. 4, 5, 7, 8, 11–14, with the insertion of यवला after sū. 11; while for VI. 2, 3 it reads: अ अ॒ अ॑ इति त्रयो ऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते । तथैवर्णस्तथोवर्णस्तथा ऋवर्णः ।

(d) Jinendrabuddhi, a very early commentator of Kāśikā, cites from our Śikṣā I. 7, 12, 13, 15, 18 (p.[1] 22, 58); I. 19 (p. 25, 59); I. 22 with v. l. ए ऐ for एदैतौ; I. 23 with v. l. ओ औ for ओदौतौ (p. 58); I. 24 (p. 25); III. 4, 5[2] (p. 59); IV. 2 (p. 57, 95); IV. 3 with v. l. वर्ग्य- (p. 57); IV. 4 (p. 25, 57, 95[3]); IV. 5 (p. 57, 95[4]); IV. 6 (p. 25, 57); IV. 7 (p. 57), IV. 8–10 followed by इति शिक्षा (p. 96); VI. 11, 12 (p. 27, 58[5]); VI. 13 (p. 21, 58); a paraphrase of VII. 3 (p. 54[6]); VIII. 1–5 with v. l. वायुः प्राणो नाम, omitting स्थानानां and further on वायुः, ततः for तस्मात्, सावर्ण्य- for सा वर्ण-, तत्र वर्णध्वनौ for ध्वनौ, तदा सा स्पृष्टता for सा स्पृष्टता, ईषद्

बह्वृचप्रातिशाख्ये शौनकः—
वायुः प्राणः कोष्ठ्यमनुप्रदानं
कण्ठ[स्य खे] विवृते संवृते च ।
आपद्यते श्वासतां नादतां च
वक्त्रीहायामुभयं वान्तरे तदपि ॥
इति ॥
[RV Prātiśākhya XIII. 1 with v.l.]

1 References are to the edition of S. C. Chakravarti.

2 Jin. cites स्पृष्टं करणं स्पर्शानाम् (p. 22), ईषत्स्पृष्टं करणमन्तःस्थानाम् (p. 23) and विवृतं करणमूष्मणां स्वराणां च (p. 57, 58) as well from Patañjali p. 64 (with v. l.).

3 On p. 25 च is inserted after °नुस्वारौ and at the end of the sūtra, while on p. 57 च is added after the first word वर्णानां. P. 25, 95 add नासिक्याश्च after °चतुर्थौ.

4 On p. 57 वर्ग्य- for वर्ग- and on p. 95 वर्गाणां for वर्गयमानां.

5 On p. 58 रेफवर्जिताः is put at the end of sūtra 12.

6 यस्मिन् वर्णा निष्पाद्यन्ते तत् स्थानम् ।

यद्दा for यदेषत्, सेषत्स्पृष्टता for ईषत्स्पृष्टता, sūtra 5 is put before sūtra 4 (p. 56); VIII. 7 with v. l. एव for इदानीं, नाम वर्णधर्म उपजायते for जायते; a paraphrase of VIII. 9, 10[1] followed by उपरिवर्तिनौ तौ श्वासनादावनुप्रदानमिति केचिदाचक्षते। वर्णनिष्पत्तेरनु पश्चात् प्रदीयत इत्यनुप्रदानम्। अन्ये तु ब्रुवते—अनुप्रदानमनुस्वानो घण्टानिर्ह्रादवत्। यथा घण्टानिर्ह्रादोऽनुस्वानमनुभवति तथेति; VIII. 13, 14 with v. l. संगाद् for संसर्गाद् in both places; VIII. 16, 17 with v. l. अल्प- for अल्पे; VIII. 20 with v. l. °विवरस्य for °विलस्य; VIII. 21, 22 with v. l. स्वरस्य for स्वरस्य च, °संनिकर्षात् for °संनिपातात् (p. 57).

(e) Haradatta, a later commentator of the Kāśikā, also cites several aphorisms of Āp. They are nearly always the same as occur in Jinendrabuddhi, and show similar textual variations, e. g.

Āp. I. 22, 23 with v. l. ए ऐ, ओ औ (p. 58[2]); IV. 2, 3 omitting सर्वे; IV. 4 om. च after यमौ, and adding च at the end (p. 57); IV. 5 om. च and सर्वे; IV. 6, 7 (p. 58); IV. 8–10 followed by इति शिक्षा (p. 97); and also विवृतकरणा ऊष्माणः स्वराश्च for III. 6, 7 (p. 57).

(f) Viṭṭhala (not later than 14th cent. A. D.) commenting on his grand-father's Prakriyākaumudī, cites either in original or in paraphrase the greater part of Āp. sec. VIII:

तत्र नाभिदेशात् प्रयत्नप्रेरितः प्राण ऊर्ध्वमाक्रामन् कण्ठप्रभृतीनामन्यतरस्मिन् स्थाने प्रयत्नेन विधार्यमाणः स्थानमभिहन्ति। तस्मात् स्थानाभिघाताज्जातो (v. l. ०घातजो) ध्वनिः साकाशे (v. l. आकाशे and सोवकाशे) वर्णश्रुतिः। स वर्णस्यात्मलाभः॥ (p. 27[3]) Cf. sūtra 1.

तत्र ध्वनावुत्पद्यमाने यदा कण्ठादिस्थानं जिह्वाग्रोपाग्रमध्यमूलानि करणानि प्रयत्नाश्च परस्परं स्पृशन्ति सा स्पृष्टता। ईषद् यद्दा स्पृशन्ति सेषत्स्पृष्टता।

1 संवृते गलबिले ऽव्यक्तः शब्दो नादः। विवृते श्वासः।

2 References are to Benares ed., 1835 (a reprint from the Pandit).

3 References are to K. P. Trivedi's edition of Prakriyākaumudī, Poona, 1925.

सामीप्येन यदा स्पृशन्ति सा (v. l. तदा सा) संवृतता। दूरेण यदा स्पृशन्ति सा विवृतता। एत आभ्यन्तराः॥ (p. 27–28) Cf. sū. 2–6.

तत्र पूर्वोक्त एव वायुर्यदा मूर्ध्नि प्रतिहतो निवृत्तः कोष्ठमभिहन्ति (v. l. कोष्ठे ऽभिहन्यमाने) तत्र यदा गलबिलस्य संवृतत्वं तदा संवारो नाम वर्णधर्मो जायते। यदा विवृतत्वं तदा विवारः। संवृते गलबिले ऽव्यक्तशब्दो नादः। विवृते श्वासः। तौ श्वासनादावनुप्रदानमित्याहुः (v. l. श्वासनादौ केचिदनुप्रदान॰)। अनु पश्चात् प्रदीयत इति॥ (p. 28) Cf. sū. 7, 9, 10, 12.

One hundred and forty-four bricks having been employed for nave and spokes, one hundred and forty-five remain for the felloe. The measurement of the agnikṣetra being finished therewith, the bricks used for measuring are no longer wanted. As result of the described proceeding we have three squares, the largest of which encloses the two smaller ones. The smallest, situated in the centre, is meant for the nave; the two larger ones mark the interior and exterior edges of the felloe. It remains to turn these three squares into circles.

"The nave is to be circumscribed at its borders with a circle (i. e. the square forming the nave is to be turned into a circle. This was of course executed according to the general rule which has been discussed above.)

"After having likewise turned into circles the squares, marking the outer and inner edge of the felloe one divides the area lying between felloe and nave into thirty-two parts, and takes out the second, fourth, sixth, etc., parts," [B.]

That means: the second, etc., parts are excluded from the agnikṣetra and not to be covered with bricks.

"In this manner the added part (*i. e.*, the sixty-four bricks by which the square of 289 bricks exceeded the legitimate area of the saptavidha Agni) is removed again." [B.]

By following all the preceding directions we get indeed a wheel, the area of which (with exclusion of the interstices between the spokes) is equal to that of the saptavidha Agni; of course, we have to make the necessary allowance for the inevitable error introduced by the square having to be turned into a circle. It remains to retrace the steps by which Baudhāyana succeeded in rendering the area of the Sārarathacakra pretty well equal to that of the Caturasra Śyena.

A look at the diagram of the Sārarathacakracit shows at once that one preliminary question must first be settled, the question what the relative size of the wheel's different parts was to be. As far as we can see, there was no fixed rule regarding this matter, and wheels of various shapes might therefore have been adopted. Baudhāyana does not state at the outset what the shape of his wheel will be, but from the result of his rules we may conclude his intention. The entire square—or the entire circle into which the square is turned—comprises 289 bricks, or simpler 289 parts, of which 145 form the felloe, the remaining 144 the spokes, interstices, and the nave. It appears therefore probable that Baudhāyana's intention was to allot to the felloe an area equal to that of spokes, etc., together. The reason why the two parts were not made exactly equal will appear from the following.

The task was, in the first place, to draw two squares—representing the outer and the inner edge of the felloe—the area of one of which was the double of the area of the other. For this purpose Baudhāyana made use of his "saviśeṣa," *i.e.* of the rule teaching that the squre of $16\ ^{33}/_{34}$ is almost equal to double the square of 12; only he substituted here, in order to facilitate the operation, 17 to $16\ ^{33}/_{34}$. Accordingly, he began by drawing a square the area of which amounted to seven and a half square puruṣas, divided it into 289 parts, by dividing its side into 17 parts, and drew in the centre of this square another one comprising 144 such parts (by the method described above). To these two squares representing the outer and inner edges of the felloe a third one, marking the area of the nave, had to be added. For this purpose from the square of 144 parts a small square of 16 parts, amounting to the eighth part of the whole, was cut out. Lastly, of the 128 parts left for the space between nave and felloe, 64 were removed, so that 64 were left for the sixteen spokes.

Now by removing 64 parts, the agnikṣetra was unduly reduced; it had to contain 289 parts, and it only contained 225. This deficiency had of

course to be made up in some way, and the way how to do that was not very difficult to find. Sixty-four of two hundred and eighty-nine parts were lost in the act of cutting out the interstices of the spokes, therefore the area of the initial square had to be such that it would be equal to 7½ square puruṣas after having been diminished by 64/289. Accordingly, the square equal to 7½ puruṣas had not to be divided into 289 parts, but into 225 parts, and 64 parts had to be added moreover, so that the loss of these 64 parts reduced the agnikṣetra just to the right size.

Hence Baudhāyana's rules to make bricks equal to the two hundred and twenty-fifth part of the Agni, to add sixty-four such bricks, etc.

## Diag. 15

Baudh.: The nave (nābhi), the spokes (ara) and the interstices (vedi), the felloe (nemi) form three concentric circular areas, covering $^{16}/_{30}$ p., $^{128}/_{30}$ p. ($^{64}/_{30}$ p. the spokes, $^{64}/_{30}$ p. the interstices) and $^{145}/_{30}$ p. respectively.

The area between the nave and the felloe is divided into 32 equal parts, every alternative part forming a spoke. [This gives us 16 spokes and 16 interstices, the latter excluded from the citi and hence not covered with bricks.]



Diag. 15

The felloe is divided into 64 equal parts and a circle is drawn in the middle [of the felloe]. This makes 128 bricks.

Every spoke is divided into 4 equal parts. [This gives 64 bricks for the spokes.]

The nave is divided into 8 equal parts.

This is the first layer.

Diag. 16

Baudh.: In the second layer a circle is to be drawn in the nave with $^3/_4$ of its previous radius.

Another circle is drawn in the felloe at a distance of a quarter of its width from the inward edge.

The rest is evident from the diagram.



Diag. 16

*Parimaṇḍala-Droṇa-Citis*

Diag. 17-19

Baudh.: The Droṇa-Citi is of two kinds, (1) Caturasra, and (2) Parimaṇḍala.

Diag. 17. For constructing the Parimaṇḍala draw a circle equal in area to $7^1/_2-^1/_{16}$ puruṣas. [The method for drawing the circle has already been given under the Rathacakra-Citi.]

Before drawing the circle a ṣoḍaśī brick 30 × 30 sq. aṅgulas($=^1/_{16}$p.) is placed touching the middle of the eastern side. The circle described passes through it. The portion of the ṣoḍaśī brick inside the circle is taken out and joined on to the portion outside the circle, [the curved side forming the eastern edge. This is the oṣṭha.]



Diag. 17

Diag. 18. The com.: Within the circle a square is drawn [one of its corners touching the middle of the oṣṭha]. It is covered by 144 bṛhatīs. In each segment six bṛhatīs are

placed. [All this in the manner of the Rathacakra-Citi].

Baudh.: [The rest of] the segment is covered by 7 bricks. The middle brick is 30 aṅgulas wide. The number 200 is made up by substituting ardhyās for bṛhatīs.

The com.: At the eastern and western corners of the square two bṛhatīs are replaced by four ardhyās.



Diag. 18

This is the first layer.

Diag. 19. Baudh.: In the second layer the central brick of the [eastern] pradhi is put in the oṣṭha, and its place is taken by two bricks of equal size (30 × 15 sq. aṅgulas each).

The com.: The corners of the square inside the circle point to the intermediate directions (avāntara dik). At the northern and southern corners of this square two bṛhatīs are replaced by four ardhyās.



Diag. 19

The rest is after the manner of the first layer.

Diag. 20–22

In our mss. there is nothing that corresponds to Baudhāyana. On the other hand our diag. 20, 21 are quite unique. The circular oṣṭha is $^1/_9$ of the ātman, or $^1/_{10}$ of the entire citi. For the ātman they follow the plan of Pradhiyukta-Rathacakra-Citi (see diag. 12).

Diag. 22 is unfinished.

*Caturasra-Droṇa-Citis*

Diag. 23-31

Diag. 23. Baudh.: The ātman is 320 × 320 sq. aṅgulas. The tsaru on the western side is 70 (east-west) × 80(north-south) sq. aṅ. Thus the ātman covers 7 $^1/_9$ p., the tsaru $^7/_{18}$ p. The bricks used are:

(1) ṣaṣṭhīs (or ṣaḍbhāgīyās) 20 × 20 sq. aṅ.

(2) ekato-adhyardhās 20 × 30 sq. aṅ.

(3) ardhyās 20 × 10 sq. aṅ.

(4) caturthīs (or caturbhāgīyās) 30 × 30 sq. aṅ.

Of the ṣaṣṭhīs 12 are placed on the western side of the ātman, six each from the northern and southern śroṇis up to the handle. The rest of the Agni is covered with adhyardhās pointing eastwards. The number 200 is made up by ardheṣṭakās (24 of which, according to the commentary, replace 8 adhyardhās).

This is the first layer.

Diag. 24. The commentary has another arrangement too:

Tsaru-agra, 4 ardhyās pointing northwards.

Then 4 ṣaṣṭhīs.

The four rows of the tsaru are continued in the ātman, each row containing 12 adhyardhās.

From the śroṇis up to the tsaru there are two rows, one on the north and one on the south, each having 12 east-



Diag. 20



Diag. 21



Diag. 22



Diag. 23

ward ardhyās.

The remaining two pārśvas of the ātman are covered by 12 eastward rows of adhyardhās.



Diag. 24

Diag. 25, 26. For the second layer Baudh. prescribes:

Northern and southern aṃsa, each one northwards adhyardhā. The rest of the eastern face, 13 ṣaṣṭhīs.

Northern and southern faces, each 10 caturthīs. The tsaru, 9 bricks (2 caturthīs on the corners of the eastern side, underneath each 2 northwards adhyardhās; between the caturthīs a prāgagrā adhyardhā with 2 ṣaṣṭhīs below it.) The rest is covered with adhyardhās. The



Diag. 25

number 200 is made up by ardheṣṭakās (39 of which, according to the com., replace 13 adhyardhās of either the central row as in diag. 25, or of the row adjacent to the eastern face as in diag. 26).



Diag. 26

Diag. 27. The com. has another alternative for the interior of the ātman: Of the 13 eastward rows, the first 9 adhyardhās in each row remain as in diag. 26, then follows in each row a northwards ardhyā, then a ṣaṣṭhī, then 2 northwards ardhyās.



Diag. 27

Diag. 28–31. Again our diagrams are unique.

They have not much in common with Baudh. The tsaru is one-ninth of the ātman.



Diag. 28



Diag. 29



Diag. 30



Diag. 31

*Samūhya-Citis*
Diag. 32, 33

Baudh.: [In their outlines] Samūhya and Paricāyya are the same as the [spokeless] Rathacakra.

In the case of the Samūhya pits are dug in all the four directions round the agnikṣetra and in place of the bricks loose earth is put.

Diag. 32, 33 are our examples of the Samūhya-Citi.



Diag. 32



Diag. 33

*Paricāyya-Citis*

These are not represented in our mss.

Baudh. परिचाय्य इष्टकानां देशभेदः । तं सर्वाभिः प्रदक्षिणं परिचिनुयात् ॥

The Com.: Six equidistant concentric circles are drawn. The smallest forms the nābhi, and is covered by 8 bricks; the second and third by 16 each; the fourth by 32, the fifth and sixth by 64 each.

In the second layer the radius of the nābhi is increased by one half, while the width of the outermost circular area is reduced to one half. The intermediate areas retain their previous width. Thus an overlapping of the joints is avoided.

अग्नीनाधास्यामः[1] ॥ १ ॥ योऽश्वत्थः[2] शमीगर्भो भूमिं मूलेनास्पृष्टः[3]स्तस्या-
रणी आहरेत् ॥ २ ॥ अनास्पृष्ट इत्येकेषाम् ॥ ३ ॥ यो अश्वत्थः शमीगर्भः [TB 1.
2. 1. 8] इत्येतया ॥ ४ ॥ उत्तरया वा ॥ ५ ॥ ब्राह्मणव्याख्याताः संभाराः सप्त
पार्थिवाः सप्त वानस्पत्याः । तानाहरति[4]—वैश्वानरस्य रूपं पृथिव्यां परिस्रसा [l. c. 1]
इत्येतैर्मन्त्रैर्यथारूपम् ॥ ६ ॥ यं त्वा समभरं[5] जातवेदः [l. c. 9] इत्येतया संभृतं
संभारं यजमानोऽभिमृशति ॥ ७ ॥

कृत्तिकासु ब्राह्मण आदधीत यः कामयेत मुख्यो ब्रह्मवर्चसी स्यामिति
॥ ८ ॥ रोहिण्यामादधीत यः कामयेत सर्वान् [6]रोहान् रोहेयमिति[6] ॥ ९ ॥ मृग-
शीर्ष आदधीत [7]यः कामयेत ब्रह्मवर्चसी[7] स्यामिति ॥ १० ॥ यः पुरा भद्रः सन्
पापीयान् स्यात् स[8] पुनर्वस्वोः[9] ॥ ११ ॥ पूर्वयोः फल्गुन्यो[10]र्यः कामयेत दानकामा
मे प्रजाः स्युरिति[10] ॥ १२ ॥ यः कामयेत भगी स्यामिति स उत्तरयोरादधीत
॥[11] १३ ॥ विपरीतमेके समामनन्ति ॥[11] १४ ॥ हस्त आदधीत यः कामयेत प्र मे
दीयेतेति[12] ॥[11] १५ ॥ यो भ्रातृव्यवान् स्यात् स चित्रायामादधीत[13] ॥[11] १६ ॥
चित्रायां राजन्य आदधीतेत्येकेषाम् ॥[11] १७ ॥ विशाखयोरादधीत[14] प्रजाकामो

1 D begins with ॐ

2 DGa, Rudradatta's citation on Āp. 5. 1. 2 and Mahādeva's citation on Hir. 3. 2: p. 286 l. 3, all have अश्व° (under the influence of the mantra that follows).

3 Rudradatta (op. cit.) मूलेन स्पृष्टः, Mahādeva (op. cit.) मूलेन संगतः

4 Gc °न्ति

5 DGc °भरन्

6-6 Gb द्रोहान् द्रोह°

7-7 D ब्रह्मवर्चसी (following Āp.), G यः कामयेत श्रीमान् (following Hir.)

8 Gc om.

9 Gab add आदधीत, Gc अग्निमादधीत

10-10 G यः कामयेत...स्युरिति स पूर्वयोः फल्गुन्योरादधीत (following Hir.). Our text follows Āp.

11 Ga om. sūtras 13-17 and the first two words of sū. 18.

12 D दायते, Gb दीयतेति

13 Gb चित्रायामग्निमा°

14 Gb om. आदधीत

ऽनूराधेष्वृद्धिकामः प्रोष्ठपदेषु प्रतिष्ठाकाम इति विज्ञायते ॥ १८ ॥ सूर्यनक्षत्र एवं स्यादित्येकेषाम् ॥ १९ ॥ ॥ १ ॥

वसन्ते ब्राह्मण आदधीत । ग्रीष्मे हेमन्ते वा ॥ १ ॥ राजन्यः शरदि ॥ २ ॥ वर्षासु रथकारः ॥ ३ ॥ शिशिरः सार्ववर्णिकः ॥ ४ ॥ अथ यदि सोमेन यक्ष्यमाणः स्यान्नर्तुं न सूर्क्षेत्रं नक्षत्रम् । यस्मिन्नेव कस्मिंश्चिदृतावादधीत ॥ ५ ॥ अमावास्यायां वैवं पौर्णमास्यामादधीत ॥ ६ ॥ यां पूर्वाभ्यां फल्गुनीभ्यां पौर्णमासी स्यात्तस्यामादधीत ॥ ७ ॥ विद्यते चतुर्थस्य वर्णस्याग्न्याधेयमित्येकं न विद्यत इत्यपरम् ॥ ८ ॥ जीवपितुरग्न्याधेयं विद्यत इत्येकं न विद्यत इत्यपरम् ॥ ९ ॥ उदवसायाग्नीनादधीत शालिनो न यायावर आर्द्रयित ॥ १० ॥ प्राचीनप्रवणं देवयजनमध्यवस्यति—अपेत वीत [4.2.4a] इति ॥ ११ ॥ तस्मिन्नुदीची शालां मीत्वाग्रेण मध्यमं वंशं गार्हपत्यायतनं करोति ॥ १२ ॥ अग्रेण गार्हपत्यायतनमाहवनीयार्थे ॥ १३ ॥ अष्टासु प्रक्रमेषु ब्राह्मणो ऽग्निमादधीत । एकादशसु राजन्यः । द्वादशसु वैश्यः ॥ १४ ॥ चतुर्विंशत्यामौधेय इति विज्ञायते ॥ १५ ॥ अपरिमित इत्येकेषाम् ॥ १६ ॥ चक्षुर्निमित इत्येकेषाम् ॥ १७ ॥ दक्षिणतः पुरस्ताद् वितृतीयदेशे नेदीयसि गार्हपत्यायतनाद् दक्षिणाग्नेरायतनं करोति ॥ १८ ॥ अग्रेणाहवनीयायतनं सभ्यं मिन्वति ॥ १९ ॥ अग्रेण सभ्यमावसथम् ॥ २० ॥ ततो यजमानः केशश्मश्रुं वापयते ॥ २१ ॥ क्षौमे वसानौ जायापती अग्निमादधीयाताम् ॥ २२ ॥ ते दक्षिणाकाले ऽध्वर्यवे दत्तः ॥ २३ ॥ पुरस्ताद् ब्रह्मौदनिकाद

1 D °पदे for °पदेषु

2 Gc एवं

3 Gc पृच्छेत. Cf. Rudradatta on Āp. 5, 3, 20: भारद्वाजश्चाह—अथातः श्रद्धानस्यादधानस्य नर्तुं पृच्छेत. नक्षत्रमिति; Mahādeva on Hir. 3, 2: p. 296 l. 13: अत्र भारद्वाजः—अथातः श्रद्धानस्यर्तुं पृच्छेत नक्षत्रमिति ।

4 Gbc कस्मिंश्च for कस्मिंश्चिद्, Ga तिथाव् for ऋताव्

5 Gb वै

6 DGa चः, Gh वा

7 Gab –भ्यां न. Rudradatta (Āp. 5, 3, 16) cites the sūtra as above (var. पूर्णमासी ).

8–8 Gb (hapl.) om.

9 D om. जीव; Gc inserts न before जीव°

10 Thus all mss.

11 ¹ Thus Gb; D दितेयः, Ga आदद्रीयेत, Gc आद्रीयेत

12 Ga °हवनीयम्

13 D °मा° for °मा°

14 D om.

15 Gb (hapl.) om. the sūtra.

16 DGa अग्नेरायतनं

17 ¹ D सभायां, Ga सभ्य, Gb सभ्या, Gc सभां

18 DGa मिन्वन्ति, Gb जिन्वन्ति, Gc मित्वा

19 ¹ D सभायामा°, Gb सभ्यामा°, Gc सभामा°

20 Ga °श्रू

21 D अग्निना°

22 Ga and Rudradatta's citation on Āp. 5. 4. 10 आ°

परिदधीयातामित्येकं पुरस्तात् संभारनिवपनादित्यपरम् ॥ २४ ॥ यस्मिन् नक्षत्रे ऽग्निमाधास्यमानः स्यात् तस्य पुरस्तात् संवत्सरे द्वादशाहे चतुरहे त्र्यहे द्व्यहे वैकाहे वा ॥ २५ ॥ ॥ २ ॥

अधिवृक्षसूर्यं औपासनादग्निमाहृत्यापरेण गार्हपत्यायतनं ब्रह्मौदनिकेमादधाति ॥ १ ॥ निशायां चर्मणि पाजके वा ब्रह्मौदनं चतुःशरावं तूष्णीं निर्वपति ॥ २ ॥ अपि वा देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ब्रह्मणे प्राणाय जुष्टं निर्वपामि इति प्रथमम् ॥ ३ ॥ ब्रह्मणे ऽपानाय इति द्वितीयम् ॥ ४ ॥ ब्रह्मणे व्यानाय इति तृतीयम् ॥ ५ ॥ ब्रह्मणे इति चतुर्थं निरुप्य क्षीरे श्रपयति ॥ ६ ॥ चतुर्षु वोदपात्रेषु ॥ ७ ॥ न निर्णेनेक्ति नावसिञ्चतीत्येकेषाम् ॥ ८ ॥ जीवतण्डुलमिव श्रपयित्वोद्धृत्य जुहोति—प्र वेधसे कवये [TB 1. 2. 1. 9] इति ॥ ९ ॥ अथैनं चतुर्धा व्युद्धृत्य सर्पिषोपसिच्यानभ्युच्छिन्दन्निव चतुर्भ्य आर्षेयेभ्य ऋत्विग्भ्य उपहरति ॥ १० ॥ तेभ्यः प्राशितवद्भ्यः समानं वरं ददाति ॥ ११ ॥ ब्रह्मौदनशेषं आज्यमानीय चित्रियाश्वत्थस्य समिधस्तिस्र आर्द्राः सपलाशाः स्तिभिकवतीः प्रादेशमात्रीर्ब्रह्मौदने विवृत्यादधाति ॥ १२ ॥ समिधाग्निं दुवस्यत [4. 2. 3d] इति गायत्रीभिर्ब्राह्मणस्य त्रिष्टुब्भी राजन्यस्य जगतीभिर्वैश्यस्य ॥ १३ ॥ स एतद् व्रतं चरेत् ॥ १४ ॥ आऽग्न्याधेयान्न मांसमश्नीयान्न स्त्रियमुपेयात् ॥ १५ ॥ नास्याग्निं गृहाद्धरेयुर्नान्यत आहरेयुः ॥ १६ ॥ नैषो ऽग्निरनुगच्छेत् ॥ १७ ॥ न प्रेयायात् ॥ १८ ॥ यद्यनु वा गच्छेत् प्रयायादेवमेव ब्रह्मौदनं पक्त्वैवं समिध आदाय भैरवशेषं समाप्याग्नीनादधीत ॥ १९ ॥ यद्येनं संवत्सरे नोपनमेदेवमेव कुर्यात् ॥ २० ॥ यस्तं श्वो ऽग्निमाधास्यन् स्यात् स एतां रात्रिं व्रतं चरति ॥ २१ ॥ न मांसमश्नाति न स्त्रियमुपैति नोपर्यास्ते । जुगुप्सेतानृतात् ॥ २२ ॥ अध्वर्युरेव व्रतं चरेदित्येकं सर्वे इत्यपरम् ॥ २३ ॥ ॥ ३ ॥

गार्हपत्यायतने कल्माषमजं बध्नाति—प्रजा अग्ने संवासय [TB 1. 2.

1 Gab ब्रा°
2 DGc °नीक°
3 Gb चतुरः
4 Gb om.
5–5 Gc om.
6 Gb निरूप्यं, Gc निरूप्य
7 D om.
8 Gc om. शेष and आज्य. For आज्यं Gb has आज्यशेषं (following Āp.)
9 Ga चित्र्यस्या°, Gb चित्रीयस्या°, Gc चित्र्या°
10 G is corrupt: Ga स्तिसृभिः कवतीः, Gb त्रिभिकवतीः, Gc स्त्रिभिः कवतिः
11 D त्रिष्टुब्भी, Ga त्रिष्टुर्भी, Gb तृष्टुद्भी, Gc त्रिष्टुब्भी
12–12 DbGb (hapl.) om.
13 Gc °षा° (foll. Āp.)
14 Gbc ह°
15 Rudradatta citing the sūtra on Āp. 5. 7. 16 reads सर्वर्त्विज

1. 13] इत्येतया ॥ १ ॥ वीणातूणवैरेतां रात्रिं यजमानं जागरयन्ति पुण्यैश्च गीथैः[1] ॥ २ ॥ शल्कैस्तां रात्रिमग्निमिन्धीतं—शल्कैरग्निमिन्धानः [ l. c. 15 ] इत्येतया ॥ ३ ॥ अस्मिन्नुपव्युपमरणी निष्टपेत्—जातवेदो[4] भुवनस्य रेतः[5] [l. c.] इति द्वाभ्याम् ॥ ४ ॥ अनुगमयत्येतमग्निम्[6] ॥ ५ ॥ यजमानायारणी प्रयच्छति—अमी रक्षांसि सेधति [l. c. 2. 4. 1. 6] इति ॥ ६ ॥ यजमानः प्रतीक्षते—मही विश्पत्नी सदने ऋतस्य [l. c. 1. 2. 1. 13] इति ॥ ७ ॥ आरोहतं दशतम् [l. c. 14] इत्येतया प्रतिगृह्योत्तराभ्यामभिमन्त्रयते ॥ ८ ॥ ततो वाचं यच्छति ॥ ९ ॥ अनृतात् सत्यमुपैमि [l. c. 15] इति[8] वाग्यत आस्त आऽग्नेर्मन्थनात् ॥ १० ॥ तत आत्मन्यग्निं गृह्णाते[9] अध्वर्युर्यजमानश्च—मयि गृह्णाम्यग्रे अग्निम् [5. 7. 9a] इति द्वाभ्याम् ॥ ११ ॥ अग्न्यायतनानि[10] उद्धन्यमानमस्या अमेध्यम् [TB 1. 2. 1. 1] इत्युद्धत्यावोक्षति—शं नो देवीरभिष्टये [l. c.] इत्येतया ॥ १२ ॥ शुष्केषूपवातेषु संभारान् निवपति ॥ १३ ॥ द्वैधं विभज्यार्धान् पूर्वेष्वर्धानपरयोः ॥ १४ ॥ अग्नेर्भस्मास्यग्नेः पुरीषमसि [4. 2. 4b] इति गार्हपत्यायतने सिकता निवपति ॥ १५ ॥ एवमन्वाहार्यपचनायतन एवमाहवनीयायतन एवं सभ्यावसथ्ययोः ॥ १६ ॥ एवमनुपूर्वाण्येवैष्वत ऊर्ध्वं कर्माणि क्रियन्ते ॥ १७ ॥ ॥ ५ ॥

एकैकशः पार्थिवान् निवपति ॥ १ ॥ संज्ञानमसि कामधरणम् [l. c. c] इत्यूषान् ॥ २ ॥ निवपन् यददश्चन्द्रमसि कृष्णं तदिहास्तु इति मनसा ध्यायति ॥ ३ ॥ उदेनमुत्तरां नय इत्याखूत्करम्[11] ॥ ४ ॥ यत् पृथिव्या अनामृतम् इति गार्हपत्यायतने वल्मीकवपां निवपति ॥ ५ ॥ यदन्तरिक्षस्यानामृतम् इत्यन्वाहार्यपचनायतने ॥ ६ ॥ यद् दिवो ऽनामृतम् इतीतरेषु ॥ ७ ॥ उत् समुद्रात् इति सूदम् ॥ ८ ॥ इयत्यग्र आसीः[12] इति वराहविहतम् ॥ ९ ॥ अदो देवीः इति शर्कराः ॥ १० ॥ शर्करा निवपन् यं द्विष्यात् तं ध्यायेत् ॥ ११ ॥ उत्तरेण संभारान् सौवर्णान् हिरण्यशकलानुपास्यति—यास्ते शिवास्तनुवो जातवेदः इत्येकैकमाधायाधाय[14] रजतं[15] द्वेष्यायातिप्रयच्छति ॥ १२ ॥ यदि[16] द्वेष्यं नाधिगच्छेद्दैतिप्रविध्येत् ॥ १३ ॥ एवं संसृज्य वानस्पत्यान्

1 Ga गीतैः
2–3 DGa (hapl.) om.
3 G त°
4 D °दा
5 DGb रेत ते, Ge अयं ते योनिर्ऋत्वियः for रेतः
6 Cited by Rudradatta on Āp. 5. 8. 5 as *kalpāntara*.
7 G ते व°
8 Gab उपैति for उपैमि इति
9 D गृह्णते
10 Gac add उद्धन्ति
11 Gb °खुकरीषं ( following Āp ), Gc °खूत्करीं
12 Gab आसीद्, Gc आसीदर्
13 D °रान्
14 D आधाय only once.
15–15 D (hapl.) om.
16 DGb °द्दि°

निवपति पुष्करपर्णमश्वत्थमुदुम्बरं पेलाशं शमीं विकङ्कतमशनिहतस्य वृक्षस्य काष्ठम्—इतः प्रथमं जज्ञे अग्निः [2. 2. 4. 8] इत्येतया ॥ १४ ॥ सर्वान् संभारान् संप्रयौति—सं वा वः प्रियास्तनुवः [4. 2. 4*d*] ॥ सं वः सृजामि[2] हृदयानि [TB 1. 2. 1. 17] इति द्वाभ्याम् ॥ १५ ॥ ॥ ५ ॥

ब्रह्मौदनिकस्य भस्मापोदूह्य दशहोत्रारणी समवधायोपतिष्ठत्यश्वे ऽग्निं मन्थति—सहाग्ने ऽग्निना जायस्व इति ॥ १ ॥ मथ्यमाने चतुर्होतॄन् यजमानं वाचयति ॥ २ ॥ जाते वरं ददाति ॥ ३ ॥ जातमभिप्राणिति—प्रजापतेस्त्वा प्राणेनाभिप्राणिमि [l. c. 19] इति ॥ ४ ॥ अथैनं हस्ताभ्यां परिगृह्णाति—अजीजनन्नमृतं मर्त्यासः [l. c.] इति ॥ ५ ॥ ततः प्राञ्चमुद्धृत्यानुदित आदित्ये रथंतरे गीयमान आसीनः संभारेषु गार्हपत्यमादधाति ॥ ६ ॥ भृगूणां त्वा व्रतपते व्रतेनादधामि [cf. TB 1. 1. 4. 8] इति भार्गवस्यादध्यात् । अङ्गिरसां त्वा व्रतपते व्रतेनादधामि [cf. l. c.] इति यो ब्राह्मण आङ्गिरसः स्यात् । आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि [l. c.] इत्यन्यासां ब्राह्मणीनां प्रजानाम् । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामि [l. c.] इति राज्ञः । इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनादधामि [l. c.] इति राजन्यस्य । मनोस्त्वा ग्रामण्यो व्रतपते व्रतेनादधामि [l. c.] इति वैश्यस्य । ऋभूणां[3] त्वा देवानां व्रतपते व्रतेनादधामि [l. c.] इति रथकारस्य ॥ ७ ॥ संभारेष्वेव सर्वानग्नीनादधाति ॥ ८ ॥ ॥ ६ ॥

यथर्ष्याधानेनाधाय व्याहृतीभ्यामादधाति—भूर्भुवः[4] इति ॥ १ ॥ ततः सर्पराज्ञीभ्याम्—भूमिर्भूम्ना [1. 5. 3*a*] इत्येतया च द्वितीयया च ॥ २ ॥ एताभ्यामेवं विहितं[5] यजमान उपतिष्ठते ॥ ३ ॥ ततो घर्मशिरसा— घर्मः शिरः [TB 1. 1. 7. 1] इति ॥[6] ४ ॥ एतेनैवाहितं[7] यजमान उपतिष्ठते ॥[6] ५ ॥ तत एताभिरन्तत आदधाति ॥ ६ ॥ ऋतं स्तृणामि पुरीषम् ॥ सुगार्हपत्यः [l. c. 1. 2. 1. 20] इति चैताभ्याम् ॥ ७ ॥ अहं त्वदस्मि [l. c.] इत्याहितं यजमान उपतिष्ठते ॥ ८ ॥ ततो ऽश्वस्य दक्षिणे कर्णे ऽग्नितनूर्यजमानं वाचयति—

या वाजिन्नग्नेः पवमाना पशुषु प्रिया तनूस्तामावह ॥
या वाजिन्नग्नेः पावकाप्सु प्रिया तनूस्तामावह ॥
या वाजिन्नग्नेः सूर्ये शुचिः प्रिया तनूस्तामावह ॥

1 Gb पा°
2 For सं वः सृजामि DGs सं प्रिया (the second quarter of the preceding mantra), Gb संसृजा
3 G भृगूणां
4 Gb adds सुवः
5 G एवाहितं for एवं विहितं
6 D om. sūtras 4, 5
7 Gb एतेनाभि...तं

इति ॥ ९ ॥ गार्हपत्य इध्ममादीप्याहवनीयमुद्यच्छते—ओजसे बलाय त्वोद्यच्छे [TB 1. 2. 1. 21] इति ॥ १० ॥ उद्ध्रियमाणे वामदेव्यं गायति ॥ ११ ॥ उपरीवाग्निमुद्गृह्णीयादुद्धरन् ॥ १२ ॥ नास्यदग्रमतिहरेत् ॥ १३ ॥ उद्यतंमिध्ममुपयमनं[3] धारयति[4] ॥ १४ ॥ अथान्वाहार्यपचनम् ॥ १५ ॥ यतः कुतश्चाहृत्योर्ध्वंबुराद्धात्यरणीभ्यां वा मथित्वा ॥ १६ ॥ यथर्ग्याधानेनाधाय व्याहृत्यादधाति—भुवः इति ॥ १७ ॥ ततः सर्पराज्ञीभ्याम्—भूमिर्भूम्ना [1. 5. 3a] इत्येतया च तृतीयया च ॥ १८ ॥ एताभ्यामेवं विहितं[5] यजमान उपतिष्ठते ॥ १९ ॥ ततो घर्मशिरसा—वातः प्राणः [TB 1. 1. 7. 1] इति ॥ २० ॥ एतेनैवाहितं[6] यजमान उपतिष्ठते ॥ २१ ॥ ॥ ७ ॥

ततो ऽश्वप्रथमाः प्राञ्चो ऽभिप्रव्रजन्ति—प्राचीमनु प्रदिशं प्रेहि विद्वान् [l. c. 1. 2. 1. 22] इत्येतया । दिवः पृथिव्याः पर्यन्तरिक्षात् [l. c.] इत्येताभिश्चतसृभिः ॥ १ ॥ जानुदघ्ने ऽग्रे हरति । अथ नाभिदघ्ने ऽथास्यदघ्ने ॥ २ ॥ नाग्निं चादित्यं च व्यवेयात् ॥ ३ ॥ पूर्वमग्निं हरति पश्चादन्वेति ॥ ४ ॥ दक्षिणतो ब्रह्मा रथं वर्तयति रथचक्रं वा—बृहस्पते परि दीया रथेन [4. 6. 4d] इति ॥ ५ ॥ एतां वा प्रतिरथस्यर्चं ब्रह्मा जपतीत्येकेषाम् ॥ ६ ॥ तया रथं वर्तयति यावच्चक्रं त्रिः परिवर्तते ॥ ७ ॥ यः सपत्नवान् भ्रातृव्यवान् स्यात् तस्य पुनश्चक्रं त्रिः परिवर्तयेत् ॥ ८ ॥ समयों वरं ददाति ॥ ९ ॥ समयाश्वे हिरण्यं न्यस्यातिक्रामति—नाको ऽसि ब्रध्नः संक्रमणः प्रतिष्ठा यजमानस्य इति ॥ १० ॥ उत्तरेण संभारान् दक्षिणेन पदा प्राञ्चमश्वमाक्रमयति—अभ्यस्थात् [4. 2. 8a] इति ॥ ११ ॥ एतस्मिन्नेव पदे प्रदक्षिणमावर्त्योत्तरया प्रत्यञ्चमाक्रमयति ॥ १२ ॥ पार्श्वत आक्रमयेद् यथाहितस्याग्नेरङ्गाराः पदमभ्यवैवर्तेरन् ॥ १३ ॥ यद्यश्वो न स्याद् बलीवर्द एवैतत् कर्म कुर्यात् ॥ १४ ॥ अजस्य पद आधेय इति विज्ञायते ॥ १५ ॥ कमण्डलुपद इत्येकेषाम् ॥ १६ ॥ अश्वमुपसंगृह्य पुरस्तात् प्रत्यङ्मुखः प्रह्वस्तिष्ठन् बृहति[13] गीयमाने ॥ १७ ॥ ॥ ८ ॥

अर्धोदिते सूर्य आहवनीयमादधाति ॥ १ ॥ सर्वोदिते ब्रह्मवर्चसका-

1 Gb °मभिद्°
2 D अमु°
3 For °यमनं Ga °यततं, Gbc °यतं
4 Gbc °न्ति
5 G एवाहितं for एवं विहितं
6 D °दितं, Gb एतेनैवाभिहितं
7 D तथत्र्°, Ga यत्र्°
8 Thus the mss. See A. Weber's note on the Saṃhitā text.
9 G तथा
10 Ga समयाद्वे, Gb समा एव, Gc समयाश्वे Cf. Hir. 3. 4: p. 316 l. 5 समयार्थे (Mahādeva अर्धार्थे) Āp. 5. 14. 12 अर्धाश्वे
11 Gbc °का°
12 G om. one च
13 All mss. °ती

मस्यादध्यात् ॥ २ ॥ यथर्ष्याधानेनाधाय व्याहृतीभिरादधाति[1]—भूर्भुवः सुवः इति ॥ ३ ॥ ततः सर्पराज्ञीभ्याम्—भूमिर्भूम्ना [1. 5. 3a] इत्येतया च चतुर्थ्या च ॥ ४ ॥ एताभ्यामेवाहितं यजमान उपतिष्ठते ॥ ५ ॥ ततो घर्मशिरसा—यदंश्चक्षुः [TB 1. 1. 7. 2] इति ॥ ६ ॥ एतेनैवाहितं[2] यजमान उपतिष्ठते ॥ ७ ॥ प्राणं त्वामृत आदधामि इति च द्वाभ्याम् ॥ ८ ॥ अन्तत आधायोपतिष्ठते—आनशे व्यानशे [l.c.] इति ॥ ९ ॥ निहिते वारवन्तीयस्यैते गायति ॥ १० ॥ नाहितमग्निमनभिहुतमुपस्पृशेत् ॥ ११ ॥ आज्येन चौषधीभिश्च शमयितव्य इति विज्ञायते ॥ १२ ॥

या ते अग्ने पशुषु पवमानौ[3] प्रिया तनूर्या पृथिव्यां याग्नौ या रथंतरे या गायत्रे छन्दसीदं ते तामवरुन्धे । तस्यै ते स्वाहा ॥

या ते अग्ने ऽप्सु पावकौ[4] प्रिया तनूर्यान्तरिक्षे या वायौ या वामदेव्ये[5] या त्रैष्टुभे छन्दसीदं ते तामवरुन्धे । तस्यै ते स्वाहा ॥

या ते अग्ने सूर्ये शुचिः प्रिया तनूर्या दिवि यादित्ये या बृहति[6] या जागते छन्दसीदं ते तामवरुन्धे । तस्यै ते स्वाहा ॥

इति ॥ १३ ॥ ॥ ६ ॥

आज्येन चौषधीभिश्च शमयित्वाहवनीयात् सभ्यावसथ्यौ यथर्ष्याधानेनादधाति ॥ १ ॥ अरणीभ्यां वा मथित्वा ॥ २ ॥ सभायां सभ्यमावसथ्यमावसथीयम् ॥ ३ ॥ दक्षिणाग्नौ सभ्यावसथ्ययोरिति विज्ञायते[7] ॥ ४ ॥ यज्ञायज्ञियं गायेदित्येकं[8][9] सर्वेष्वित्यपरम् ॥ ५ ॥ ब्रह्माग्न्याधेये सामानि गायेदिति विज्ञायते ॥ ६ ॥ नाग्न्याधेये सामानि गायेदित्येकेषाम् ॥ ७ ॥ आग्निपवमानीभि[9]स्तिसृभि[10]स्ति[11]स्र आश्वत्थीः समिध आदधाति—[12]अग्न आयूंषि पवसे [1. 6. 6l] इत्येताभिः ॥ ८ ॥ तिसृभिः शमीमय्यस्तिस्रः समिधो घृतान्वक्ता आदधाति[12]—समुद्रादूर्मिः इत्येताभिः ॥ ९ ॥ तिसृभिः[11] प्रेद्धो अग्ने दीदिहि पुरो नः [4. 6. 5k] इत्यौदुम्बरीम् । विधेम ते परमे जन्मन्नग्ने [l.c.l] इति वैकङ्कतीम् । तां सवितुर्वरेण्यस्य चित्राम् [l.c.m] इति शमीमयीम् ॥ १० ॥ सर्वेष्वेकैकाम् ॥ ११ ॥ प्रातरग्निहोत्रस्यावृता तूष्णीमग्निहोत्रं[13] जुहोति ॥ १२ ॥ अरण्ये

1 DGc व्याहृति°
2 Gb °वाभिहितं
3 Gab transpose पशुषु and पवमाना
4 G transposes अप्सु and पावका
5 Gab °दैव्ये
6 DGbc °तीं
7 Ga °मावस्थ आ°, Gb °मावसथ आ°, Gc °मावसथमा°
8 Gbc om.
9-9 D om, from एकं (in sūtra 5) up to आग्निपवमानीभिः (in sū. 8)
10 D एताभिः for तिसृभिः
11-11 Ga om, (hapl.) from तिस्रः (in sū. 8) up to तिसृभिः (in sū. 10)
12-12 Gc om. (hapl.)
13 DGb °त्रे

ऽनुवाक्याभिर्घोराभिस्तनूभिर्यजमान आहवनीयमुपतिष्ठते—याते अग्ने घोरास्तनु-वस्ताभिरमुं गच्छ [TB 1. 1. 7. 3] इति ब्रूयाद् यं द्विष्यात् ॥ १३ ॥ ॥ १० ॥

तिरःपवित्रमाज्यं निरुप्योत्पूय स्रुवं च जुहूं च निष्टप्य संमृज्य[1] चतु-र्गृहीतेन स्रुचं पूरयित्वा द्वादशगृहीतेन वा पूर्णाहुतिं जुहोति—सप्त ते अग्ने समिधः सप्त जिह्वाः [1. 5. 3h] इत्येतामनुद्रुत्य[2] स्वाहाकारेण जुहोति ॥ १ ॥ हुतायां पूर्णा-हुतौ वरं ददाति ॥ २ ॥ एवमेवात ऊर्ध्वं दर्विहोमेषु निर्वपत्युत्पुनाति निष्टपति संमार्ष्ट्यन्ततः स्वाहाकारं दधाति[3] ॥ ३ ॥ यान् प्रतिनिगद्य जुहोत्येते दर्विहोमा[4] भवन्ति यांश्च जुहोतीति चोदयेत् ॥ ४ ॥ ततो यजमान आहवनीयमुपतिष्ठते—ये ते अग्ने शिवे तनुवौ विराट् च स्वराट् च [TB 1. 1. 7. 2] इत्यनुवाकशेषेण ॥ ५ ॥ तत एतामाहुतिम्—ये अग्नयो दिवो ये पृथिव्याः इति ॥ ६ ॥ भास्वतो विराजं[5]क्रमैरुप-तिष्ठते—अथर्व पितुं मे गोपाय [l. c. 1. 2. 1. 25] इत्यन्वाहार्यपचनम् । नर्य प्रजां मे गोपाय [l.c.] इति गार्हपत्यम् । शंस्य पशून् मे गोपाय [l. c.] इत्याहवनीयम् । सप्रथ सभां मे गोपाय [l. c. 26] इति सभ्यम् । अहे बुध्निय मन्त्रं मे गोपाय [l. c.] इत्यावसथ्यम् । पवधार्मीन् [l. c. 27] इति च सर्वान् ॥ ७ ॥ ॥ ११ ॥

आग्नेयस्य तन्त्रं प्रक्रमयति ॥ १ ॥ समानमा निर्वपणात् ॥ २ ॥ आग्नेयमष्टा-कपालं निर्वपति ॥ ३ ॥ निरुप्तं[6] हविरुपसन्नमप्रोक्षितं भव[illegible] ॥ ४ ॥ अथ सभ्याव-सथ्ययोर्मध्ये ऽधिदेवनमुद्धत्यावोक्ष्याक्षान् न्युप्याक्षेषु हिरण्यं निधाय व्यूह्य समूह्य जुहोति—नि षसाद धृतव्रतः [1. 8. 16f] इत्येतया ॥ ५ ॥ शतं यजमानायाक्षान् प्रयच्छन्नाह—व्रीहिभ्यो गां दी[7]व्यताहि[8]संन्तः पर्वाणि[9] विशसत इति ॥ ६ ॥ तद् यज-मानः कृतं विजित्योत्तिष्ठति ॥ ७ ॥ गामस्य तदहः सभायां दी[10]व्येयुः ॥ ८ ॥ तस्याः परूंषि न हिंस्युः ॥ ९ ॥ तां सभासद्भ्य उपहरेत्[11] ॥ १० ॥ तद्[12] यद्[12] गृह्णीयात् तेदु-भयमन्नं संस्कृत्य ब्राह्मणान् भोजयेत् ॥ ११ ॥ आवसथे मध्ये परिषदो[13][14] हिरण्यं निधायाभिजुहोति—प्र नूनं ब्रह्मणस्पतिः इत्येतया ॥ १२ ॥ ततो यजमानो ऽग्नीनुप-तिष्ठते—कल्पेतां द्यावापृथिवी ॥ ये ऽग्नयः समनसः [4. 4. 11g] इति द्वाभ्याम् ॥ १३ ॥ समानमा दक्षिणाकालात् ॥ १४ ॥ वर्धमाना दक्षिणा देये[illegible]विज्ञायते ॥ १५ ॥

1 DGbc संसृज्य
2 D °हृत्य, Gb °दृत्त्व
3 Gbc ददा°
4 DGa दर्वी°
5 Gab विराजः
6 D निरुप्तं, Gb निरुक्तं
7 DGb °दृप°
8 DbG दि°
9 DGa पर्वाणि
10 DGbc दि°
11 Gc °हरेयुः
12-12 Ga तमद्, Gb तथा यद्, Gc तथा यत्
13-13 Gc om.
14 D om.

अग्नीधे ऽग्र उपबर्हणँ सा[illegible]नं ददाति ॥ १६ ॥ अजं[1] चाश्वं ब्रह्मणे ॥ १७ ॥ धेनुँ होत्रे ॥ १८ ॥ अनड्वाहमध्वर्यवे ॥ १९ ॥ मिथुनौ गावौ वासो रथमिति सर्वेभ्यः ॥ २० ॥ षड् वा द्वादश वा चतुर्विँशतिर्वाग्न्याधेयदक्षिणा भवन्ति ॥ २१ ॥ सहादिष्टदक्षिणाभिः संचक्षीतेत्येके ॥ २२ ॥ ॥ १२ ॥

अन्यत्रादिष्टदक्षिणाभ्य इत्यपरम् ॥ १ ॥ यैघनाद्यो ऽग्नीनादधीताप्येकां गां दक्षिणां दद्यात् ॥ २ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ३ ॥ सायमग्निहोत्रे होष्यन् दशहोतारं मनसानुद्रुत्याहवनीये सग्रहं[5] जुहोति ॥ ४ ॥ द्वादशाहमजस्रेष्वग्निहोत्रं जुहोति ॥[2] ५ ॥ व्रतचारी भवति ॥ ६ ॥ द्वादशरात्रीः स्वयं जुहुयादन्यो वा ॥ ७ ॥ न प्रवसेत् ॥ ८ ॥ अहतं वासो वसीत ॥ ९ ॥ स्वयं[7] त्रयोदशीं जुहुयात् ॥ १० ॥ यां प्रथमामग्निहोत्राय दुहन्ति साहोरात्रस्य दक्षिणा ॥ ११ ॥ अग्निहोत्रमेताभिर्व्याहृतीभिरुपसादयेत्—भूर्भुवः सुवः इति ॥ १२ ॥ संवत्सरे पर्यागत एताभिरेव सादयेत् ॥ १३ ॥ प्रथम एव संवत्सर इत्याश्मरथ्यः संवत्सरेसंवत्सर इत्यालेखनः ॥ १४ ॥ द्वादशसु व्युष्टासु तनूंहविर्भिर्निर्वपति[11] ॥ १५ ॥ अग्नये पवमानाय पुरोडाशमष्टाकपालं त्रिँशन्मानँ हिरण्यं दक्षिणा ॥ १६ ॥ सिद्धमिष्टिः संतिष्ठते ॥ १७ ॥ ततो ऽग्नये पावकायाग्नये शुचये त्रिँशन्मानचत्वारिँशन्माने हिरण्ये[13] दक्षिणा ॥ १८ ॥ सिद्धमिष्टिः संतिष्ठते ॥ १९ ॥ काममेव श्वोभूते तनुंहवीँषि निर्वपेत् ॥ २० ॥ काममर्धमासे मास्तृतौ[14] संवत्सरे सद्य इत्येकेषाम् ॥ २१ ॥ समानतन्त्राणि वाग्नेयेन स्युः ॥ २२ ॥ विज्ञायते—न सोमेन[15] यक्ष्यमाणः ॥ २३ ॥ ॥ १३ ॥

पुरा संवत्सरात् तनुंहवीँषि निर्वपेत् ॥ १ ॥ अपि वाग्नये पवमानायाग्नये पावकायाग्नये शुचय आज्याहुतीर्हुत्वा सोमदेवताभ्यो यवान् निर्वपेदुपरिष्टात् तनुंहविर्भ्यः ॥ २ ॥ अग्नीषोमीयमेकादशकपालमनुनिर्वपत्यैन्द्राग्नमेकादश-

1 DGa अजां
2–2 Sūtras 2–5 are omitted in DGa.
3 Gb om.
4 Gb °स्हुत्या°
5 Gb सग्रह
6–6 Gb वासोपवीतः
7 Gc om.
8 Thus DGa; Gbc साग्निहोत्रस्य
9 Da °हुति°
10 Thus all mss.
11 Thus D; Ga °हविर्निर्वपति, Gbc °हवींषि निर्वपति
12 D om.
13 D तनू°
14 G मासतौ
15 Ga सोमेना-(following Āp.)

कपालमदित्यै[1] घृते चरुम् ॥ ३ ॥ अग्नीषोमीयो ब्राह्मणस्यैव स्यादेतरयोर्वर्णयोः ॥ ४ ॥ समानमा फलीकरणात् ॥ ५ ॥ फलीकृतानां तण्डुलानां विभागमन्त्रेण चरव्यानपोद्धरति ॥ ६ ॥ समेतरान्[2] पिनष्टि ॥ ७ ॥ समानमा कपालोपधानात् ॥ ८ ॥ ऐन्द्राग्नस्य कपालान्युपधाय प्रथमेन कपालमन्त्रेण चरुस्थालीमुपदधाति ॥ ९ ॥ ध्रुवो ऽसि [1. 6. 2a] इति मन्त्रं संनमति । ध्रुवासि [1. 1. 13l] इति वा ॥ १० ॥ पिष्टानामावृता तण्डुलान् संवपत्युत्पुनाति ॥ ११ ॥ यजुषाज्यमुत्पूय चरुस्थाल्यामानयति ॥ १२ ॥ यथाधिकरणं[3] मन्त्रं[4] नमति[5] ॥ १३ ॥ अधिश्रयणमन्त्रेण चरव्यानावपति ॥ १४ ॥ स्थाल्यैव चरुमासादयति ॥ १५ ॥ एष एवात ऊर्ध्वं चरूणां कल्पो भवत्यन्यत्राग्रयणात्[6] ॥ १६ ॥ सप्तदश सामिधेन्यो भवन्ति ॥ १७ ॥ समानमा हविषां प्रदानात् ॥ १८ ॥ ॥ १४ ॥

आदित्यं हुतमनुमन्त्रयते—अदित्या अहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयम् इति ॥ १ ॥ एवमेवं सर्वानादित्याननुमन्त्रयते ॥ २ ॥ आदित्यस्य हविरुच्छिष्टं चतुर्धाकरणकाले सर्वं ब्रह्मणे परिहरति ॥ ३ ॥ तं चत्वार आर्षेया ऋत्विजः प्राश्नन्ति ॥ ४ ॥ तेभ्यः प्राशितवद्भ्यो धेनुं वरं ददाति ॥ ५ ॥ उपांशुदेवता आग्न्याधेयिका इष्टयो भवन्तीत्येकेषाम् ॥ ६ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ७ ॥ दर्शपूर्णमासावारप्स्यमानः सारस्वतौ होमौ पुरस्ताज्जुहुयात्—पूर्णा पश्चाद् यत् ते देवा अदधुः इति द्वाभ्याम् ॥ ८ ॥ अन्वारम्भणीयामिष्टिं निर्वपति ॥ ९ ॥ आग्नावैष्णवमेकादशकपालं सरस्वत्यै चरुं[9] सरस्वते द्वादशकपालम् ॥ १० ॥ अग्नये भगिने पुरोडाशमष्टाकपालं चतुर्थं निर्वपेद् भगकामः ॥ ११ ॥ समानमा हविषां प्रदानात् ॥ १२ ॥ सारस्वतं हुतमनुमन्त्रयते—सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयम् इति ॥ १३ ॥ एवमेव सर्वान् सरस्वतीदेवताननुमन्त्रयते[11] ॥ १४ ॥ तस्य पुरस्तात् स्विष्टकृतो जयान् जुहोति—चित्तं च[13] चित्तिश्च [3. 4. 4a] इति द्वादश । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छत् [l. c. b] इति त्रयोदशीं जुहुयात् ॥ १५ ॥ ॥ १५ ॥

अग्ने बलद इति चतुर्दशीं ब्रह्मवर्चसकामस्य ॥ १ ॥ चित्रं तस्य जनतायां

1 Gab add च
2 Thus D; Ga संभेदतरान्, Gbc संहतरान्
3 D यथाधिकरं, Ga ॰णा–
4 Gb मन्त्रान्
5 Gbc नयति
6 Thus D; G ॰न्यत्राज्यश्रयणात्
7 DGa एव for एवमेव
8 G ॰नमि॰
9 D om.
10 Gb ॰मष्टादश॰
11-11 D (hapl.) om.
12 Gbc ॰देवतान्॰
13 DGab om.

भवति शवलमिव त्वस्यात्मन्[1] जायते ॥ २ ॥ मिथुनौ गावौ दक्षिणा ॥ ३ ॥ सिद्ध-मिष्टिः संतिष्ठते ॥ ४ ॥ दर्शपूर्णमासावारंभमाणश्चतुर्होतारं मनसानुद्रुत्याहवनीये सग्रहं जुहोति ॥ ५ ॥ दर्शपूर्णमासावारंभते ॥ ६ ॥ पौर्णमासीं पूर्वाम्[4] ॥ ७ ॥ अमावास्यायामादधानस्यैतदविकृतम् ॥ ८ ॥ पौर्णमास्यां तु पूर्वस्मिन् पर्वणि सेष्टि[5] सान्वारम्भणीयं सद्यो ऽपवृज्य ॥ ९ ॥ श्वोभूते पौर्णमासेन यजते ॥ १० ॥ अथैतान्याहिताग्निव्रतानि भवन्ति ॥ ११ ॥ नानृतं वदेत् ॥ १२ ॥ नास्य ब्राह्मणो ऽनाश्वान् गृहे वसेत् ॥ १३ ॥ सूर्योढमतिथिं वसत्यै नापरुन्ध्यात् ॥ १४ ॥ न सा-यमहुते ऽश्नीयात् ॥ १५ ॥ न प्रातरहुते[6] ॥ १६ ॥ न नक्तमन्यदन्नाद्याद् दद्यात् ॥ १७ ॥ नक्तमन्नं दद्यन्नदयीत ॥ १८ ॥ नर्जीषपक्वस्याश्नीयात् ॥ १९ ॥ क्लिन्नं दारु नोद्ध्यात् ॥ २० ॥ अन्तर्नाव्यापस्तासां नाश्नीयात् ॥ २१ ॥ स्वकृत इरिणे नाव-स्येत् ॥ २२ ॥ रजतं हिरण्यं बर्हिषि न दद्यात् ॥ २३ ॥ तूष्णीं[9] हिंकृत्य स्त्रियमुपे-यात् ॥[10] २४ ॥ ॥ १६ ॥

पुनराधेयं व्याख्यास्यामः ॥ १ ॥ तस्याग्न्याधेयेन कल्पो व्याख्यातः ॥ २ ॥ विकाराननुक्रमिष्यामः ॥ ३ ॥ यो ऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमाधत्त इति विज्ञायते ॥ ४ ॥ ज्याम्यां[12] पुत्रैर्मर्त्यायां यद्वैवाहिताग्निरङ्गेन विधुरतामियादथाद-धीतेत्येकेषाम् ॥ ५ ॥ प्रजाकामः पुनरादधीत पशुकामः पुनरादधीतान्नाद्यकामः पुनरादधीत प्रतिष्ठाकामः पुनरादधीतेति विज्ञायते ॥ ६ ॥ यावज्जीवं पुनराधेयं-कालो नात्येतीत्याश्मरथ्यः संवत्सरमित्यालेखनः ॥ ७ ॥ आग्नेयमष्टाकपालं[15] निर्वपेद् वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन् ॥ ८ ॥ तस्य पुरस्तात् स्विष्ट-कृत एता आहुतीर्जुहोति—

या ते अग्ने उत्सीदतः पवमाना पशुषु प्रिया तनूस्तया सह पृथिवीमाविश । रथंतरेण साम्ना गायत्रेण छन्दसा ॥ स्वाहा ॥ ९ ॥ ॥ १७ ॥

या ते अग्न उत्सीदतः पावकाप्सु प्रिया तनूस्तया सहान्तरिक्षमाविश । वामदेव्येन साम्ना त्रैष्टुभेन छन्दसा । ततो न इषमूर्जमाकृधि गृहमेधं च वर्धय ॥ स्वाहा ॥

1 Gab °त्मं for °त्मन्
2 Gc °ल°
3 Gb °स्मृत्वा°
4 Gab पूर्वम्
5 DGc सेष्टि
6 D प्रातर्हुते, Ga प्रातराहुते
7 DGa सा°
8 D नावस्येद्
9 DGc नि-
10 Gbc repeat the sūtra.
11 D विकामान°
12 D जान्यां, Ga ज्योन्यां, Gc नाम्न्यां न
13 Gc पुत्रस्य for पुत्र-
14 G °श्रेयस
15 Gbc add पुरस्तात्

या ते अग्ने उत्सीदतः सूर्ये शुचिः प्रिया तनूस्तया सह दिवमाविश । बृहता साम्ना जागतेन छन्दसा । ततो नो वृष्ट्यावधि[1] ॥ स्वाहा ॥

यास्ते अग्ने विभक्तीरिन्द्रः सूकर आभरत् ।
तासु शोचिषु सीदेह भस्म वैश्वानरस्य यत् ॥ स्वाहा ॥
यास्ते अग्ने कामदुघा विभक्तीरनुसंभृताः ।
ताभिर्नः कामान् धुक्ष्वेह प्रजां पुष्टिमथो धनम् ॥ स्वाहा ॥

ये[2] ते अग्ने वानस्पत्याः संभाराः संभृताः सह तेभिरागच्छ वनस्पतीन् स्वां योनिं यथायथम् ॥ स्वाहा ॥

अगन्नग्निर्यथालोकमसदत् सदने[3] स्वे ।
अवीरहत्यं देवेषूपागां मनसा सह ॥ स्वाहा ॥

इति ॥ १ ॥ पौर्णमास्यां ज्वलतोऽग्नीनुद्वासयति ॥ २ ॥ संवत्सरमवसृष्टाग्निः स्यादित्येकमपरिमितमित्य[4]परम् ॥ ३ ॥ ॥ १८ ॥

अथैतानि पुनराधेयनक्षत्राणि—रोहिणी पुनर्वसू अनूराधा इति ॥ १ ॥ वर्षासु शरदि वादधीत ॥ २ ॥ मध्यंदिन आधेय इति विज्ञायते ॥ ३ ॥ सर्वान् मध्यंदिन आदधीतेत्येकम्[5] । आहवनीयं सभ्यावसथ्यावित्यपरम् ॥ ४ ॥ समानमा गार्हपत्यस्याधानात् ॥ ५ ॥ सर्वाभिः सर्पराज्ञीभिर्गार्हपत्यमादधाति ॥ ६ ॥ समानमाऽऽहवनीयस्योद्यमनात् ॥ ७ ॥ उपोलवा[6] दर्भा भवन्ति परुष्णाः[7] संवत्सरप्रवाताः । तेषामिध्ममादीप्याहवनीयमुद्यच्छते ॥ ८ ॥ यत् त्वा क्रुद्धः परोवप [1. 5. 3e] इत्यन्वाहार्यपचनमादधाति ॥ ९ ॥ यत् ते मन्युपरोप्तस्य [l. c. f] इत्याहवनीयम् ॥ १० ॥ मनो ज्योतिर्जुषताम् [l. c. g] इत्याहितमाहितमुपतिष्ठते ॥ ११ ॥ समानमनुतूष्णीमग्निहोत्रात्[8] ॥ १२ ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः [l. c. h] इति तूष्णीमग्निहोत्रं जुहोति ॥ १३ ॥ समानमा निर्वपणात् ॥ १४ ॥ आग्नेयं पञ्चकपालं निर्वपति ॥ १५ ॥ स एषोऽष्टाकपालस्य स्थानं प्रत्येति ॥ १६ ॥ पञ्चदश सामिधेन्यो भवन्ति सप्तदश वा ॥ १७ ॥ यत् प्रागुत्तमादनूयाजात् तेनोपांशु

1 Ga °व°, Gb °यत, Gc °वत (following Āp.)

2 All mss. या

3 For असदत् सदने D सदत् सं ने, Gab सदत् सदने

4 For °मितमित्य° D °मिता इत्य°, Ga °मित इत्य°, Gb °मित्य°

5 Gb om. एकम्

6 D उपोशला वा, Gb उपोलपा

7 Gb वरुणाः

8 Thus DGbc; Ga समानमातूष्णीमाग्निहोत्रात्

प्रचरन्त्यन्यत्र स्विष्टकृतः ॥ १८ ॥ समानमा प्रयाजेभ्यः ॥ १९ ॥ चतुर्थुं प्रयाजेषु चतस्रो विभक्तीर्दधाति ॥ २० ॥ ॥ १९ ॥

अग्नाग्ने ऽग्नावग्ने ऽग्निनाग्ने ऽग्निमग्ने इति ॥ १ ॥ उपरिष्टाद् येयजामहाद् दध्यादित्येकं पुरस्तादामन्त्रणीयात् पादादित्यपरम् ॥ २ ॥ यं कामयेतर्ध्नुयादिति तस्योपरिष्टात् प्रयाजानां विभक्तीर्दध्यात् पुरस्ताद् वषट्कारात् ॥ ३ ॥ स्वयंसंपन्न उत्तमः[2] प्रयाजः ॥ ४ ॥ समानमाऽऽज्यभागाभ्याम् ॥ ५ ॥ बुधन्वानाग्नेय आज्यभागो भवति—अग्नि[3] स्तोमेन बोधय [4. 1. 11*t*] इति ॥ ६ ॥ पवमान्वान् सौम्यः—अग्न आयूंषि पवसे [1. 6. 6*l*] इति ॥ ७ ॥ जुषाणो अग्निः पवमान आज्यस्य हविषो वेतु इति यजति ॥ ८ ॥ अग्निर्मूर्धा [1. 5. 5*c*] इति सौम्यस्थे लोके कुर्यात् । प्रजाकामः पशुकामो वा ॥ ९ ॥ अग्ने तमद्य [4. 4. 4*w*] इति पङ्क्त्यो याज्यानुवाक्या भवन्ति । द्वे हविषो द्वे स्विष्टकृतः ॥ १० ॥ पुनरूर्जा ॥ सह रय्या [1. 5. 3*ik*] इत्यभितः पुरोडाशमाहुतीर्जुहोति ॥ ११ ॥ समानमा दक्षिणाकालात् ॥ १२ ॥ उभयीर्दक्षिणा ददात्याग्न्याधेयिकीः[4] पौनराधेयिकीश्च ॥ १३ ॥ ता इमाः पुनराधेयदक्षिणाः ॥ १४ ॥ ॥ २० ॥

पुनर्निष्कृतो रथः पुनरुत्स्यूतं वासः पुनरुत्सृष्टो ऽनड्वान् शतमानं हिरण्यमिति ॥ १ ॥ समानमाऽनूयाजेभ्यः ॥ २ ॥ द्वयोरनूयाजयोर्द्वे विभक्ती दधाति—देवे अग्नौ देवो अग्निः इति ॥ ३ ॥ व्याख्यातो विभक्तिलोकः ॥ ४ ॥ स्वयंसंपन्न उत्तमो ऽनूयाजः ॥ ५ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ६ ॥ आग्निवारुणमेकादशकपालम् निर्वपति ॥ ७ ॥ स एषो ऽग्नीषोमीयस्य स्थानं प्रत्येति ॥ ८ ॥ सर्वेषां वांनुनिर्वाप्याणाम् ॥ ९ ॥ संतिष्ठते पुनराधेयम् ॥ १० ॥ य ऊर्ध्वं पुनराधेयादग्निमादधीत स एतान् होमान् जुहुयात्—लेकः सलेकः सुलेकः [1. c. *l*] इति ॥ ११ ॥ त इम आग्न्याधेयिकानां दशहोमानां स्थानं प्रतियन्ति ॥ १२ ॥ यदरण्योः समारूढो नश्येत् पुनराधेयं कुर्वीतेत्याश्मरथ्यो ऽग्न्याधेयमित्यालेखनः ॥ १३ ॥ यस्योभावनुगतावभि वोदियादभि वास्तमियात् पुनराधेयमेव कुर्वीत ॥ १४ ॥ ॥ २१ ॥

इत्याग्न्याधानः पञ्चमः प्रश्नः[9] ॥

---

1 Gb प°
2 DGa उक्तं, Gc उत्तमं
3 G सोमस्य
4 DGc °यीकीः
5 Ga °धेय° for °धेयि°
6 DGa om. वा
7 DGa °धेयः
8 Gc repeat पुनराधेयमेव कुर्वीत
9–9 D द्वितीयः, Gac om., Gb इति अग्न्या°

## NOTICES OF BOOKS

Ṛgveda-Saṃhitā, parts 1–4, edited, translated and annotated by M. Pt. Sitaram Shastri, S. N. Pradhan and others. 7½" × 10", pp. XIV, 246, 68, 26, 28, 48. Indian Research Institute, Calcutta. 1934. Rs. 6.

Ṛgveda-Saṃhitā, part 1, edited by N. S. Sontakke and others. 7" × 10½", pp. XIX, 1115, 2. Vedic Research Institute, Poona. 1934. Rs. 12.

Of these two editions of the Ṛgveda, the Calcutta one is a very ambitious undertaking. The four parts before us cover only the first five hymns. It includes besides the text and the Padapāṭha, the commentary of Sāyaṇa, extracts from Skandasvāmin and Veṅkaṭamādhava, followed by an English translation and critical notes which are intended to sum up the views of modern writers. Again there are translation and notes in Bengali and Hindi. The Hindi translation differs widely from English and Bengali, oscillating between Sāyaṇa and Dayānanda. The English translation is after Sāyaṇa, but Dr. S. N. Pradhan requests the scholars "to use not the translation given in the body of the book, but the more correct interpretation always given in the footnote whenever Sāyaṇa is in error"

The interpretations of Dr. Pradhan and his evaluation of Sāyaṇa do not always carry conviction. In his prefatory note

he remarks: "When there is no such authority (viz., the Brāhmaṇas and Nirukta) to mislead, Sāyaṇa is rational and gives just the correct interpretations" !!

The book is very well printed. We recommend it to the generous public for warm support.

The Poona Ṛgveda is a critical edition of Sāyaṇa's commentary, based on more than 30 mss., written in Devanāgarī, Grantha and Malayalam scripts. It contains the entire first maṇḍala. The selection of readings is generally judicious. It is really an advance on the pioneer and monumental work of Max Muller. It is neatly got up.

A New Approach to the Vedas, an essay in translation and exegesis, by Ananda K. Coomaraswamy. $5^1/_2" \times 8^1/_2"$, pp. IX, 116. Luzac and Co., London. 1933. Sh. 5.

Coomaraswamy's is certainly a new approach. It is perfectly true that modern Sanskrit scholarship is too little humane. Even Indians cannot escape the charge. The little book contains Bṛhadāraṇyaka Upaniṣad I. 2, portions of Maitrī Up. and three creation hymns from Ṛgveda. X. 129, 72, 90, all in English translation followed by a commentary giving comparisons from Indian and Christian mystic sources. He maintains the consistency of Vedic and Upaniṣadic thought. He has succeeded in great measure in showing the oneness of the thought quoted. But what about the rest of the Veda ?

We congratulate the author for bringing his humanistic outlook to bear on the Veda. It is time that absurd philological renderings of the wisdom of the ancients should stop.

Vākyapadīya, part I, edited by Charu Deva Shastri. $6" \times 9^1/_2"$, pp. VIII, 28, 138, 10. Ramlal Kapur Trust Society, Anarkali, Lahore. 1934. Rs. 5.

Philosophy of grammar is a fascinating study, and India

can be proud of having given a brilliant start to the world. Already before the Christian era we have the work of Patañjali, the Mahābhāṣya, the master-performance for all times, wherein are scattered the riddles pertaining to the shuttles that play and weave the pattern of language. There are solutions too. A later genius, Bhartṛhari, a literary artist and a philosopher, collected all the existing material, added to it his own and presented it in an unimitable setting. This is the work known as Vākyapadīya.

Its first chapter (all in verse) is now presented in a critical edition based on 20 mss. Every verse is followed by the author's own commentary which in diction approaches Śaṃkara. This commentary had been printed at Benares long ago in an abridged and distorted form. (It was there ascribed to Puṇyarāja on the title page, but to Harivṛṣabha in the colophon.) There is also a sub-commentary by Vṛṣabhadeva, printed for the first time from one ms., and hence still standing in need of improvement.

The editor, Prof. Charu Deva, has done his work conscientiously. His introduction and footnotes are both valuable.

Het Godsbegrip bij Spinoza, een inleiding tot het monisme, door W. R. de Vaynes van Brakell Buys. 6½"×9½", pp. 150. Utrecht. 1934. Fl. 3.

It is a unique work. Chapters II and III are of special interest to the indologist. Herein the auther draws most illuminating comparisons between Spinoza and Śaṃkara.

R. V.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.